# Gita - sandhi-vigraha and anvaya

# ગીતા સન્ધિવિગ્રહ અન્વય

## Document Information

Text title : bhagavadgItA anvayasandhivigraha sahitaM

File name : gitAanvayasandhivigraha.itx

Category : gItA, giitaa, bhagavadgItA

Location : doc_giitaa

Author : -

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Translated by : -

Latest update : July 4, 2008

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# ગીતા સન્ધિવિગ્રહ અન્વય

અથ પ્રથમોઽધ્યાયઃ । અર્જુનવિષાદયોગઃ ।

અથ પ્રથમઃ અધ્યાયઃ । અર્જુન-વિષાદ યોગઃ ।

ધૃતરાષ્ટ્ર ઉવાચ ।

ધૃતરાષ્ટ્રઃ ઉવાચ ।

ધર્મક્ષેત્રે કુરુક્ષેત્રે સમવેતા યુયુત્સવઃ ।
મામકાઃ પાણ્ડવાશ્ચૈવ કિમકુર્વત સઞ્જય ॥ ૧-૧॥

ધર્મ-ક્ષેત્રે કુરુ-ક્ષેત્રે સમવેતાઃ યુયુત્સવઃ ।
મામકાઃ પાણ્ડવાઃ ચ એવ કિમ્ અકુર્વત સઞ્જય ॥ ૧-૧॥

હે સઞ્જય! ધર્મ-ક્ષેત્રે, કુરુ-ક્ષેત્રે, યુયુત્સવઃ સમવેતાઃ
મામકાઃ પાણ્ડવાઃ ચ એવ કિમ્ અકુર્વત ?

સઞ્જય ઉવાચ ।

સઞ્જયઃ ઉવાચ ।

દૃષ્ટ્વા તુ પાણ્ડવાનીકં વ્યૂઢં દુર્યોધનસ્તદા ।
આચાર્યમુપસંગમ્ય રાજા વચનમબ્રવીત્ ॥ ૧-૨॥

દૃષ્ટ્વા તુ પાણ્ડવ-અનીકમ્ વ્યૂઢમ્ દુર્યોધનઃ તદા ।
આચાર્યમ્ ઉપસઙ્ગમ્ય રાજા વચનમ્ અબ્રવીત્ ॥ ૧-૨॥

તદા તુ પાણ્ડવ-અનીકમ્ વ્યૂઢમ્ દૃષ્ટ્વા, રાજા દુર્યોધનઃ
આચાર્યમ્ ઉપસઙ્ગમ્ય, (ઇદં) વચનમ્ અબ્રવીત્ ॥

પશ્યૈતાં પાણ્ડુપુત્રાણામાચાર્ય મહતીં ચમૂમ્ ।
વ્યૂઢાં દ્રુપદપુત્રેણ તવ શિષ્યેણ ધીમતા ॥ ૧-૩॥

પશ્ય એતામ્ પાણ્ડુ-પુત્રાણામ્ આચાર્ય મહતીમ્ ચમૂમ્ ।
વ્યૂઢામ્ દ્રુપદ-પુત્રેણ તવ શિષ્યેણ ધીમતા ॥ ૧-૩॥

હે આચાર્ય! તવ ધીમતા શિષ્યેણ, દ્રુપદ-પુત્રેણ વ્યૂઢામ્
પાણ્ડુ-પુત્રાણામ્ એતામ્ મહતીમ્ ચમૂમ્ પશ્ય ।

અત્ર શૂરા મહેષ્વાસા ભીમાર્જુનસમા યુધિ ।
યુયુધાનો વિરાટશ્ચ દ્રુપદશ્ચ મહારથઃ ॥ ૧-૪॥

અત્ર શૂરાઃ મહા-ઇષુ-આસાઃ ભીમ-અર્જુન-સમાઃ યુધિ ।
યુયુધાનઃ વિરાટઃ ચ દ્રુપદઃ ચ મહારથઃ ॥ ૧-૪॥

અત્ર, ભીમ-અર્જુન-સમાઃ યુધિ શૂરાઃ મહા-ઇષુ-આસાઃ,
મહારથઃ યુયુધાનઃ, વિરાટઃ ચ દ્રુપદઃ ચ ।

ધૃષ્ટકેતુશ્ચેકિતાનઃ કાશિરાજશ્ચ વીર્યવાન્ ।
પુરુજિત્કુન્તિભોજશ્ચ શૈબ્યશ્ચ નરપુંગવઃ ॥ ૧-૫॥

ધૃષ્ટકેતુઃ ચેકિતાનઃ કાશિરાજઃ ચ વીર્યવાન્ ।
પુરુજિત્ કુન્તિભોજઃ ચ શૈબ્યઃ ચ નર-પુઙ્ગવઃ ॥ ૧-૫॥

ધૃષ્ટકેતુઃ, ચેકિતાનઃ ચ, વીર્યવાન્ કાશિરાજઃ ચ,
પુરુજિત્ કુન્તિભોજઃ ચ, નર-પુઙ્ગવઃ શૈબ્યઃ ચ ।

યુધામન્યુશ્ચ વિક્રાન્ત ઉત્તમૌજાશ્ચ વીર્યવાન્ ।
સૌભદ્રો દ્રૌપદેયાશ્ચ સર્વ એવ મહારથાઃ ॥ ૧-૬॥

યુધામન્યુઃ ચ વિક્રાન્તઃ ઉત્તમૌજાઃ ચ વીર્યવાન્ ।
સૌભદ્રઃ દ્રૌપદેયાઃ ચ સર્વે એવ મહારથાઃ ॥ ૧-૬॥

વિક્રાન્તઃ યુધામન્યુઃ ચ, વીર્યવાન્ ઉત્તમૌજાઃ
સૌભદ્રઃ ચ, દ્રૌપદેયાઃ ચ, સર્વે મહારથાઃ એવ ।

અસ્માકં તુ વિશિષ્ટા યે તાન્નિબોધ દ્વિજોત્તમ ।
નાયકા મમ સૈન્યસ્ય સંજ્ઞાર્થં તાન્બ્રવીમિ તે ॥ ૧-૭॥

અસ્માકમ્ તુ વિશિષ્ટાઃ યે તાન્ નિબોધ દ્વિજ-ઉત્તમ ।
નાયકાઃ મમ સૈન્યસ્ય સંજ્ઞાર્થં તાન્ બ્રવીમિ તે ॥ ૧-૭॥

હે દ્વિજ-ઉત્તમ! અસ્માકમ્ તુ યે વિશિષ્ટાઃ, મમ સૈન્યસ્ય
નાયકાઃ, તાન્ નિબોધ । તાન્ સંજ્ઞાર્થમ્ તે બ્રવીમિ ।

ભવાન્ભીષ્મશ્ચ કર્ણશ્ચ કૃપશ્ચ સમિતિઞ્જયઃ ।
અશ્વત્થામા વિકર્ણશ્ચ સૌમદત્તિર્જયદ્રથઃ ॥ ૧-૮॥

ભવાન્ ભીષ્મઃ ચ કર્ણઃ ચ કૃપઃ ચ સમિતિઞ્જયઃ ।
અશ્વત્થામા વિકર્ણઃ ચ સૌમદત્તિઃ તથા એવ ચ ॥ ૧-૮॥

ભવાન્ ભીષ્મઃ ચ, કર્ણઃ ચ, સમિતિઞ્જયઃ કૃપઃ ચ,
અશ્વત્થામા વિકર્ણઃ ચ, તથા એવ ચ સૌમદત્તિઃ ।

અન્યે ચ બહવઃ શૂરા મદર્થે ત્યક્તજીવિતાઃ ।
નાનાશસ્ત્રપ્રહરણાઃ સર્વે યુદ્ધવિશારદાઃ ॥ ૧-૯॥

અન્યે ચ બહવઃ શૂરાઃ મદર્થે ત્યક્ત-જીવિતાઃ ।
નાના-શસ્ત્ર-પ્રહરણાઃ સર્વે યુદ્ધ-વિશારદાઃ ॥ ૧-૯॥

અન્યે ચ બહવઃ શૂરાઃ, સર્વે મદર્થે ત્યક્ત-જીવિતાઃ,
નાના-શસ્ત્ર-પ્રહરણાઃ યુદ્ધ-વિશારદાઃ [સન્તિ]।

અપર્યાપ્તં તદસ્માકં બલં ભીષ્માભિરક્ષિતમ્ ।
પર્યાપ્તં ત્વિદમેતેષાં બલં ભીમાભિરક્ષિતમ્ ॥ ૧-૧૦॥

અપર્યાપ્તમ્ તત્ અસ્માકમ્ બલમ્ ભીષ્મ-અભિરક્ષિતમ્ ।
પર્યાપ્તમ્ તુ ઇદમ્ એતેષામ્ બલમ્ ભીમ-અભિરક્ષિતમ્ ॥ ૧-૧૦॥

અસ્માકમ્ ભીષ્મ-અભિરક્ષિતમ્ તત્ બલમ્ અપર્યાપ્તમ્,
એતેષામ્ તુ ભીમ-અભિરક્ષિતમ્ ઇદમ્ બલમ્ પર્યાપ્તમ્ (અસ્તિ)।
અયનેષુ ચ સર્વેષુ યથાભાગમવસ્થિતાઃ ।
ભીષ્મમેવાભિરક્ષન્તુ ભવન્તઃ સર્વ એવ હિ ॥ ૧-૧૧॥

અયનેષુ ચ સર્વેષુ યથા-ભાગમ્ અવસ્થિતાઃ ।
ભીષ્મમ્ એવ અભિરક્ષન્તુ ભવન્તઃ સર્વે એવ હિ ॥ ૧-૧૧॥

ભવન્તઃ સર્વે એવ હિ સર્વેષુ અયનેષુ ચ યથા-ભાગમ્ અવસ્થિતાઃ
ભીષ્મમ્ એવ અભિરક્ષન્તુ ।

તસ્ય સઞ્જનયન્હર્ષં કુરુવૃદ્ધઃ પિતામહઃ ।
સિંહનાદં વિનદ્યોચ્ચૈઃ શઙ્ખં દધ્મૌ પ્રતાપવાન્ ॥ ૧-૧૨॥

તસ્ય સઞ્જનયન્ હર્ષમ્ કુરુ-વૃદ્ધઃ પિતામહઃ ।
સિંહનાદમ્ વિનદ્ય ઉચ્ચૈઃ શઙ્ખમ્ દધ્મૌ પ્રતાપવાન્ ॥ ૧-૧૨॥

તસ્ય હર્ષમ્ સઞ્જનયન્ પ્રતાપવાન્ કુરુ-વૃદ્ધઃ

પિતામહઃ, ઉચ્ચૈઃ સિંહનાદમ્ વિનદ્ય શઙ્ખમ્ દધ્મૌ ।

તતઃ શઙ્ખાશ્ચ ભેર્યશ્ચ પણવાનકગોમુખાઃ ।
સહસૈવાભ્યહન્યન્ત સ શબ્દસ્તુમુલોઽભવત્ ॥ ૧-૧૩॥

તતઃ શઙ્ખાઃ ચ ભેર્યઃ ચ પણવ-આનક-ગોમુખાઃ ।
સહસા એવ અભ્યહન્યન્ત સઃ શબ્દઃ તુમુલઃ અભવત્ ॥ ૧-૧૩॥

તતઃ શઙ્ખાઃ ચ ભેર્યઃ ચ પણવ-આનક-ગોમુખાઃ
સહસા એવ અભ્યહન્યન્ત । સઃ શબ્દઃ તુમુલઃ અભવત્ ।

તતઃ શ્વેતૈર્હયૈર્યુક્તે મહતિ સ્યન્દને સ્થિતૌ ।
માધવઃ પાણ્ડવશ્ચૈવ દિવ્યૌ શઙ્ખૌ પ્રદધ્મતુઃ ॥ ૧-૧૪॥

તતઃ શ્વેતૈઃ હયૈઃ યુક્તે મહતિ સ્યન્દને સ્થિતૌ ।
માધવઃ પાણ્ડવઃ ચ એવ દિવ્યૌ શઙ્ખૌ પ્રદધ્મતુઃ ॥ ૧-૧૪॥

તતઃ શ્વેતૈઃ હયૈઃ યુક્તે મહતિ સ્યન્દને સ્થિતૌ માધવઃ
પાણ્ડવઃ ચ એવ દિવ્યૌ શઙ્ખૌ પ્રદધ્મતુઃ ।

પાઞ્ચજન્યં હૃષીકેશો દેવદત્તં ધનઞ્જયઃ ।
પૌણ્ડ્રં દધ્મૌ મહાશઙ્ખં ભીમકર્મા વૃકોદરઃ ॥ ૧-૧૫॥

પાઞ્ચજન્યમ્ હૃષીકેશઃ દેવદત્તમ્ ધનઞ્જયઃ ।
પૌણ્ડ્રમ્ દધ્મૌ મહા-શઙ્ખમ્ ભીમ-કર્મા વૃક-ઉદરઃ ॥ ૧-૧૫॥

હૃષીકેશઃ પાઞ્ચજન્યમ્, ધનઞ્જયઃ દેવદત્તમ્ ,
ભીમ-કર્મા વૃક-ઉદરઃ પૌણ્ડ્રમ્ મહા-શઙ્ખમ્ દધ્મૌ ।

અનન્તવિજયં રાજા કુન્તીપુત્રો યુધિષ્ઠિરઃ ।
નકુલઃ સહદેવશ્ચ સુઘોષમણિપુષ્પકૌ ॥ ૧-૧૬॥

અનન્તવિજયમ્ રાજા કુન્તી-પુત્રઃ યુધિષ્ઠિરઃ ।
નકુલઃ સહદેવઃ ચ સુઘોષ-મણિ-પુષ્પકૌ ॥ ૧-૧૬॥

કુન્તી-પુત્રઃ રાજા યુધિષ્ઠિરઃ અનન્તવિજયમ્, નકુલઃ સહદેવઃ ચ
સુઘોષ-મણિ-પુષ્પકૌ ।

કાશ્યશ્ચ પરમેષ્વાસઃ શિખણ્ડી ચ મહારથઃ ।
ધૃષ્ટદ્યુમ્નો વિરાટશ્ચ સાત્યકિશ્ચાપરાજિતઃ ॥ ૧-૧૭॥

કાશ્યઃ ચ પરમ-ઇષુ-આસઃ શિખણ્ડી ચ મહારથઃ ।
ધૃષ્ટદ્યુમ્નઃ વિરાટઃ ચ સાત્યકિઃ ચ અપરાજિતઃ ॥ ૧-૧૭॥

પરમ-ઇષુ-આસઃ કાશ્યઃ ચ, મહારથઃ શિખણ્ડી ચ
ધૃષ્ટદ્યુમ્નઃ વિરાટઃ ચ, અપરાજિતઃ સાત્યકિઃ ચ ।

દ્રુપદો દ્રૌપદેયાશ્ચ સર્વશઃ પૃથિવીપતે ।
સૌભદ્રશ્ચ મહાબાહુઃ શઙ્ખાન્દધ્મુઃ પૃથક્પૃથક્ ॥ ૧-૧૮॥

દ્રુપદઃ દ્રૌપદેયાઃ ચ સર્વશઃ પૃથિવી-પતે ।
સૌભદ્રઃ ચ મહા-બાહુઃ શઙ્ખાન્ દધ્મુઃ પૃથક્ પૃથક્ ॥ ૧-૧૮॥

દ્રુપદઃ દ્રૌપદેયાઃ ચ, મહા-બાહુઃ સૌભદ્રઃ ચ,
હે પૃથિવી-પતે! પૃથક્ પૃથક્ સર્વશઃ શઙ્ખાન્ દધ્મુઃ ।

સ ઘોષો ધાર્તરાષ્ટ્રાણાં હૃદયાનિ વ્યદારયત્ ।
નભશ્ચ પૃથિવીં ચૈવ તુમુલો વ્યનુનાદયન્ ॥ ૧-૧૯॥

સઃ ઘોષઃ ધાર્તરાષ્ટ્રાણામ્ હૃદયાનિ વ્યદારયત્ ।
નભઃ ચ પૃથિવીમ્ ચ એવ તુમુલઃ અભ્યનુનાદયન્ ॥ ૧-૧૯॥

સઃ તુમુલઃ ઘોષઃ નભઃ ચ પૃથિવીમ્ ચ એવ વ્યનુનાદયન્,
ધાર્ત્રરાષ્ટ્રાણામ્ હૃદયાનિ વ્યદારયત્ ।

અથ વ્યવસ્થિતાન્દૃષ્ટ્વા ધાર્ત્રરાષ્ટ્રાન્ કપિધ્વજઃ ।
પ્રવૃત્તે શસ્ત્રસમ્પાતે ધનુરુદ્યમ્ય પાણ્ડવઃ ॥ ૧-૨૦॥

હૃષીકેશં તદા વાક્યમિદમાહ મહીપતે ।

અથ વ્યવસ્થિતાન્ દૃષ્ટ્વા ધાર્ત્રરાષ્ટ્રાન્ કપિ-ધ્વજઃ ।
પ્રવૃત્તે શસ્ત્ર-સમ્પાતે ધનુઃ ઉદ્યમ્ય પાણ્ડવઃ ॥ ૧-૨૦॥

હૃષીકેશમ્ તદા વાક્યમ્ ઇદમ્ આહ મહીપતે ।

અથ કપિ-ધ્વજઃ પાણ્ડવઃ ધાર્ત્રરાષ્ટ્રાન્ વ્યવસ્થિતાન્ દૃષ્ટ્વા,
શસ્ત્ર-સમ્પાતે પ્રવૃત્તે (સતિ) ધનુઃ ઉદ્યમ્ય
હે મહીપતે! તદા હૃષીકેશમ્ ઇદમ્ વાક્યમ્ આહ ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

સેનયોરુભયોર્મધ્યે રથં સ્થાપય મેઽચ્યુત ॥ ૧-૨૧॥

સેનયોઃ ઉભયોઃ મધ્યે રથમ્ સ્થાપય મે અચ્યુત ॥ ૧-૨૧॥

હે અચ્યુત! ઉભયોઃ સેનયોઃ મધ્યે મે રથમ્ સ્થાપય ।

યાવદેતાન્નિરીક્ષેઽહં યોદ્ધુકામાનવસ્થિતાન્ ।
કૈર્મયા સહ યોદ્ધવ્યમસ્મિન્ રણસમુદ્યમે ॥ ૧-૨૨॥ ॥

યાવત્ એતાન્ નિરીક્ષે અહમ્ યોદ્ધુ-કામાન્ અવસ્થિતાન્ ।
કૈઃ મયા સહ યોદ્ધવ્યમ્ અસ્મિન્ રણ-સમુદ્યમે ॥ ૧-૨૨॥

યાવત્ અહમ્ યોદ્ધુ-કામાન્ અવસ્થિતાન્ એતાન્ નિરીક્ષે;
અસ્મિન્ રણ-સમુદ્યમે મયા કૈઃ સહ યોદ્ધવ્યમ્ ?

યોત્સ્યમાનાનવેક્ષેઽહં ય એતેઽત્ર સમાગતાઃ ।
ધાર્તરાષ્ટ્રસ્ય દુર્બુદ્ધેર્યુદ્ધે પ્રિયચિકીર્ષવઃ ॥ ૧-૨૩॥ ॥

યોત્સ્યમાનાન્ અવેક્ષે અહમ્ યે એતે અત્ર સમાગતાઃ ।
ધાર્તરાષ્ટ્રસ્ય દુર્બુદ્ધેઃ યુદ્ધે પ્રિય-ચિકીર્ષવઃ ॥ ૧-૨૩॥

દુર્બુદ્ધેઃ ધાર્તરાષ્ટ્રસ્ય યુદ્ધે પ્રિય-ચિકીર્ષવઃ
યે એતે અત્ર સમાગતાઃ યોત્સ્યમાનાન્ અહમ્ અવેક્ષે ।

સઞ્જય ઉવાચ ।
સઞ્જયઃ ઉવાચ ।

એવમુક્તો હૃષીકેશો ગુડાકેશેન ભારત ।
સેનયોરુભયોર્મધ્યે સ્થાપયિત્વા રથોત્તમમ્ ॥ ૧-૨૪॥

ભીષ્મદ્રોણપ્રમુખતઃ સર્વેષાં ચ મહીક્ષિતામ્ ।
ઉવાચ પાર્થ પશ્યૈતાન્સમવેતાન્કુરૂનિતિ ॥ ૧-૨૫॥

એવમ્ ઉક્તઃ હૃષીકેશઃ ગુડાકેશેન ભારત ।
સેનયોઃ ઉભયોઃ મધ્યે સ્થાપયિત્વા રથ-ઉત્તમમ્ ॥ ૧-૨૪॥

ભીષ્મ-દ્રોણ-પ્રમુખતઃ સર્વેષામ્ ચ મહી-ક્ષિતામ્ ।
ઉવાચ પાર્થ પશ્ય એતાન્ સમવેતાન્ કુરૂન્ ઇતિ ॥ ૧-૨૫॥

હે ભારત! એવમ્ ગુડાકેશેન ઉક્તઃ હૃષીકેશઃ, ઉભયોઃ સેનયોઃ મધ્યે,
ભીષ્મ-દ્રોણ-પ્રમુખતઃ સર્વેષામ્ ચ મહી-ક્ષિતામ્

રથ-ઉત્તમમ્ સ્થાપયિત્વા, હે 'પાર્થ! એતાન્ સમવેતાન્ કુરૂન્
પશ્ય', ઇતિ ઉવાચ ।

તત્રાપશ્યત્સ્થિતાન્પાર્થઃ પિતૄનથ પિતામહાન્ ।
આચાર્યાન્માતુલાન્ભ્રાતૄન્પુત્રાન્પૌત્રાન્સખીંસ્તથા ॥ ૧-૨૬॥

શ્વશુરાન્સુહૃદશ્ચૈવ સેનયોરુભયોરપિ ।
તાન્સમીક્ષ્ય સ કૌન્તેયઃ સર્વાન્બન્ધૂનવસ્થિતાન્ ॥ ૧-૨૭॥

કૃપયા પરયાવિષ્ટો વિષીદન્નિદમબ્રવીત્ ।

તત્ર અપશ્યત્ સ્થિતાન્ પાર્થઃ પિતૄન્ અથ પિતામહાન્ ।
આચાર્યાન્ માતુલાન્ ભ્રાતૄન્ પુત્રાન્ પૌત્રાન્ સખીન્ તથા ॥ ૧-૨૬॥

શ્વશુરાન્ સુહૃદઃ ચ એવ સેનયોઃ ઉભયોઃ અપિ ।
તાન્ સમીક્ષ્ય સઃ કૌન્તેયઃ સર્વાન્ બન્ધૂન્ અવસ્થિતાન્ ॥ ૧-૨૭॥

કૃપયા પરયાવિષ્ટઃ વિષીદન્ ઇદમ્ અબ્રવીત્ ।

અથ પાર્થઃ ઉભયોઃ સેનયોઃ અપિ, તત્ર સ્થિતાન્ પિતૄન્,
પિતામહાન્, આચાર્યાન્, માતુલાન્, ભ્રાતૄન્, પુત્રાન્,
પૌત્રાન્ તથા સખીન્, શ્વશુરાન્ સુહૃદઃ, ચ એવ અપશ્યત્ સઃ કૌન્તેયઃ ।
તાન્ સર્વાન્ બન્ધૂન્ અવસ્થિતાન્ સમીક્ષ્ય પરયા કૃપયા આવિષ્ટઃ,
વિષીદન્ ઇદમ્ અબ્રવીત્ ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

દૃષ્ટ્વેમં સ્વજનં કૃષ્ણ યુયુત્સું સમુપસ્થિતમ્ ॥ ૧-૨૮॥

સીદન્તિ મમ ગાત્રાણિ મુખં ચ પરિશુષ્યતિ ।
વેપથુશ્ચ શરીરે મે રોમહર્ષશ્ચ જાયતે ॥ ૧-૨૯॥

દૃષ્ટ્વા ઇમમ્ સ્વજનમ્ કૃષ્ણ યુયુત્સુમ્ સમુપસ્થિતમ્ ॥ ૧-૨૮॥

સીદન્તિ મમ ગાત્રાણિ મુખમ્ ચ પરિશુષ્યતિ ।
વેપથુઃ ચ શરીરે મે રોમ-હર્ષઃ ચ જાયતે ॥ ૧-૨૯॥

હે કૃષ્ણ! ઇમમ્ સ્વજનમ્ યુયુત્સુમ્ સમુપસ્થિતમ્ દૃષ્ટ્વા
મમ ગાત્રાણિ સીદન્તિ મુખમ્ ચ પરિશુષ્યતિ, મે શરીરે
વેપથુઃ ચ રોમ-હર્ષઃ ચ જાયતે ।

ગાણ્ડીવં સ્રંસતે હસ્તાત્ત્વક્ચૈવ પરિદહ્યતે ।
ન ચ શક્નોમ્યવસ્થાતું ભ્રમતીવ ચ મે મનઃ ॥ ૧-૩૦॥

ગાણ્ડીવમ્ સ્રંસતે હસ્તાત્ ત્વક્ ચ એવ પરિદહ્યતે ।
ન ચ શક્નોમિ અવસ્થાતુમ્ ભ્રમતિ ઇવ ચ મે મનઃ ॥ ૧-૩૦॥

હસ્તાત્ ગાણ્ડીવમ્ સ્રંસતે, ત્વક્ ચ એવ પરિદહ્યતે,
અવસ્થાતુમ્ ચ ન શક્નોમિ મે મનઃ ચ ભ્રમતિ ઇવ ।
નિમિત્તાનિ ચ પશ્યામિ વિપરીતાનિ કેશવ ।
ન ચ શ્રેયોઽનુપશ્યામિ હત્વા સ્વજનમાહવે ॥ ૧-૩૧॥

નિમિત્તાનિ ચ પશ્યામિ વિપરીતાનિ કેશવ ।
ન ચ શ્રેયઃ અનુપશ્યામિ હત્વા સ્વજનમ્ આહવે ॥ ૧-૩૧॥

હે કેશવ! નિમિત્તાનિ વિપરીતાનિ ચ પશ્યામિ । આહવે ચ સ્વજનમ્
હત્વા શ્રેયઃ ન અનુપશ્યામિ ।

ન કાઙ્ક્ષે વિજયં કૃષ્ણ ન ચ રાજ્યં સુખાનિ ચ ।
કિં નો રાજ્યેન ગોવિન્દ કિં ભોગૈર્જીવિતેન વા ॥ ૧-૩૨॥

ન કાઙ્ક્ષે વિજયમ્ કૃષ્ણ ન ચ રાજ્યમ્ સુખાનિ ચ ।
કિમ્ નઃ રાજ્યેન ગોવિન્દ કિમ્ ભોગૈઃ જીવિતેન વા ॥ ૧-૩૨॥

હે કૃષ્ણ! વિજયમ્ ન , રાજ્યમ્ ચ સુખાનિ ચ ન (કાઙ્ક્ષે)।
હે ગોવિન્દ! નઃ રાજ્યેન કિમ્ ભોગૈઃ જીવિતેન વા કિમ્ ?

યેષામર્થે કાઙ્ક્ષિતં નો રાજ્યં ભોગાઃ સુખાનિ ચ ।
ત ઇમેઽવસ્થિતા યુદ્ધે પ્રાણાંસ્ત્યક્ત્વા ધનાનિ ચ ॥ ૧-૩૩॥

આચાર્યાઃ પિતરઃ પુત્રાસ્તથૈવ ચ પિતામહાઃ ।
માતુલાઃ શ્વશુરાઃ પૌત્રાઃ શ્યાલાઃ સમ્બન્ધિનસ્તથા ॥ ૧-૩૪॥

યેષામ્ અર્થે કાઙ્ક્ષિતમ્ નઃ રાજ્યમ્ ભોગાઃ સુખાનિ ચ ।
તે ઇમે અવસ્થિતાઃ યુદ્ધે પ્રાણાન્ ત્યક્ત્વા ધનાનિ ચ ॥ ૧-૩૩॥

આચાર્યાઃ પિતરઃ પુત્રાઃ તથા એવ ચ પિતામહાઃ ।
માતુલાઃ શ્વશુરાઃ પૌત્રાઃ શ્યાલાઃ સમ્બન્ધિનઃ તથા ॥ ૧-૩૪॥

યેષામ્ અર્થે નઃ રાજ્યમ્ કાઙ્ક્ષિતમ્, ભોગાઃ સુખાનિ ચ;

તે ઇમે આચાર્યાઃ પિતરઃ પુત્રાઃ, તથા એવ ચ પિતામહાઃ,
માતુલાઃ, શ્વશુરાઃ, પૌત્રાઃ, શ્યાલાઃ, તથા સમ્બન્ધિનઃ પ્રાણાન્
ધનાનિ ચ ત્યક્ત્વા, યુદ્ધે અવસ્થિતાઃ ।

એતાન્ન હન્તુમિચ્છામિ ઘ્નતોઽપિ મધુસૂદન ।
અપિ ત્રૈલોક્યરાજ્યસ્ય હેતોઃ કિં નુ મહીકૃતે ॥ ૧-૩૫॥

એતાન્ ન હન્તુમ્ ઇચ્છામિ ઘ્નતઃ અપિ મધુસૂદન ।
અપિ ત્રૈલોક્ય-રાજ્યસ્ય હેતોઃ કિમ્ નુ મહીકૃતે ॥ ૧-૩૫॥

હે મધુસૂદન! (માં) ઘ્નતઃ અપિ એતાન્, ત્રૈલોક્ય-રાજ્યસ્ય હેતોઃ અપિ
ન હન્તુમ્ ઇચ્છામિ, કિમ્ નુ મહીકૃતે ?

નિહત્ય ધાર્તરાષ્ટ્રાન્નઃ કા પ્રીતિઃ સ્યાજ્જનાર્દન ।
પાપમેવાશ્રયેદસ્માન્હત્વૈતાનાતતાયિનઃ ॥ ૧-૩૬॥

નિહત્ય ધાર્તરાષ્ટ્રાન્ નઃ કા પ્રીતિઃ સ્યાત્ જનાર્દન ।
પાપમ્ એવ આશ્રયેત્ અસ્માન્ હત્વા એતાન્ આતતાયિનઃ ॥ ૧-૩૬॥

હે જનાર્દન! એતાન્ ધાર્તરાષ્ટ્રાન્ નિહત્ય નઃ કા પ્રીતિઃ
સ્યાત્ ? આતતાયિનઃ હત્વા અસ્માન્ પાપમ્ એવ આશ્રયેત્ ।

તસ્માન્નાર્હા વયં હન્તું ધાર્તરાષ્ટ્રાન્સ્વબાન્ધવાન્ ।
સ્વજનં હિ કથં હત્વા સુખિનઃ સ્યામ માધવ ॥ ૧-૩૭॥

તસ્માત્ ન અર્હાઃ વયમ્ હન્તુમ્ ધાર્તરાષ્ટ્રાન્ સ્વબાન્ધવાન્ ।
સ્વજનમ્ હિ કથમ્ હત્વા સુખિનઃ સ્યામ માધવ ॥ ૧-૩૭॥

હે માધવ! તસ્માત્ સ્વબાન્ધવાન્ ધાર્તરાષ્ટ્રાન્
હન્તુમ્ વયમ્ ન અર્હાઃ । હિ સ્વજનમ્ હત્વા (વયમ્) કથમ્
સુખિનઃ સ્યામ ?

યદ્યપ્યેતે ન પશ્યન્તિ લોભોપહતચેતસઃ ।
કુલક્ષયકૃતં દોષં મિત્રદ્રોહે ચ પાતકમ્ ॥ ૧-૩૮॥

કથં ન જ્ઞેયમસ્માભિઃ પાપાદસ્માન્નિવર્તિતુમ્ ।
કુલક્ષયકૃતં દોષં પ્રપશ્યદ્ભિર્જનાર્દન ॥ ૧-૩૯॥

યદિ અપિ એતે ન પશ્યન્તિ લોભ-ઉપહત-ચેતસઃ ।
કુલ-ક્ષય-કૃતમ્ દોષમ્ મિત્ર-દ્રોહે ચ પાતકમ્ ॥ ૧-૩૮॥

કથમ્ ન જ્ઞેયમ્ અસ્માભિઃ પાપાત્ અસ્માન્ નિવર્તિતુમ્ ।
કુલ-ક્ષય-કૃતમ્ દોષમ્ પ્રપશ્યદ્ભિઃ જનાર્દન ॥ ૧-૩૯॥

યદિ અપિ એતે લોભ-ઉપહત-ચેતસઃ કુલ-ક્ષય-કૃતમ્ દોષમ્,
મિત્ર-દ્રોહે ચ પાતકમ્ ન પશ્યન્તિ; હે જનાર્દન! કુલ-ક્ષય-કૃતમ્
દોષમ્ પ્રપશ્યદ્ભિઃ અસ્માભિઃ અસ્માત્ પાપાત્ નિવર્તિતુમ્ કથમ્ ન જ્ઞેયમ્ ?

કુલક્ષયે પ્રણશ્યન્તિ કુલધર્માઃ સનાતનાઃ ।
ધર્મે નષ્ટે કુલં કૃત્સ્નમધર્મોઽભિભવત્યુત ॥ ૧-૪૦॥

કુલ-ક્ષયે પ્રણશ્યન્તિ કુલ-ધર્માઃ સનાતનાઃ ।
ધર્મે નષ્ટે કુલમ્ કૃત્સ્નમ્ અધર્મઃ અભિભવતિ ઉત ॥ ૧-૪૦॥

કુલ-ક્ષયે સનાતનાઃ કુલ-ધર્માઃ પ્રણશ્યન્તિ, ઉત ધર્મે નષ્ટે
અધર્મઃ કૃત્સ્નમ્ કુલમ્ અભિભવતિ ।

અધર્માભિભવાત્કૃષ્ણ પ્રદુષ્યન્તિ કુલસ્ત્રિયઃ ।
સ્ત્રીષુ દુષ્ટાસુ વાર્ષ્ણેય જાયતે વર્ણસઙ્કરઃ ॥ ૧-૪૧॥

અધર્મ-અભિભવાત્ કૃષ્ણ પ્રદુષ્યન્તિ કુલ-સ્ત્રિયઃ ।
સ્ત્રીષુ દુષ્ટાસુ વાર્ષ્ણેય જાયતે વર્ણ-સઙ્કરઃ ॥ ૧-૪૧॥

હે કૃષ્ણ! અધર્મ-અભિભવાત્ કુલ-સ્ત્રિયઃ પ્રદુષ્યન્તિ ।
હે વાર્ષ્ણેય! સ્ત્રીષુ દુષ્ટાસુ વર્ણ-સઙ્કરઃ જાયતે ।

સઙ્કરો નરકાયૈવ કુલઘ્નાનાં કુલસ્ય ચ ।
પતન્તિ પિતરો હ્યેષાં લુપ્તપિણ્ડોદકક્રિયાઃ ॥ ૧-૪૨॥

સઙ્કરઃ નરકાય એવ કુલ-ઘ્નાનામ્ કુલસ્ય ચ ।
પતન્તિ પિતરઃ હિ એષામ્ લુપ્ત-પિણ્ડ-ઉદક-ક્રિયાઃ ॥ ૧-૪૨॥

સઙ્કરઃ કુલ-ઘ્નાનામ્ કુલસ્ય ચ નરકાય એવ (ભવતિ);
હિ એષામ્ પિતરઃ લુપ્ત-પિણ્ડ-ઉદક-ક્રિયાઃ (સન્તઃ) પતન્તિ ।

દોષૈરેતૈઃ કુલઘ્નાનાં વર્ણસઙ્કરકારકૈઃ ।
ઉત્સાદ્યન્તે જાતિધર્માઃ કુલધર્માશ્ચ શાશ્વતાઃ ॥ ૧-૪૩॥

દોષૈઃ એતૈઃ કુલ-ઘ્નાનામ્ વર્ણ-સઙ્કર-કારકૈઃ ।
ઉત્સાદ્યન્તે જાતિ-ધર્માઃ કુલ-ધર્માઃ ચ શાશ્વતાઃ ॥ ૧-૪૩॥

કુલ-ઘ્નાનામ્ એતૈઃ વર્ણ-સઙ્કર-કારકૈઃ દોષૈઃ શાશ્વતાઃ

જાતિ-ધર્માઃ કુલ-ધર્માઃ ચ ઉત્સાદ્યન્તે ।

ઉત્સન્નકુલધર્માણાં મનુષ્યાણાં જનાર્દન ।
નરકે નિયતં વાસો ભવતીત્યનુશુશ્રુમ ॥ ૧-૪૪॥

ઉત્સન્ન-કુલ-ધર્માણામ્ મનુષ્યાણામ્ જનાર્દન ।
નરકે અનિયતમ્ વાસઃ ભવતિ ઇતિ અનુશુશ્રુમ ॥ ૧-૪૪॥

હે જનાર્દન! ઉત્સન્ન-કુલ-ધર્માણામ્ મનુષ્યાણામ્
નરકે નિયતમ્ વાસઃ ભવતિ, ઇતિ અનુશુશ્રુમ ।

અહો બત મહત્પાપં કર્તું વ્યવસિતા વયમ્ ।
યદ્રાજ્યસુખલોભેન હન્તું સ્વજનમુદ્યતાઃ ॥ ૧-૪૫॥

અહો બત મહત્ પાપમ્ કર્તુમ્ વ્યવસિતા વયમ્ ।
યત્ રાજ્ય-સુખ-લોભેન હન્તુમ્ સ્વજનમ્ ઉદ્યતાઃ ॥ ૧-૪૫॥

અહો! બત, મહત્ પાપમ્ કર્તુમ્ વયમ્ વ્યવસિતાઃ યત્
રાજ્ય-સુખ-લોભેન સ્વજનમ્ હન્તુમ્ ઉદ્યતાઃ ।

યદિ મામપ્રતીકારમશસ્ત્રં શસ્ત્રપાણયઃ ।
ધાર્તરાષ્ટ્રા રણે હન્યુસ્તન્મે ક્ષેમતરં ભવેત્ ॥ ૧-૪૬॥

યદિ મામ્ અપ્રતીકારમ્ અશસ્ત્રમ્ શસ્ત્ર-પાણયઃ ।
ધાર્તરાષ્ટ્રાઃ રણે હન્યુઃ તત્ મે ક્ષેમતરમ્ ભવેત્ ॥ ૧-૪૬॥

યદિ શસ્ત્ર-પાણયઃ ધાર્તરાષ્ટ્રાઃ અશસ્ત્રમ્ અપ્રતીકારમ્
મામ્ રણે હન્યુઃ તત્ મે ક્ષેમતરમ્ ભવેત્ ।

સઞ્જય ઉવાચ ।
સઞ્જયઃ ઉવાચ ।

એવમુક્ત્વાર્જુનઃ સઙ્ખ્યે રથોપસ્થ ઉપાવિશત્ ।
વિસૃજ્ય સશરં ચાપં શોકસંવિગ્નમાનસઃ ॥ ૧-૪૭॥

એવમ્ ઉક્ત્વા અર્જુનઃ સઙ્ખ્યે રથ-ઉપસ્થે ઉપાવિશત્ ।
વિસૃજ્ય સશરમ્ ચાપં શોક-સંવિગ્ન-માનસઃ ॥ ૧-૪૭॥

સઙ્ખ્યે એવમ્ ઉક્ત્વા, શોક-સંવિગ્ન-માનસઃ અર્જુનઃ
સશરમ્ ચાપં વિસૃજ્ય, રથ-ઉપસ્થે ઉપાવિશત્ ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
અર્જુનવિષાદયોગો નામ પ્રથમોઽધ્યાયઃ ॥ ૧॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયાં યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદે
અર્જુન-વિષાદ-યોગઃ નામ પ્રથમઃ અધ્યાયઃ ॥ ૧॥

---

અથ દ્વિતીયોઽધ્યાયઃ । સાઙ્ખ્યયોગઃ ।
અથ દ્વિતીયઃ અધ્યાયઃ । સાઙ્ખ્ય-યોગઃ ।

સઞ્જય ઉવાચ ।
સઞ્જયઃ ઉવાચ ।

તં તથા કૃપયાવિષ્ટમશ્રુપૂર્ણાકુલેક્ષણમ્ ।
વિષીદન્તમિદં વાક્યમુવાચ મધુસૂદનઃ ॥ ૨-૧॥

તમ્ તથા કૃપયા આવિષ્ટમ્ અશ્રુ-પૂર્ણ-આકુલ-ઈક્ષણમ્ ।
વિષીદન્તમ્ ઇદમ્ વાક્યમ્ ઉવાચ મધુસૂદનઃ ॥ ૨-૧॥

તથા કૃપયા આવિષ્ટમ્ અશ્રુ-પૂર્ણ-આકુલ-ઈક્ષણમ્
વિષીદન્તમ્ તમ્ મધુસૂદનઃ ઇદમ્ વાક્યમ્ ઉવાચ ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

કુતસ્ત્વા કશ્મલમિદં વિષમે સમુપસ્થિતમ્ ।
અનાર્યજુષ્ટમસ્વર્ગ્યમકીર્તિકરમર્જુન ॥ ૨-૨॥

કુતઃ ત્વા કશ્મલમ્ ઇદમ્ વિષમે સમુપસ્થિતમ્ ।
અનાર્ય-જુષ્ટમ્ અસ્વર્ગ્યમ્ અકીર્તિકરમ્ અર્જુન ॥ ૨-૨॥

હે અર્જુન! અનાર્ય-જુષ્ટમ્ અસ્વર્ગ્યમ્ અકીર્તિકરમ્
ઇદમ્ કશ્મલમ્ વિષમે ત્વા કુતઃ સમુપસ્થિતમ્ ?

ક્લૈબ્યં મા સ્મ ગમઃ પાર્થ નૈતત્ત્વય્યુપપદ્યતે ।
ક્ષુદ્રં હૃદયદૌર્બલ્યં ત્યક્ત્વોત્તિષ્ઠ પરન્તપ ॥ ૨-૩॥

ક્લૈબ્યમ્ મા સ્મ ગમઃ પાર્થ ન એતત્ ત્વયિ ઉપપદ્યતે ।

ક્ષુદ્રમ્ હૃદય-દૌર્બલ્યમ્ ત્યક્ત્વા ઉત્તિષ્ઠ પરન્તપ ॥ ૨-૩॥

હે પાર્થ! ક્લૈબ્યમ્ મા સ્મ ગમઃ । એતત્ ત્વયિ ન ઉપપદ્યતે ।
હે પરન્તપ! ક્ષુદ્રમ્ હૃદય-દૌર્બલ્યમ્ ત્યક્ત્વા ઉત્તિષ્ઠ ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

કથં ભીષ્મમહં સઙ્ખ્યે દ્રોણં ચ મધુસૂદન ।
ઇષુભિઃ પ્રતિયોત્સ્યામિ પૂજાર્હાવરિસૂદન ॥ ૨-૪॥

કથમ્ ભીષ્મમ્ અહમ્ સઙ્ખ્યે દ્રોણમ્ ચ મધુસૂદન ।
ઇષુભિઃ પ્રતિયોત્સ્યામિ પૂજા-અર્હૌ અરિ-સૂદન ॥ ૨-૪॥

હે મધુસૂદન! અહમ્ ભીષ્મમ્ દ્રોણમ્ ચ સઙ્ખ્યે ઇષુભિઃ કથમ્
પ્રતિયોત્સ્યામિ? અરિ-સૂદન! (એતૌ) પૂજા-અર્હૌ ।

ગુરૂનહત્વા હિ મહાનુભાવાન્
    શ્રેયો ભોક્તું ભૈક્ષ્યમપીહ લોકે ।
હત્વાર્થકામાંસ્તુ ગુરૂનિહૈવ
    ભુઞ્જીય ભોગાન્ રુધિરપ્રદિગ્ધાન્ ॥ ૨-૫॥

ગુરૂન્ અહત્વા હિ મહાનુભાવાન્
    શ્રેયઃ ભોક્તુમ્ ભૈક્ષ્યમ્ અપિ ઇહ લોકે ।
હત્વા અર્થ-કામાન્ તુ ગુરૂન્ ઇહ એવ
    ભુઞ્જીય ભોગાન્ રુધિર-પ્રદિગ્ધાન્ ॥ ૨-૫॥

હિ મહાનુભાવાન્ ગુરૂન્ અહત્વા, ઇહ લોકે ભૈક્ષ્યમ્ ભોક્તુમ્
અપિ શ્રેયઃ । ગુરૂન્ હત્વા તુ ઇહ એવ રુધિર-પ્રદિગ્ધાન્
અર્થ-કામાન્ ભોગાન્ ભુઞ્જીય ।

ન ચૈતદ્વિદ્મઃ કતરન્નો ગરીયો
    યદ્વા જયેમ યદિ વા નો જયેયુઃ ।
યાનેવ હત્વા ન જિજીવિષામ-
    સ્તેઽવસ્થિતાઃ પ્રમુખે ધાર્તરાષ્ટ્રાઃ ॥ ૨-૬॥

ન ચ એતત્ વિદ્મઃ કતરત્ નઃ ગરીયઃ
    યત્ વા જયેમ યદિ વા નઃ જયેયુઃ ।
યાન્ એવ હત્વા ન જિજીવિષામઃ

તે અવસ્થિતાઃ પ્રમુખે ધાર્તરાષ્ટ્રાઃ ॥ ૨-૬॥

નઃ કતરત્ ગરીયઃ? યત્ વા (વયં) જયેમ, યદિ વા (તે)
નઃ જયેયુઃ, એતત્ ચ ન વિદ્મઃ । યાન્ હત્વા ન જિજીવિષામઃ,
તે એવ ધાર્તરાષ્ટ્રાઃ પ્રમુખે અવસ્થિતાઃ ।

કાર્પણ્યદોષોપહતસ્વભાવઃ
પૃચ્છામિ ત્વાં ધર્મસમ્મૂઢચેતાઃ ।
યચ્છ્રેયઃ સ્યાન્નિશ્ચિતં બ્રૂહિ તન્મે
શિષ્યસ્તેઽહં શાધિ માં ત્વાં પ્રપન્નમ્ ॥ ૨-૭॥

કાર્પણ્ય-દોષ-ઉપહત-સ્વભાવઃ
પૃચ્છામિ ત્વામ્ ધર્મ-સમ્મૂઢ-ચેતાઃ ।
યત્ શ્રેયઃ સ્યાત્ નિશ્ચિતમ્ બ્રૂહિ તત્ મે
શિષ્યઃ તે અહમ્ શાધિ મામ્ ત્વામ્ પ્રપન્નમ્ ॥ ૨-૭॥

કાર્પણ્ય-દોષ-ઉપહત-સ્વભાવઃ ધર્મ-સમ્મૂઢ-ચેતાઃ (અહં)
ત્વામ્ પૃચ્છામિ । યત્ નિશ્ચિતમ્ શ્રેયઃ સ્યાત્, તત્ મે બ્રૂહિ ।
અહમ્ તે શિષ્યઃ । ત્વામ્ પ્રપન્નમ્ મામ્ શાધિ ।

ન હિ પ્રપશ્યામિ મમાપનુદ્યાદ્
યચ્છોકમુચ્છોષણમિન્દ્રિયાણામ્ ।
અવાપ્ય ભૂમાવસપત્નમૃદ્ધં
રાજ્યં સુરાણામપિ ચાધિપત્યમ્ ॥ ૨-૮॥

ન હિ પ્રપશ્યામિ મમ અપનુદ્યાત્
યત્ શોકમ્ ઉચ્છોષણમ્ ઇન્દ્રિયાણામ્ ।
અવાપ્ય ભૂમૌ અસપત્નમ્ ઋદ્ધમ્
રાજ્યમ્ સુરાણામ્ અપિ ચ આધિપત્યમ્ ॥ ૨-૮॥

હિ ભૂમૌ અસપત્નમ્ ઋદ્ધમ્ રાજ્યમ્ અવાપ્ય , સુરાણામ્ ચ અપિ
આધિપત્યમ્, યત્ મમ ઇન્દ્રિયાણામ્ ઉચ્છોષણમ્ શોકમ્
અપનુદ્યાત્ ન પ્રપશ્યામિ ।

સઞ્જય ઉવાચ ।
સઞ્જયઃ ઉવાચ ।

એવમુક્ત્વા હૃષીકેશં ગુડાકેશઃ પરન્તપઃ ।

ન યોત્સ્ય ઇતિ ગોવિન્દમુક્ત્વા તૂષ્ણીં બભૂવ હ ॥ ૨-૯॥

એવમ્ ઉક્ત્વા હૃષીકેશમ્ ગુડાકેશઃ પરન્તપઃ ।
ન યોત્સ્યે ઇતિ ગોવિન્દમ્ ઉક્ત્વા તૂષ્ણીમ્ બભૂવ હ ॥ ૨-૯॥

પરન્તપઃ ગુડાકેશઃ હૃષીકેશમ્ એવમ્ ઉક્ત્વા 'ન યોત્સ્યે'
ઇતિ ગોવિન્દમ્ ઉક્ત્વા તૂષ્ણીમ્ બભૂવ હ ।

તમુવાચ હૃષીકેશઃ પ્રહસન્નિવ ભારત ।
સેનયોરુભયોર્મધ્યે વિષીદન્તમિદં વચઃ ॥ ૨-૧૦॥

તમ્ ઉવાચ હૃષીકેશઃ પ્રહસન્ ઇવ ભારત ।
સેનયોઃ ઉભયોઃ મધ્યે વિષીદન્તમ્ ઇદમ્ વચઃ ॥ ૨-૧૦॥

હે ભારત! ઉભયોઃ સેનયોઃ મધ્યે વિષીદન્તમ્ (અર્જુનં) તમ્
હૃષીકેશઃ પ્રહસન્ ઇવ ઇદમ્ વચઃ ઉવાચ ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

અશોચ્યાનન્વશોચસ્ત્વં પ્રજ્ઞાવાદાંશ્ચ ભાષસે ।
ગતાસૂનગતાસૂંશ્ચ નાનુશોચન્તિ પણ્ડિતાઃ ॥ ૨-૧૧॥

અશોચ્યાન્ અન્વશોચઃ ત્વમ્ પ્રજ્ઞા-વાદા ચ ભાષસે ।
ગતાસૂન્ અગતાસૂન્ ચ ન અનુશોચન્તિ પણ્ડિતાઃ ॥ ૨-૧૧॥

ત્વમ્ અશોચ્યાન્ અન્વશોચઃ । પ્રજ્ઞા-વાદાન્ ચ ભાષસે ।
પણ્ડિતાઃ ગતાસૂન્ અગતાસૂન્ ચ ન અનુશોચન્તિ ।

ન ત્વેવાહં જાતુ નાસં ન ત્વં નેમે જનાધિપાઃ ।
ન ચૈવ ન ભવિષ્યામઃ સર્વે વયમતઃ પરમ્ ॥ ૨-૧૨॥

ન તુ એવ અહમ્ જાતુ ન આસમ્ ન ત્વમ્ ન ઇમે જનાધિપાઃ ।
ન ચ એવ ન ભવિષ્યામઃ સર્વે વયમ્ અતઃ પરમ્ ॥ ૨-૧૨॥

અહમ્ જાતુ ન આસમ્ (ઇતિ) ન તુ એવ, ત્વમ્ (જાતુ ન આસીઃ ઇતિ)ન,
ઇમે જનાધિપાઃ (જાતુ ન આસન્ ઇતિ) ન, ।
અતઃ પરમ્ ચ વયમ્ સર્વે ન ભવિષ્યામઃ (ઇતિ) ન એવ ।

દેહિનોઽસ્મિન્યથા દેહે કૌમારં યૌવનં જરા ।
તથા દેહાન્તરપ્રાપ્તિર્ધીરસ્તત્ર ન મુહ્યતિ ॥ ૨-૧૩॥

દેહિનઃ અસ્મિન્ યથા દેહે કૌમારમ્ યૌવનમ્ જરા ।
તથા દેહાન્તર-પ્રાપ્તિઃ ધીરઃ તત્ર ન મુહ્યતિ ॥ ૨-૧૩॥

દેહિનઃ અસ્મિન્ દેહે યથા કૌમારમ્ યૌવનમ્ જરા, તથા
દેહાન્તર-પ્રાપ્તિઃ । તત્ર ધીરઃ ન મુહ્યતિ ।

માત્રાસ્પર્શાસ્તુ કૌન્તેય શીતોષ્ણસુખદુઃખદાઃ ।
આગમાપાયિનોઽનિત્યાસ્તાંસ્તિતિક્ષસ્વ ભારત ॥ ૨-૧૪॥

માત્રા-સ્પર્શાઃ તુ કૌન્તેય શીત-ઉષ્ણ-સુખ-દુઃખ-દાઃ ।
આગમ અપાયિનઃ અનિત્યાઃ । ભારત તાન્ તિતિક્ષસ્વ ॥ ૨-૧૪॥

હે કૌન્તેય! માત્રા-સ્પર્શાઃ તુ શીત-ઉષ્ણ-સુખ-દુઃખ-દાઃ,
આગમ અપાયિનઃ, અનિત્યાઃ । હે ભારત! તાન્ તિતિક્ષસ્વ ।

યં હિ ન વ્યથયન્ત્યેતે પુરુષં પુરુષર્ષભ ।
સમદુઃખસુખં ધીરં સોઽમૃતત્વાય કલ્પતે ॥ ૨-૧૫॥

યમ્ હિ ન વ્યથયન્તિ એતે પુરુષમ્ પુરુષ-ઋષભ ।
સમ-દુઃખ-સુખમ્ ધીરમ્ સઃ અમૃતત્વાય કલ્પતે ॥ ૨-૧૫॥

હે પુરુષ-ઋષભ! હિ યમ્ સમ-દુઃખ-સુખમ્ ધીરમ્ પુરુષમ્
એતે ન વ્યથયન્તિ, સઃ અમૃતત્વાય કલ્પતે ।

નાસતો વિદ્યતે ભાવો નાભાવો વિદ્યતે સતઃ ।
ઉભયોરપિ દૃષ્ટોઽન્તસ્ત્વનયોસ્તત્ત્વદર્શિભિઃ ॥ ૨-૧૬॥

ન અસતઃ વિદ્યતે ભાવઃ ન અભાવઃ વિદ્યતે સતઃ ।
ઉભયોઃ અપિ દૃષ્ટઃ અન્તઃ તુ અનયોઃ તત્ત્વ-દર્શિભિઃ ॥ ૨-૧૬॥

અસતઃ ભાવઃ ન વિદ્યતે સતઃ અભાવઃ ન વિદ્યતે । તત્ત્વ-દર્શિભિઃ તુ
ઉભયોઃ અપિ અનયોઃ અન્તઃ દૃષ્ટઃ ।

અવિનાશિ તુ તદ્વિદ્ધિ યેન સર્વમિદં તતમ્ ।
વિનાશમવ્યયસ્યાસ્ય ન કશ્ચિત્કર્તુમર્હતિ ॥ ૨-૧૭॥

અવિનાશિ તુ તત્ વિદ્ધિ યેન સર્વમ્ ઇદમ્ તતમ્ ।
વિનાશમ્ અવ્યયસ્ય અસ્ય ન કશ્ચિત્ કર્તુમ્ અર્હતિ ॥ ૨-૧૭॥

વિદ્ધિ, યેન ઇદમ્ સર્વમ્ તતમ્, તત્ તુ અવિનાશિ । અસ્ય

અવ્યયસ્ય વિનાશમ્ કર્તુમ્, કશ્ચિત્ ન અર્હતિ ।

અન્તવન્ત ઇમે દેહા નિત્યસ્યોક્તાઃ શરીરિણઃ ।
અનાશિનોઽપ્રમેયસ્ય તસ્માદ્યુધ્યસ્વ ભારત ॥ ૨-૧૮॥

અન્તવન્તઃ ઇમે દેહાઃ નિત્યસ્ય ઉક્તાઃ શરીરિણઃ ।
અનાશિનઃ અપ્રમેયસ્ય તસ્માત્ યુધ્યસ્વ ભારત ॥ ૨-૧૮॥

અનાશિનઃ અપ્રમેયસ્ય નિત્યસ્ય શરીરિણઃ ઇમે દેહાઃ અન્તવન્તઃ
ઉક્તાઃ । હે ભારત! તસ્માત્ યુધ્યસ્વ ।

ય એનં વેત્તિ હન્તારં યશ્ચૈનં મન્યતે હતમ્
ઉભૌ તૌ ન વિજાનીતો નાયં હન્તિ ન હન્યતે ॥ ૨-૧૯॥

યઃ એનમ્ વેત્તિ હન્તારમ્ યઃ ચ એનમ્ મન્યતે હતમ્
ઉભૌ તૌ ન વિજાનીતઃ ન અયમ્ હન્તિ ન હન્યતે ॥ ૨-૧૯॥

યઃ એનમ્ હન્તારમ્ વેત્તિ, યઃ ચ એનમ્ હતમ્ મન્યતે તૌ ઉભૌ
ન વિજાનીતઃ, અયમ્ ન હન્તિ ન હન્યતે ।

ન જાયતે મ્રિયતે વા કદાચિન્
    નાયં ભૂત્વા ભવિતા વા ન ભૂયઃ ।
અજો નિત્યઃ શાશ્વતોઽયં પુરાણો
    ન હન્યતે હન્યમાને શરીરે ॥ ૨-૨૦॥

ન જાયતે મ્રિયતે વા કદાચિત્
    ન અયમ્ ભૂત્વા અભવિતા વા ન ભૂયઃ ।
અજઃ નિત્યઃ શાશ્વતઃ અયમ્ પુરાણઃ
    ન હન્યતે હન્યમાને શરીરે ॥ ૨-૨૦॥

અયમ્ કદાચિત્ ન જાયતે, ન વા મ્રિયતે, (અયમ્) ભૂત્વા ભૂયઃ
અભવિતા વા ન। અયમ્ અજઃ નિત્યઃ શાશ્વતઃ પુરાણઃ, શરીરે
હન્યમાને ન હન્યતે ।

વેદાવિનાશિનં નિત્યં ય એનમજમવ્યયમ્ ।
કથં સ પુરુષઃ પાર્થ કં ઘાતયતિ હન્તિ કમ્ ॥ ૨-૨૧॥

વેદ અવિનાશિનમ્ નિત્યમ્ યઃ એનમ્ અજમ્ અવ્યયમ્ ।
કથમ્ સઃ પુરુષઃ પાર્થ કમ્ ઘાતયતિ હન્તિ કમ્ ॥ ૨-૨૧॥

હે પાર્થ! યઃ એનમ્ અવિનાશિનમ્ નિત્યમ્ અજમ્ અવ્યયમ્ વેદ,
સઃ પુરુષઃ કથમ્ કમ્ ઘાતયતિ, કમ્ હન્તિ ?

વાસાંસિ જીર્ણાનિ યથા વિહાય
    નવાનિ ગૃહ્ણાતિ નરોઽપરાણિ ।
તથા શરીરાણિ વિહાય જીર્ણા-
    ન્યન્યાનિ સંયાતિ નવાનિ દેહી ॥ ૨-૨૨॥

વાસાંસિ જીર્ણાનિ યથા વિહાય
    નવાનિ ગૃહ્ણાતિ નરઃ અપરાણિ ।
તથા શરીરાણિ વિહાય જીર્ણાનિ
    અન્યાનિ સંયાતિ નવાનિ દેહી ॥ ૨-૨૨॥

યથા નરઃ જીર્ણાનિ વાસાંસિ વિહાય, અપરાણિ નવાનિ ગૃહ્ણાતિ,
તથા દેહી જીર્ણાનિ શરીરાણિ વિહાય અન્યાનિ નવાનિ સંયાતિ ।

નૈનં છિન્દન્તિ શસ્ત્રાણિ નૈનં દહતિ પાવકઃ ।
ન ચૈનં ક્લેદયન્ત્યાપો ન શોષયતિ મારુતઃ ॥ ૨-૨૩॥

ન એનમ્ છિન્દન્તિ શસ્ત્રાણિ ન એનમ્ દહતિ પાવકઃ ।
ન ચ એનમ્ ક્લેદયન્તિ આપઃ ન શોષયતિ મારુતઃ ॥ ૨-૨૩॥

એનમ્ શસ્ત્રાણિ ન છિન્દન્તિ, એનમ્ પાવકઃ ન દહતિ
એનમ્ આપઃ ન ક્લેદયન્તિ, (એનમ્) ચ મારુતઃ ન શોષયતિ ।

અચ્છેદ્યોઽયમદાહ્યોઽયમક્લેદ્યોઽશોષ્ય એવ ચ ।
નિત્યઃ સર્વગતઃ સ્થાણુરચલોઽયં સનાતનઃ ॥ ૨-૨૪॥

અચ્છેદ્યઃ અયમ્ અદાહ્યઃ અયમ્ અક્લેદ્યઃ અશોષ્યઃ એવ ચ ।
નિત્યઃ સર્વગતઃ સ્થાણુઃ અચલઃ અયમ્ સનાતનઃ ॥ ૨-૨૪॥

અયમ્ અચ્છેદ્યઃ, અયમ્ અદાહ્યઃ, અયમ્ અક્લેદ્યઃ, (અયમ્)
અશોષ્યઃ ચ એવ । અયમ્ નિત્યઃ, સર્વગતઃ, સ્થાણુઃ, અચલઃ, સનાતનઃ ।

અવ્યક્તોઽયમચિન્ત્યોઽયમવિકાર્યોઽયમુચ્યતે ।
તસ્માદેવં વિદિત્વૈનં નાનુશોચિતુમર્હસિ ॥ ૨-૨૫॥

અવ્યક્તઃ અયમ્ અચિન્ત્યઃ અયમ્ અવિકાર્યઃ અયમ્ ઉચ્યતે ।
તસ્માત્ એવમ્ વિદિત્વા એનમ્ ન અનુશોચિતુમ્ અર્હસિ ॥ ૨-૨૫॥

અયમ્ અવ્યક્તઃ, અયમ્ અચિન્ત્યઃ, અયમ્ અવિકાર્યઃ ઉચ્યતે ।
તસ્માત્ એનમ્ એવમ્ વિદિત્વા (ત્વં) અનુશોચિતુમ્ ન અર્હસિ ।

અથ ચૈનં નિત્યજાતં નિત્યં વા મન્યસે મૃતમ્ ।
તથાપિ ત્વં મહાબાહો નૈનં શોચિતુમર્હસિ ॥ ૨-૨૬॥

અથ ચ એનમ્ નિત્ય-જાતમ્ નિત્યમ્ વા મન્યસે મૃતમ્ ।
તથા અપિ ત્વમ્ મહા-બાહો ન એનમ્ શોચિતુમ્ અર્હસિ ॥ ૨-૨૬॥

અથ ચ એનમ્ નિત્ય-જાતમ્, નિત્યમ્ વા મૃતમ્ મન્યસે ,
તથા અપિ હે મહા-બાહો! ત્વમ્ એનમ્ શોચિતુમ્ ન અર્હસિ ।

જાતસ્ય હિ ધ્રુવો મૃત્યુર્ધ્રુવં જન્મ મૃતસ્ય ચ ।
તસ્માદપરિહાર્યેઽર્થે ન ત્વં શોચિતુમર્હસિ ॥ ૨-૨૭॥

જાતસ્ય હિ ધ્રુવઃ મૃત્યુઃ ધ્રુવમ્ જન્મ મૃતસ્ય ચ ।
તસ્માત્ અપરિહાર્યે અર્થે ન ત્વમ્ શોચિતુમ્ અર્હસિ ॥ ૨-૨૭॥

હિ જાતસ્ય મૃત્યુઃ ધ્રુવઃ, મૃતસ્ય ચ જન્મ ધ્રુવમ્,
તસ્માત્ અપરિહાર્યે અર્થે ત્વમ્ શોચિતુમ્ ન અર્હસિ ।

અવ્યક્તાદીનિ ભૂતાનિ વ્યક્તમધ્યાનિ ભારત ।
અવ્યક્તનિધનાન્યેવ તત્ર કા પરિદેવના ॥ ૨-૨૮॥

અવ્યક્ત-આદીનિ ભૂતાનિ વ્યક્ત-મધ્યાનિ ભારત ।
અવ્યક્ત-નિધનાનિ એવ તત્ર કા પરિદેવના ॥ ૨-૨૮॥

હે ભારત! ભૂતાનિ અવ્યક્ત-આદીનિ વ્યક્ત-મધ્યાનિ અવ્યક્ત-નિધનાનિ એવ,
તત્ર પરિદેવના કા?

આશ્ચર્યવત્પશ્યતિ કશ્ચિદેન્-
માશ્ચર્યવદ્વદતિ તથૈવ ચાન્યઃ ।
આશ્ચર્યવચ્ચૈનમન્યઃ શ‍ૃણોતિ
શ્રુત્વાપ્યેનં વેદ ન ચૈવ કશ્ચિત્ ॥ ૨-૨૯॥

આશ્ચર્યવત્ પશ્યતિ કશ્ચિત્ એનમ્
આશ્ચર્યવત્ વદતિ તથા એવ ચ અન્યઃ ।
આશ્ચર્યવત્ ચ એનમ્ અન્યઃ શ‍ૃણોતિ
શ્રુત્વા અપિ એનમ્ વેદ ન ચ એવ કશ્ચિત્ ॥ ૨-૨૯॥

કશ્ચિત્ એનમ્ આશ્ચર્યવત્ પશ્યતિ, તથા એવ ચ અન્યઃ
એનમ્ આશ્ચર્યવત્ વદતિ, અન્યઃ ચ એનમ્ આશ્ચર્યવત્ શ ૃણોતિ;
શ્રુત્વા અપિ ચ કશ્ચિત્ એવ ન વેદ ।

દેહી નિત્યમવધ્યોઽયં દેહે સર્વસ્ય ભારત ।
તસ્માત્સર્વાણિ ભૂતાનિ ન ત્વં શોચિતુમર્હસિ ॥ ૨-૩૦॥

દેહી નિત્યમ્ અવધ્યઃ અયમ્ દેહે સર્વસ્ય ભારત ।
તસ્માત્ સર્વાણિ ભૂતાનિ ન ત્વમ્ શોચિતુમ્ અર્હસિ ॥ ૨-૩૦॥

હે ભારત! સર્વસ્ય દેહે અયમ્ દેહી નિત્યમ્ અવધ્યઃ; તસ્માત્
ત્વમ્ સર્વાણિ ભૂતાનિ શોચિતુમ્ ન અર્હસિ ।

સ્વધર્મમપિ ચાવેક્ષ્ય ન વિકમ્પિતુમર્હસિ ।
ધર્મ્યાદ્ધિ યુદ્ધાચ્છ્રેયોઽન્યત્ક્ષત્રિયસ્ય ન વિદ્યતે ॥ ૨-૩૧॥

સ્વધર્મમ્ અપિ ચ અવેક્ષ્ય ન વિકમ્પિતુમ્ અર્હસિ ।
ધર્મ્યાત્ હિ યુદ્ધાત્ શ્રેયઃ અન્યત્ ક્ષત્રિયસ્ય ન વિદ્યતે ॥ ૨-૩૧॥

સ્વધર્મમ્ ચ અપિ અવેક્ષ્ય વિકમ્પિતુમ્ ન અર્હસિ । હિ ક્ષત્રિયસ્ય
ધર્મ્યાત્ યુદ્ધાત્ અન્યત્ શ્રેયઃ ન વિદ્યતે ।

યદૃચ્છયા ચોપપન્નં સ્વર્ગદ્વારમપાવૃતમ્ ।
સુખિનઃ ક્ષત્રિયાઃ પાર્થ લભન્તે યુદ્ધમીદૃશમ્ ॥ ૨-૩૨॥

યત્ ઋચ્છયા ચ ઉપપન્નં સ્વર્ગ-દ્વારમ્ અપાવૃતમ્ ।
સુખિનઃ ક્ષત્રિયાઃ પાર્થ લભન્તે યુદ્ધમ્ ઈદૃશમ્ ॥ ૨-૩૨॥

હે પાર્થ! યત્ ઋચ્છયા ચ ઉપપન્નમ્ ઈદૃશમ્ અપાવૃતમ્
સ્વર્ગ-દ્વારમ્ યુદ્ધમ્ સુખિનઃ ક્ષત્રિયાઃ લભન્તે ।

અથ ચેત્ત્વમિમં ધર્મ્યં સંગ્રામં ન કરિષ્યસિ ।
તતઃ સ્વધર્મં કીર્તિં ચ હિત્વા પાપમવાપ્સ્યસિ ॥ ૨-૩૩॥

અથ ચેત્ ત્વમ્ ઇમમ્ ધર્મ્યમ્ સઙ્ગ્રામમ્ ન કરિષ્યસિ ।
તતઃ સ્વધર્મમ્ કીર્તિમ્ ચ હિત્વા પાપમ્ અવાપ્સ્યસિ ॥ ૨-૩૩॥

અથ ત્વમ્ ઇમમ્ ધર્મ્યમ્ સઙ્ગ્રામમ્ ન કરિષ્યસિ ચેત્, તતઃ
સ્વધર્મમ્ કીર્તિમ્ ચ હિત્વા પાપમ્ અવાપ્સ્યસિ ।

અકીર્તિં ચાપિ ભૂતાનિ કથયિષ્યન્તિ તેઽવ્યયામ્ ।

સમ્ભાવિતસ્ય ચાકીર્તિર્મરણાદતિરિચ્યતે ॥ ૨-૩૪॥

અકીર્તિમ્ ચ અપિ ભૂતાનિ કથયિષ્યન્તિ તે અવ્યયામ્ ।
સમ્ભાવિતસ્ય ચ અકીર્તિઃ મરણાત્ અતિરિચ્યતે ॥ ૨-૩૪॥

અપિ ચ ભૂતાનિ તે અવ્યયામ્ અકીર્તિમ્ કથયિષ્યન્તિ ।
સમ્ભાવિતસ્ય ચ અકીર્તિઃ મરણાત્ અતિરિચ્યતે ।

ભયાદ્રણાદુપરતં મંસ્યન્તે ત્વાં મહારથાઃ ।
યેષાં ચ ત્વં બહુમતો ભૂત્વા યાસ્યસિ લાઘવમ્ ॥ ૨-૩૫॥

ભયાત્ રણાત્ ઉપરતમ્ મંસ્યન્તે ત્વામ્ મહારથાઃ ।
યેષામ્ ચ ત્વમ્ બહુ-મતઃ ભૂત્વા યાસ્યસિ લાઘવમ્ ॥ ૨-૩૫॥

મહારથાઃ ત્વામ્ ભયાત્ રણાત્ ઉપરતમ્ મંસ્યન્તે;
યેષામ્ ચ ત્વમ્ બહુ-મતઃ ભૂત્વા, લાઘવમ્ યાસ્યસિ ।

અવાચ્યવાદાંશ્ચ બહૂન્વદિષ્યન્તિ તવાહિતાઃ ।
નિન્દન્તસ્તવ સામર્થ્યં તતો દુઃખતરં નુ કિમ્ ॥ ૨-૩૬॥

અવાચ્ય-વાદાન્ ચ બહૂન્ વદિષ્યન્તિ તવ અહિતાઃ ।
નિન્દન્તઃ તવ સામર્થ્યમ્ તતઃ દુઃખતરમ્ નુ કિમ્ ॥ ૨-૩૬॥

તવ સામર્થ્યમ્ નિન્દન્તઃ તવ અહિતાઃ ચ બહૂન્ અવાચ્ય-વાદાન્
વદિષ્યન્તિ । તતઃ કિમ્ નુ દુઃખતરમ્?

હતો વા પ્રાપ્સ્યસિ સ્વર્ગં જિત્વા વા ભોક્ષ્યસે મહીમ્ ।
તસ્માદુત્તિષ્ઠ કૌન્તેય યુદ્ધાય કૃતનિશ્ચયઃ ॥ ૨-૩૭॥

હતઃ વા પ્રાપ્સ્યસિ સ્વર્ગમ્ જિત્વા વા ભોક્ષ્યસે મહીમ્ ।
તસ્માત્ ઉત્તિષ્ઠ કૌન્તેય યુદ્ધાય કૃત-નિશ્ચયઃ ॥ ૨-૩૭॥

હતઃ વા સ્વર્ગમ્ પ્રાપ્સ્યસિ, જિત્વા વા મહીમ્ ભોક્ષ્યસે ।
હે કૌન્તેય! તસ્માત્ યુદ્ધાય કૃત-નિશ્ચયઃ ઉત્તિષ્ઠ ।

સુખદુઃખે સમે કૃત્વા લાભાલાભૌ જયાજયૌ ।
તતો યુદ્ધાય યુજ્યસ્વ નૈવં પાપમવાપ્સ્યસિ ॥ ૨-૩૮॥

સુખ-દુઃખે સમે કૃત્વા લાભ-અલાભૌ જય-અજયૌ ।
તતઃ યુદ્ધાય યુજ્યસ્વ ન એવમ્ પાપમ્ અવાપ્સ્યસિ ॥ ૨-૩૮॥

સુખ-દુઃખે લાભ-અલાભૌ જય-અજયૌ સમે કૃત્વા તતઃ યુદ્ધાય યુજ્યસ્વ ।
એવમ્ પાપમ્ ન અવાપ્સ્યસિ ।

એષા તેઽભિહિતા સાઙ્ખ્યે બુદ્ધિર્યોગે ત્વિમાં શ‍ૃણુ ।
બુદ્ધ્યા યુક્તો યયા પાર્થ કર્મબન્ધં પ્રહાસ્યસિ ॥ ૨-૩૯॥

એષા તે અભિહિતા સાઙ્ખ્યે બુદ્ધિઃ યોગે તુ ઇમામ્ શ‍ૃણુ ।
બુદ્ધ્યા યુક્તઃ યયા પાર્થ કર્મ-બન્ધમ્ પ્રહાસ્યસિ ॥ ૨-૩૯॥

હે પાર્થ! એષા તે સાઙ્ખ્યે બુદ્ધિઃ અભિહિતા; યોગે તુ ઇમામ્ (બુદ્ધિં)
શ‍ૃણુ । યયા બુદ્ધ્યા યુક્તઃ (ત્વં) કર્મ-બન્ધમ્ પ્રહાસ્યસિ ।

નેહાભિક્રમનાશોઽસ્તિ પ્રત્યવાયો ન વિદ્યતે ।
સ્વલ્પમપ્યસ્ય ધર્મસ્ય ત્રાયતે મહતો ભયાત્ ॥ ૨-૪૦॥

ન ઇહ અભિક્રમ-નાશઃ અસ્તિ પ્રત્યવાયઃ ન વિદ્યતે ।
સ્વલ્પમ્ અપિ અસ્ય ધર્મસ્ય ત્રાયતે મહતઃ ભયાત્ ॥ ૨-૪૦॥

ઇહ અભિક્રમ-નાશઃ ન અસ્તિ, પ્રત્યવાયઃ ન વિદ્યતે, અસ્ય ધર્મસ્ય
સ્વલ્પમ્ અપિ (અનુષ્ઠાનં) મહતઃ ભયાત્ ત્રાયતે ।

વ્યવસાયાત્મિકા બુદ્ધિરેકેહ કુરુનન્દન ।
બહુશાખા હ્યનન્તાશ્ચ બુદ્ધયોઽવ્યવસાયિનામ્ ॥ ૨-૪૧॥

વ્યવસાય-આત્મિકા બુદ્ધિઃ એકા ઇહ કુરુ-નન્દન ।
બહુ-શાખાઃ હિ અનન્તાઃ ચ બુદ્ધયઃ અવ્યવસાયિનામ્ ॥ ૨-૪૧॥

હે કુરુ-નન્દન! ઇહ વ્યવસાય-આત્મિકા એકા બુદ્ધિઃ ।
અવ્યવસાયિનામ્ હિ બુદ્ધયઃ અનન્તાઃ બહુ-શાખાઃ ચ ।

યામિમાં પુષ્પિતાં વાચં પ્રવદન્ત્યવિપશ્ચિતઃ ।
વેદવાદરતાઃ પાર્થ નાન્યદસ્તીતિ વાદિનઃ ॥ ૨-૪૨॥

કામાત્માનઃ સ્વર્ગપરા જન્મકર્મફલપ્રદામ્ ।
ક્રિયાવિશેષબહુલાં ભોગૈશ્વર્યગતિં પ્રતિ ॥ ૨-૪૩॥

ભોગૈશ્વર્યપ્રસક્તાનાં તયાપહૃતચેતસામ્ ।
વ્યવસાયાત્મિકા બુદ્ધિઃ સમાધૌ ન વિધીયતે ॥ ૨-૪૪॥

યામ્ ઇમામ્ પુષ્પિતામ્ વાચમ્ પ્રવદન્તિ અવિપશ્ચિતઃ ।
વેદ-વાદ-રતાઃ પાર્થ ન અન્યત્ અસ્તિ ઇતિ વાદિનઃ ॥ ૨-૪૨॥

કામ-આત્માનઃ સ્વર્ગ-પરાઃ જન્મ-કર્મ-ફલ-પ્રદામ્ ।
ક્રિયા-વિશેષ-બહુલામ્ ભોગ-ઐશ્વર્ય-ગતિમ્ પ્રતિ ॥ ૨-૪૩ ॥

ભોગ-ઐશ્વર્ય-પ્રસક્તાનામ્ તયા અપહૃત-ચેતસામ્ ।
વ્યવસાય-આત્મિકા બુદ્ધિઃ સમાધૌ ન વિધીયતે ॥ ૨-૪૪ ॥

હે પાર્થ! વેદ-વાદ-રતાઃ, અન્યત્ ન અસ્તિ ઇતિ વાદિનઃ,
અવિપશ્ચિતઃ, કામ-આત્માનઃ, સ્વર્ગ-પરાઃ, ભોગ-ઐશ્વર્ય-ગતિમ્
પ્રતિ ક્રિયા-વિશેષ-બહુલામ્ જન્મ-કર્મ-ફલ-પ્રદામ્ યામ્
ઇમામ્ પુષ્પિતામ્ વાચમ્ પ્રવદન્તિ, તયા અપહૃત-ચેતસામ્
ભોગ-ઐશ્વર્ય-પ્રસક્તાનામ્ બુદ્ધિઃ વ્યવસાય-આત્મિકા (ભૂત્વા)
સમાધૌ ન વિધીયતે ।

ત્રૈગુણ્યવિષયા વેદા નિસ્ત્રૈગુણ્યો ભવાર્જુન ।
નિર્દ્વન્દ્વો નિત્યસત્ત્વસ્થો નિર્યોગક્ષેમ આત્મવાન્ ॥ ૨-૪૫ ॥

ત્રૈગુણ્ય-વિષયાઃ વેદાઃ નિસ્ત્રૈગુણ્યઃ ભવાર્જુન ।
નિર્દ્વન્દ્વઃ નિત્ય-સત્ત્વસ્થઃ નિર્યોગક્ષેમઃ આત્મવાન્ ॥ ૨-૪૫ ॥

હે અર્જુન! વેદાઃ ત્રૈગુણ્ય-વિષયાઃ । (ત્વં) નિસ્ત્રૈગુણ્યઃ,
નિત્ય-સત્ત્વસ્થઃ, નિર્દ્વન્દ્વઃ, નિર્યોગક્ષેમઃ આત્મવાન્ ભવ ।

યાવાનર્થ ઉદપાને સર્વતઃ સમ્પ્લુતોદકે ।
તાવાન્સર્વેષુ વેદેષુ બ્રાહ્મણસ્ય વિજાનતઃ ॥ ૨-૪૬ ॥

યાવાન્ અર્થઃ ઉદપાને સર્વતઃ સમ્પ્લુતોદકે ।
તાવાન્ સર્વેષુ વેદેષુ બ્રાહ્મણસ્ય વિજાનતઃ ॥ ૨-૪૬ ॥

યાવાન્ અર્થઃ ઉદપાને (તાવાન્) સર્વતઃ સમ્પ્લુતોદકે (ભવતિ) ।
(તથા યાવાન્ અર્થઃ) સર્વેષુ વેદેષુ તાવાન્ વિજાનતઃ
બ્રાહ્મણસ્ય (ભવતિ) ।

કર્મણ્યેવાધિકારસ્તે મા ફલેષુ કદાચન ।
મા કર્મફલહેતુર્ભૂર્મા તે સઙ્ગોઽસ્ત્વકર્મણિ ॥ ૨-૪૭ ॥

કર્મણિ એવ અધિકારઃ તે મા ફલેષુ કદાચન ।
મા કર્મ-ફલ-હેતુઃ ભૂઃ મા તે સઙ્ગઃ અસ્તુ અકર્મણિ ॥ ૨-૪૭ ॥

તે અધિકારઃ કર્મણિ એવ; કદાચન ફલેષુ મા । કર્મ-ફલ-હેતુઃ
મા ભૂઃ તે સઙ્ગઃ (ચ) અકર્મણિ મા અસ્તુ ।

યોગસ્થઃ કુરુ કર્માણિ સઙ્ગં ત્યક્ત્વા ધનઞ્જય ।
સિદ્ધ્યસિદ્ધ્યોઃ સમો ભૂત્વા સમત્વં યોગ ઉચ્યતે ॥ ૨-૪૮॥

યોગસ્થઃ કુરુ કર્માણિ સઙ્ગમ્ ત્યક્ત્વા ધનઞ્જય ।
સિદ્ધિ અસિદ્ધ્યોઃ સમઃ ભૂત્વા સમત્વમ્ યોગઃ ઉચ્યતે ॥ ૨-૪૮॥

હે ધનઞ્જય! સઙ્ગમ્ ત્યક્ત્વા, સિદ્ધિ-અસિદ્ધ્યોઃ સમઃ
ભૂત્વા, યોગસ્થઃ કર્માણિ કુરુ । સમત્વમ્ યોગઃ ઉચ્યતે ।

દૂરેણ હ્યવરં કર્મ બુદ્ધિયોગાદ્ધનઞ્જય ।
બુદ્ધૌ શરણમન્વિચ્છ કૃપણાઃ ફલહેતવઃ ॥ ૨-૪૯॥

દૂરેણ હિ અવરમ્ કર્મ બુદ્ધિ-યોગાત્ ધનઞ્જય ।
બુદ્ધૌ શરણમ્ અન્વિચ્છ કૃપણાઃ ફલ-હેતવઃ ॥ ૨-૪૯॥

હે ધનઞ્જય! કર્મ બુદ્ધિ-યોગાત્ દૂરેણ અવરમ્ હિ ।
બુદ્ધૌ શરણમ્ અન્વિચ્છ । ફલ-હેતવઃ કૃપણાઃ ।

બુદ્ધિયુક્તો જહાતીહ ઉભે સુકૃતદુષ્કૃતે ।
તસ્માદ્યોગાય યુજ્યસ્વ યોગઃ કર્મસુ કૌશલમ્ ॥ ૨-૫૦॥

બુદ્ધિ-યુક્તઃ જહાતિ ઇહ ઉભે સુકૃત-દુષ્કૃતે ।
તસ્માત્ યોગાય યુજ્યસ્વ યોગઃ કર્મસુ કૌશલમ્ ॥ ૨-૫૦॥

ઇહ બુદ્ધિ-યુક્તઃ ઉભે સુકૃત-દુષ્કૃતે જહાતિ । તસ્માત્ યોગાય યુજ્યસ્વ ।
યોગઃ કર્મસુ કૌશલમ્ ।

કર્મજં બુદ્ધિયુક્તા હિ ફલં ત્યક્ત્વા મનીષિણઃ ।
જન્મબન્ધવિનિર્મુક્તાઃ પદં ગચ્છન્ત્યનામયમ્ ॥ ૨-૫૧॥

કર્મજમ્ બુદ્ધિ-યુક્તાઃ હિ ફલં ત્યક્ત્વા મનીષિણઃ ।
જન્મ-બન્ધ-વિનિર્મુક્તાઃ પદમ્ ગચ્છન્તિ અનામયમ્ ॥ ૨-૫૧॥

હિ બુદ્ધિ-યુક્તાઃ મનીષિણઃ કર્મજમ્ ફલં ત્યક્ત્વા
જન્મ-બન્ધ-વિનિર્મુક્તાઃ અનામયમ્ પદમ્ ગચ્છન્તિ ।

યદા તે મોહકલિલં બુદ્ધિર્વ્યતિતરિષ્યતિ ।
તદા ગન્તાસિ નિર્વેદં શ્રોતવ્યસ્ય શ્રુતસ્ય ચ ॥ ૨-૫૨॥

યદા તે મોહ-કલિલમ્ બુદ્ધિઃ વ્યતિતરિષ્યતિ ।
તદા ગન્તાસિ નિર્વેદમ્ શ્રોતવ્યસ્ય શ્રુતસ્ય ચ ॥ ૨-૫૨॥

યદા તે બુદ્ધિઃ મોહ-કલિલમ્ વ્યતિતરિષ્યતિ, તદા શ્રોતવ્યસ્ય
શ્રુતસ્ય ચ નિર્વેદમ્ ગન્તાસિ ।

શ્રુતિવિપ્રતિપન્ના તે યદા સ્થાસ્યતિ નિશ્ચલા ।
સમાધાવચલા બુદ્ધિસ્તદા યોગમવાપ્સ્યસિ ॥ ૨-૫૩॥

શ્રુતિ-વિપ્રતિપન્ના તે યદા સ્થાસ્યતિ નિશ્ચલા ।
સમાધૌ અચલા બુદ્ધિઃ તદા યોગમ્ અવાપ્સ્યસિ ॥ ૨-૫૩॥

યદા શ્રુતિ-વિપ્રતિપન્ના તે બુદ્ધિઃ નિશ્ચલા (ભૂત્વા)
સમાધૌ અચલા સ્થાસ્યતિ, તદા યોગમ્ અવાપ્સ્યસિ ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

સ્થિતપ્રજ્ઞસ્ય કા ભાષા સમાધિસ્થસ્ય કેશવ ।
સ્થિતધીઃ કિં પ્રભાષેત કિમાસીત વ્રજેત કિમ્ ॥ ૨-૫૪॥

સ્થિતપ્રજ્ઞસ્ય કા ભાષા સમાધિસ્થસ્ય કેશવ ।
સ્થિતધીઃ કિમ્ પ્રભાષેત કિમ્ આસીત વ્રજેત કિમ્ ॥ ૨-૫૪॥

હે કેશવ! સમાધિસ્થસ્ય સ્થિતપ્રજ્ઞસ્ય કા ભાષા?
સ્થિતધીઃ કિમ્ પ્રભાષેત? કિમ્ આસીત? કિમ્ વ્રજેત?

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

પ્રજહાતિ યદા કામાન્સર્વાન્પાર્થ મનોગતાન્ ।
આત્મન્યેવાત્મના તુષ્ટઃ સ્થિતપ્રજ્ઞસ્તદોચ્યતે ॥ ૨-૫૫॥

પ્રજહાતિ યદા કામાન્ સર્વાન્ પાર્થ મનોગતાન્ ।
આત્મનિ એવ આત્મના તુષ્ટઃ સ્થિતપ્રજ્ઞઃ તદા ઉચ્યતે ॥ ૨-૫૫॥

હે પાર્થ! યદા ( નરઃ) મનોગતાન્ સર્વાન્ કામાન્
પ્રજહાતિ, આત્મનિ એવ આત્મના તુષ્ટઃ (ભવતિ) તદા સ્થિતપ્રજ્ઞઃ ઉચ્યતે ।

દુઃખેષ્વનુદ્વિગ્નમનાઃ સુખેષુ વિગતસ્પૃહઃ ।

વીતરાગભયક્રોધઃ સ્થિતધીર્મુનિરુચ્યતે ॥ ૨-૫૬॥

દુઃખેષુ અનુદ્વિગ્ન-મનાઃ સુખેષુ વિગત-સ્પૃહઃ ।
વીત-રાગ-ભય-ક્રોધઃ સ્થિતધીઃ મુનિઃ ઉચ્યતે ॥ ૨-૫૬॥

દુઃખેષુ અનુદ્વિગ્ન-મનાઃ, સુખેષુ વિગત-સ્પૃહઃ,
વીત-રાગ-ભય-ક્રોધઃ મુનિઃ સ્થિતધીઃ ઉચ્યતે ।

યઃ સર્વત્રાનભિસ્નેહસ્તત્તત્પ્રાપ્ય શુભાશુભમ્ ।
નાભિનન્દતિ ન દ્વેષ્ટિ તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા ॥ ૨-૫૭॥

યઃ સર્વત્ર અનભિસ્નેહઃ તત્ તત્ પ્રાપ્ય શુભ-અશુભમ્ ।
ન અભિનન્દતિ ન દ્વેષ્ટિ તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા ॥ ૨-૫૭॥

યઃ સર્વત્ર અનભિસ્નેહઃ, તત્ તત્ શુભ-અશુભમ્ પ્રાપ્ય,
ન અભિનન્દતિ, ન દ્વેષ્ટિ, તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા ।

યદા સંહરતે ચાયં કૂર્મોઽઙ્ગાનીવ સર્વશઃ ।
ઇન્દ્રિયાણીન્દ્રિયાર્થેભ્યસ્તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા ॥ ૨-૫૮॥

યદા સંહરતે ચ અયમ્ કૂર્મઃ અઙ્ગાનિ ઇવ સર્વશઃ ।
ઇન્દ્રિયાણિ ઇન્દ્રિય-અર્થેભ્યઃ તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા ॥ ૨-૫૮॥

કૂર્મઃ અઙ્ગાનિ ઇવ, યદા અયમ્ ઇન્દ્રિય-અર્થેભ્યઃ ઇન્દ્રિયાણિ
સર્વશઃ સંહરતે, (તદા) તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા ચ ।

વિષયા વિનિવર્તન્તે નિરાહારસ્ય દેહિનઃ ।
રસવર્જં રસોઽપ્યસ્ય પરં દૃષ્ટ્વા નિવર્તતે ॥ ૨-૫૯॥

વિષયાઃ વિનિવર્તન્તે નિરાહારસ્ય દેહિનઃ ।
રસવર્જમ્ રસઃ અપિ અસ્ય પરમ્ દૃષ્ટ્વા નિવર્તતે ॥ ૨-૫૯॥

નિરાહારસ્ય દેહિનઃ વિષયાઃ રસવર્જમ્ વિનિવર્તન્તે ।
અસ્ય રસઃ અપિ પરમ્ દૃષ્ટ્વા નિવર્તતે ।

યતતો હ્યપિ કૌન્તેય પુરુષસ્ય વિપશ્ચિતઃ ।
ઇન્દ્રિયાણિ પ્રમાથીનિ હરન્તિ પ્રસભં મનઃ ॥ ૨-૬૦॥

યતતઃ હિ અપિ કૌન્તેય પુરુષસ્ય વિપશ્ચિતઃ ।
ઇન્દ્રિયાણિ પ્રમાથીનિ હરન્તિ પ્રસભં મનઃ ॥ ૨-૬૦॥

હે કૌન્તેય! પ્રમાથીનિ ઇન્દ્રિયાણિ યતતઃ વિપશ્ચિતઃ અપિ
પુરુષસ્ય મનઃ પ્રસભં હરન્તિ હિ ।

તાનિ સર્વાણિ સંયમ્ય યુક્ત આસીત મત્પરઃ ।
વશે હિ યસ્યેન્દ્રિયાણિ તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા ॥ ૨-૬૧॥

તાનિ સર્વાણિ સંયમ્ય યુક્તઃ આસીત મત્પરઃ ।
વશે હિ યસ્ય ઇન્દ્રિયાણિ તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા ॥ ૨-૬૧॥

તાનિ સર્વાણિ સંયમ્ય યુક્તઃ મત્-પરઃ આસીત । હિ યસ્ય વશે
ઇન્દ્રિયાણિ તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા ।

ધ્યાયતો વિષયાન્પુંસઃ સઙ્ગસ્તેષૂપજાયતે ।
સઙ્ગાત્સઞ્જાયતે કામઃ કામાત્ક્રોધોઽભિજાયતે ॥ ૨-૬૨॥

ધ્યાયતઃ વિષયાન્ પુંસઃ સઙ્ગઃ તેષુ ઉપજાયતે ।
સઙ્ગાત્ સઞ્જાયતે કામઃ કામાત્ ક્રોધઃ અભિજાયતે ॥ ૨-૬૨॥

વિષયાન્ ધ્યાયતઃ પુંસઃ તેષુ સઙ્ગઃ ઉપજાયતે ।
સઙ્ગાત્ કામઃ સઞ્જાયતે । કામાત્ ક્રોધઃ અભિજાયતે ।

ક્રોધાદ્ભવતિ સમ્મોહઃ સમ્મોહાત્સ્મૃતિવિભ્રમઃ ।
સ્મૃતિભ્રંશાદ્ બુદ્ધિનાશો બુદ્ધિનાશાત્પ્રણશ્યતિ ॥ ૨-૬૩॥

ક્રોધાત્ ભવતિ સમ્મોહઃ સમ્મોહાત્ સ્મૃતિ-વિભ્રમઃ ।
સ્મૃતિ-ભ્રંશાત્ બુદ્ધિ-નાશઃ બુદ્ધિ-નાશાત્ પ્રણશ્યતિ ॥ ૨-૬૩॥

ક્રોધાત્ સમ્મોહઃ ભવતિ । સમ્મોહાત્ સ્મૃતિ-વિભ્રમઃ,
સ્મૃતિ-ભ્રંશાત્ બુદ્ધિ-નાશઃ, બુદ્ધિ-નાશાત્ પ્રણશ્યતિ ।

રાગદ્વેષવિમુક્તૈસ્તુ વિષયાનિન્દ્રિયૈશ્ચરન્ । or વિયુક્તૈસ્તુ
આત્મવશ્યૈર્વિધેયાત્મા પ્રસાદમધિગચ્છતિ ॥ ૨-૬૪॥

રાગ-દ્વેષ-વિમુક્તૈઃ તુ વિષયાન્ ઇન્દ્રિયૈઃ ચરન્ । or વિયુક્તૈઃ તુ
આત્મ-વશ્યૈઃ વિધેય-આત્મા પ્રસાદમ્ અધિગચ્છતિ ॥ ૨-૬૪॥

વિધેય-આત્મા તુ રાગ-દ્વેષ-વિમુક્તૈઃ આત્મ-વશ્યૈઃ ઇન્દ્રિયૈઃ
વિષયાન્ ચરન્ પ્રસાદમ્ અધિગચ્છતિ ।

પ્રસાદે સર્વદુઃખાનાં હાનિરસ્યોપજાયતે ।
પ્રસન્નચેતસો હ્યાશુ બુદ્ધિઃ પર્યવતિષ્ઠતે ॥ ૨-૬૫॥

પ્રસાદે સર્વ-દુઃખાનામ્ હાનિઃ અસ્ય ઉપજાયતે ।
પ્રસન્ન-ચેતસઃ હિ આશુ બુદ્ધિઃ પર્યવતિષ્ઠતે ॥ ૨-૬૫॥

પ્રસાદે અસ્ય સર્વ-દુઃખાનામ્ હાનિઃ ઉપજાયતે ।
પ્રસન્ન-ચેતસઃ હિ બુદ્ધિઃ આશુ પર્યવતિષ્ઠતે ।

નાસ્તિ બુદ્ધિરયુક્તસ્ય ન ચાયુક્તસ્ય ભાવના ।
ન ચાભાવયતઃ શાન્તિરશાન્તસ્ય કુતઃ સુખમ્ ॥ ૨-૬૬॥

ન અસ્તિ બુદ્ધિઃ અયુક્તસ્ય ન ચ અયુક્તસ્ય ભાવના ।
ન ચ અભાવયતઃ શાન્તિઃ અશાન્તસ્ય કુતઃ સુખમ્ ॥ ૨-૬૬॥

અયુક્તસ્ય બુદ્ધિઃ ન અસ્તિ, અયુક્તસ્ય ચ ભાવના ન (અસ્તિ);
અભાવયતઃ ચ શાન્તિઃ ન (અસ્તિ); અશાન્તસ્ય સુખમ્ કુતઃ?

ઇન્દ્રિયાણાં હિ ચરતાં યન્મનોઽનુવિધીયતે ।
તદસ્ય હરતિ પ્રજ્ઞાં વાયુર્નાવમિવામ્ભસિ ॥ ૨-૬૭॥

ઇન્દ્રિયાણામ્ હિ ચરતામ્ યત્ મનઃ અનુવિધીયતે ।
તત્ અસ્ય હરતિ પ્રજ્ઞામ્ વાયુઃ નાવમ્ ઇવ અમ્ભસિ ॥ ૨-૬૭॥

ચરતામ્ ઇન્દ્રિયાણામ્ હિ યત્ મનઃ અનુવિધીયતે, તત્ અસ્ય
પ્રજ્ઞામ્ અમ્ભસિ હરતિ વાયુઃ નાવમ્ ઇવ ।

તસ્માદ્યસ્ય મહાબાહો નિગૃહીતાનિ સર્વશઃ ।
ઇન્દ્રિયાણીન્દ્રિયાર્થેભ્યસ્તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા ॥ ૨-૬૮॥

તસ્માત્ યસ્ય મહા-બાહો નિગૃહીતાનિ સર્વશઃ ।
ઇન્દ્રિયાણિ ઇન્દ્રિય-અર્થેભ્યઃ તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા ॥ ૨-૬૮॥

તસ્માત્ હે મહા-બાહો! યસ્ય ઇન્દ્રિયાણિ ઇન્દ્રિય-અર્થેભ્યઃ સર્વશઃ
નિગૃહીતાનિ તસ્ય પ્રજ્ઞા પ્રતિષ્ઠિતા ।

યા નિશા સર્વભૂતાનાં તસ્યાં જાગર્તિ સંયમી ।
યસ્યાં જાગ્રતિ ભૂતાનિ સા નિશા પશ્યતો મુનેઃ ॥ ૨-૬૯॥

યા નિશા સર્વ-ભૂતાનામ્ તસ્યામ્ જાગર્તિ સંયમી ।
યસ્યામ્ જાગ્રતિ ભૂતાનિ સા નિશા પશ્યતઃ મુનેઃ ॥ ૨-૬૯॥

યા સર્વ-ભૂતાનામ્ નિશા, તસ્યામ્ સંયમી જાગર્તિ ।

યસ્યામ્ ભૂતાનિ જાગ્રતિ, સા પશ્યતઃ મુનેઃ નિશા ।

આપૂર્યમાણમચલપ્રતિષ્ઠં
 સમુદ્રમાપઃ પ્રવિશન્તિ યદ્વત્ ।
તદ્વત્કામા યં પ્રવિશન્તિ સર્વે
 સ શાન્તિમાપ્નોતિ ન કામકામી ॥ ૨-૭૦॥

આપૂર્યમાણમ્ અચલ-પ્રતિષ્ઠમ્
 સમુદ્રમ્ આપઃ પ્રવિશન્તિ યદ્વત્ ।
તદ્વત્ કામાઃ યમ્ પ્રવિશન્તિ સર્વે
 સઃ શાન્તિમ્ આપ્નોતિ ન કામ-કામી ॥ ૨-૭૦॥

આપૂર્યમાણમ્ અચલ-પ્રતિષ્ઠમ્ સમુદ્રમ્ યદ્વત્
આપઃ પ્રવિશન્તિ, તદ્વત્ યમ્ સર્વે કામાઃ પ્રવિશન્તિ,
સઃ શાન્તિમ્ આપ્નોતિ; કામ-કામી ન ।

વિહાય કામાન્યઃ સર્વાન્પુમાંશ્ચરતિ નિઃસ્પૃહઃ ।
નિર્મમો નિરહઙ્કારઃ સ શાન્તિમધિગચ્છતિ ॥ ૨-૭૧॥

વિહાય કામાન્ યઃ સર્વાન્ પુમાન્ ચરતિ નિઃસ્પૃહઃ ।
નિર્મમઃ નિરહઙ્કારઃ સઃ શાન્તિમ્ અધિગચ્છતિ ॥ ૨-૭૧॥

યઃ પુમાન્ સર્વાન્ કામાન્ વિહાય, નિઃસ્પૃહઃ નિર્મમઃ
નિરહઙ્કારઃ (ભૂત્વા) ચરતિ, સઃ શાન્તિમ્ અધિગચ્છતિ ।

એષા બ્રાહ્મી સ્થિતિઃ પાર્થ નૈનાં પ્રાપ્ય વિમુહ્યતિ ।
સ્થિત્વાસ્યામન્તકાલેઽપિ બ્રહ્મનિર્વાણમૃચ્છતિ ॥ ૨-૭૨॥

એષા બ્રાહ્મી સ્થિતિઃ પાર્થ ન એનામ્ પ્રાપ્ય વિમુહ્યતિ ।
સ્થિત્વા અસ્યામ્ અન્તકાલે અપિ બ્રહ્મ-નિર્વાણમ્ ઋચ્છતિ ॥ ૨-૭૨॥

હે પાર્થ! એષા બ્રાહ્મી સ્થિતિઃ, એનામ્ પ્રાપ્ય ન વિમુહ્યતિ,
અન્તકાલે અપિ અસ્યામ્ સ્થિત્વા બ્રહ્મ-નિર્વાણમ્ ઋચ્છતિ ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
સાઙ્ખ્યયોગો નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્-ગીતાસુ ઉપનિષત્સુ

બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રી-કૃષ્ણ-અર્જુન-સંવાદે
સાઙ્ખ્ય-યોગઃ નામ દ્વિતીયઃ અધ્યાયઃ ॥ ૨॥

---

અથ તૃતીયોઽધ્યાયઃ । કર્મયોગઃ ।
અથ તૃતીયઃ અધ્યાયઃ । કર્મ-યોગઃ ।
અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

જ્યાયસી ચેત્કર્મણસ્તે મતા બુદ્ધિર્જનાર્દન ।
તત્કિં કર્મણિ ઘોરે માં નિયોજયસિ કેશવ ॥ ૩-૧॥

જ્યાયસી ચેત્ કર્મણઃ તે મતા બુદ્ધિઃ જનાર્દન ।
તત્ કિમ્ કર્મણિ ઘોરે મામ્ નિયોજયસિ કેશવ ॥ ૩-૧॥

હે જનાર્દન! કર્મણઃ બુદ્ધિઃ જ્યાયસી તે મતા ચેત્,
તત્ હે કેશવ! મામ્ ઘોરે કર્મણિ કિમ્ નિયોજયસિ ?

વ્યામિશ્રેણેવ વાક્યેન બુદ્ધિં મોહયસીવ મે ।
તદેકં વદ નિશ્ચિત્ય યેન શ્રેયોઽહમાપ્નુયામ્ ॥ ૩-૨॥

વ્યામિશ્રેણ ઇવ વાક્યેન બુદ્ધિં મોહયસિ ઇવ મે ।
તત્ એકં વદ નિશ્ચિત્ય યેન શ્રેયઃ અહમ્ આપ્નુયામ્ ॥ ૩-૨॥

વ્યામિશ્રેણ ઇવ વાક્યેન મે બુદ્ધિં મોહયસિ ઇવ । તત્ નિશ્ચિત્ય
એકં વદ, યેન અહમ્ શ્રેયઃ આપ્નુયામ્ ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

લોકેઽસ્મિન્ દ્વિવિધા નિષ્ઠા પુરા પ્રોક્તા મયાનઘ ।
જ્ઞાનયોગેન સાઙ્ખ્યાનાં કર્મયોગેન યોગિનામ્ ॥ ૩-૩॥

લોકે અસ્મિન્ દ્વિવિધા નિષ્ઠા પુરા પ્રોક્તા મયા અનઘ ।
જ્ઞાન-યોગેન સાઙ્ખ્યાનામ્ કર્મ-યોગેન યોગિનામ્ ॥ ૩-૩॥

હે અનઘ! અસ્મિન્ લોકે સાઙ્ખ્યાનામ્ જ્ઞાન-યોગેન,
યોગિનામ્ કર્મ-યોગેન દ્વિવિધા નિષ્ઠા પુરા મયા પ્રોક્તા ।

ન કર્મણામનારમ્ભાન્નૈષ્કર્મ્યં પુરુષોઽશ્નુતે ।

ન ચ સંન્યસનાદેવ સિદ્ધિં સમધિગચ્છતિ ॥ ૩-૪॥

ન કર્મણામ્ અનારમ્ભાત્ નૈષ્કર્મ્યં પુરુષઃ અશ્નુતે ।
ન ચ સંન્યસનાત્ એવ સિદ્ધિમ્ સમધિગચ્છતિ ॥ ૩-૪॥

કર્મણામ્ અનારમ્ભાત્ પુરુષઃ નૈષ્કર્મ્યં ન અશ્નુતે ।
(કર્મણાં) ચ સંન્યસનાત્ એવ સિદ્ધિમ્ ન સમધિગચ્છતિ ।

ન હિ કશ્ચિત્ક્ષણમપિ જાતુ તિષ્ઠત્યકર્મકૃત્ ।
કાર્યતે હ્યવશઃ કર્મ સર્વઃ પ્રકૃતિજૈર્ગુણૈઃ ॥ ૩-૫॥

ન હિ કશ્ચિત્ ક્ષણમ્ અપિ જાતુ તિષ્ઠતિ અકર્મકૃત્ ।
કાર્યતે હિ અવશઃ કર્મ સર્વઃ પ્રકૃતિજૈઃ ગુણૈઃ ॥ ૩-૫॥

કશ્ચિત્ જાતુ ક્ષણમ્ અપિ અકર્મકૃત્ ન હિ તિષ્ઠતિ ।
પ્રકૃતિજૈઃ ગુણૈઃ સર્વઃ હિ અવશઃ કર્મ કાર્યતે ।

કર્મેન્દ્રિયાણિ સંયમ્ય ય આસ્તે મનસા સ્મરન્ ।
ઇન્દ્રિયાર્થાન્વિમૂઢાત્મા મિથ્યાચારઃ સ ઉચ્યતે ॥ ૩-૬॥

કર્મ-ઇન્દ્રિયાણિ સંયમ્ય યઃ આસ્તે મનસા સ્મરન્ ।
ઇન્દ્રિયાર્થાન્ વિમૂઢાત્મા મિથ્યાચારઃ સઃ ઉચ્યતે ॥ ૩-૬॥

યઃ કર્મ-ઇન્દ્રિયાણિ સંયમ્ય, મનસા ઇન્દ્રિયાર્થાન્ સ્મરન્ આસ્તે,
સઃ વિમૂઢાત્મા મિથ્યાચારઃ ઉચ્યતે ।

યસ્ત્વિન્દ્રિયાણિ મનસા નિયમ્યારભતેઽર્જુન ।
કર્મેન્દ્રિયૈઃ કર્મયોગમસક્તઃ સ વિશિષ્યતે ॥ ૩-૭॥

યઃ તુ ઇન્દ્રિયાણિ મનસા નિયમ્ય આરભતે અર્જુન ।
કર્મ-ઇન્દ્રિયૈઃ કર્મ-યોગમ્ અસક્તઃ સઃ વિશિષ્યતે ॥ ૩-૭॥

હે અર્જુન ! યઃ તુ મનસા ઇન્દ્રિયાણિ નિયમ્ય, અસક્તઃ કર્મ-ઇન્દ્રિયૈઃ
કર્મ-યોગમ્ આરભતે, સઃ વિશિષ્યતે ।

નિયતં કુરુ કર્મ ત્વં કર્મ જ્યાયો હ્યકર્મણઃ ।
શરીરયાત્રાપિ ચ તે ન પ્રસિદ્ધ્યેદકર્મણઃ ॥ ૩-૮॥

નિયતમ્ કુરુ કર્મ ત્વં કર્મ જ્યાયઃ હિ અકર્મણઃ ।
શરીર-યાત્રા અપિ ચ તે ન પ્રસિદ્ધ્યેત્ અકર્મણઃ ॥ ૩-૮॥

ત્વં નિયતમ્ કર્મ કુરુ, અકર્મણઃ હિ કર્મ જ્યાયઃ ।
તે શરીર-યાત્રા ચ અપિ અકર્મણઃ ન પ્રસિદ્ધ્યેત્ ।

યજ્ઞાર્થાત્કર્મણોઽન્યત્ર લોકોઽયં કર્મબન્ધનઃ ।
તદર્થં કર્મ કૌન્તેય મુક્તસઙ્ગઃ સમાચર ॥ ૩-૯॥

યજ્ઞાર્થાત્ કર્મણઃ અન્યત્ર લોકઃ અયમ્ કર્મ-બન્ધનઃ ।
તત્ અર્થમ્ કર્મ કૌન્તેય મુક્ત-સઙ્ગઃ સમાચર ॥ ૩-૯॥

યજ્ઞાર્થાત્ કર્મણઃ અન્યત્ર અયમ્ લોકઃ કર્મ-બન્ધનઃ ।
હે કૌન્તેય! મુક્ત-સઙ્ગઃ તત્ અર્થમ્ કર્મ સમાચર ।

સહયજ્ઞાઃ પ્રજાઃ સૃષ્ટ્વા પુરોવાચ પ્રજાપતિઃ ।
અનેન પ્રસવિષ્યધ્વમેષ વોઽસ્ત્વિષ્ટકામધુક્ ॥ ૩-૧૦॥

સહ-યજ્ઞાઃ પ્રજાઃ સૃષ્ટ્વા પુરા ઉવાચ પ્રજાપતિઃ ।
અનેન પ્રસવિષ્યધ્વમ્ એષઃ વઃ અસ્તુ ઇષ્ટ-કામધુક્ ॥ ૩-૧૦॥

પુરા પ્રજાપતિઃ સહ-યજ્ઞાઃ પ્રજાઃ સૃષ્ટ્વા 'અનેન (યૂયં)
પ્રસવિષ્યધ્વમ્, એષઃ વઃ ઇષ્ટ-કામધુક્ અસ્તુ' (ઇતિ) ઉવાચ ।

દેવાન્ભાવયતાનેન તે દેવા ભાવયન્તુ વઃ ।
પરસ્પરં ભાવયન્તઃ શ્રેયઃ પરમવાપ્સ્યથ ॥ ૩-૧૧॥

દેવાન્ ભાવયત અનેન તે દેવાઃ ભાવયન્તુ વઃ ।
પરસ્પરં ભાવયન્તઃ શ્રેયઃ પરમ્ અવાપ્સ્યથ ॥ ૩-૧૧॥

અનેન (યૂયં) દેવાન્ ભાવયત, તે દેવાઃ વઃ ભાવયન્તુ,
(એવં) પરસ્પરં ભાવયન્તઃ પરમ્ શ્રેયઃ અવાપ્સ્યથ ।

ઇષ્ટાન્ભોગાન્હિ વો દેવા દાસ્યન્તે યજ્ઞભાવિતાઃ ।
તૈર્દત્તાનપ્રદાયૈભ્યો યો ભુઙ્ક્તે સ્તેન એવ સઃ ॥ ૩-૧૨॥

ઇષ્ટાન્ ભોગાન્ હિ વઃ દેવાઃ દાસ્યન્તે યજ્ઞ-ભાવિતાઃ ।
તૈઃ દત્તાન્ અપ્રદાય એભ્યઃ યઃ ભુઙ્ક્તે સ્તેનઃ એવ સઃ ॥ ૩-૧૨॥

યજ્ઞ-ભાવિતાઃ દેવાઃ વઃ ઇષ્ટાન્ ભોગાન્ દાસ્યન્તે ।
તૈઃ દત્તાન્ એભ્યઃ અપ્રદાય, યઃ ભુઙ્ક્તે, સઃ હિ સ્તેનઃ એવ ।

યજ્ઞશિષ્ટાશિનઃ સન્તો મુચ્યન્તે સર્વકિલ્બિષૈઃ ।
ભુઞ્જતે તે ત્વઘં પાપા યે પચન્ત્યાત્મકારણાત્ ॥ ૩-૧૩॥

યજ્ઞ-શિષ્ટ આશિનઃ સન્તઃ મુચ્યન્તે સર્વ-કિલ્બિષૈઃ ।
ભુઞ્જતે તે તુ અઘં પાપાઃ યે પચન્તિ આત્મ-કારણાત્ ॥ ૩-૧૩॥

યજ્ઞ-શિષ્ટ આશિનઃ સન્તઃ સર્વ-કિલ્બિષૈઃ મુચ્યન્તે ।
યે તુ આત્મ-કારણાત્ પચન્તિ, તે પાપાઃ અઘં ભુઞ્જતે ।

અન્નાદ્ભવન્તિ ભૂતાનિ પર્જન્યાદન્નસમ્ભવઃ ।
યજ્ઞાદ્ભવતિ પર્જન્યો યજ્ઞઃ કર્મસમુદ્ભવઃ ॥ ૩-૧૪॥

અન્નાત્ ભવન્તિ ભૂતાનિ પર્જન્યાત્ અન્ન-સમ્ભવઃ ।
યજ્ઞાત્ ભવતિ પર્જન્યઃ યજ્ઞઃ કર્મ-સમુદ્ભવઃ ॥ ૩-૧૪॥

ભૂતાનિ અન્નાત્ ભવન્તિ, પર્જન્યાત્ અન્ન-સમ્ભવઃ,
પર્જન્યઃ યજ્ઞાત્ ભવતિ, યજ્ઞઃ કર્મ-સમુદ્ભવઃ ।

કર્મ બ્રહ્મોદ્ભવં વિદ્ધિ બ્રહ્માક્ષરસમુદ્ભવમ્ ।
તસ્માત્સર્વગતં બ્રહ્મ નિત્યં યજ્ઞે પ્રતિષ્ઠિતમ્ ॥ ૩-૧૫॥

કર્મ બ્રહ્મ-ઉદ્ભવં વિદ્ધિ બ્રહ્મ અક્ષર-સમુદ્ભવમ્ ।
તસ્માત્ સર્વગતં બ્રહ્મ નિત્યં યજ્ઞે પ્રતિષ્ઠિતમ્ ॥ ૩-૧૫॥

કર્મ બ્રહ્મ-ઉદ્ભવં વિદ્ધિ, બ્રહ્મ અક્ષર-સમુદ્ભવમ્,
તસ્માત્ સર્વગતં બ્રહ્મ યજ્ઞે નિત્યં પ્રતિષ્ઠિતમ્ ।

એવં પ્રવર્તિતં ચક્રં નાનુવર્તયતીહ યઃ ।
અઘાયુરિન્દ્રિયારામો મોઘં પાર્થ સ જીવતિ ॥ ૩-૧૬॥

એવં પ્રવર્તિતમ્ ચક્રમ્ ન અનુવર્તયતિ ઇહ યઃ ।
અઘાયુઃ ઇન્દ્રિય-આરામઃ મોઘમ્ પાર્થ સઃ જીવતિ ॥ ૩-૧૬॥

હે પાર્થ! એવં પ્રવર્તિતમ્ ચક્રમ્ યઃ ઇહ ન અનુવર્તયતિ,
સઃ ઇન્દ્રિય-આરામઃ અઘાયુઃ મોઘમ્ જીવતિ ।

યસ્ત્વાત્મરતિરેવ સ્યાદાત્મતૃપ્તશ્ચ માનવઃ ।
આત્મન્યેવ ચ સન્તુષ્ટસ્તસ્ય કાર્યં ન વિદ્યતે ॥ ૩-૧૭॥

યઃ તુ આત્મ-રતિઃ એવ સ્યાત્ આત્મ-તૃપ્તઃ ચ માનવઃ ।
આત્મનિ એવ ચ સન્તુષ્ટઃ તસ્ય કાર્યમ્ ન વિદ્યતે ॥ ૩-૧૭॥

યઃ તુ માનવઃ આત્મ-રતિઃ એવ, આત્મ-તૃપ્તઃ ચ,

આત્મનિ એવ ચ સન્તુષ્ટઃ સ્યાત્ તસ્ય કાર્યમ્ ન વિદ્યતે ।

નૈવ તસ્ય કૃતેનાર્થો નાકૃતેનેહ કશ્ચન ।
ન ચાસ્ય સર્વભૂતેષુ કશ્ચિદર્થવ્યપાશ્રયઃ ॥ ૩-૧૮॥

ન એવ તસ્ય કૃતેન અર્થઃ ન અકૃતેન ઇહ કશ્ચન ।
ન ચ અસ્ય સર્વ-ભૂતેષુ કશ્ચિત્ અર્થ-વ્યપાશ્રયઃ ॥ ૩-૧૮॥

ઇહ કૃતેન તસ્ય અર્થઃ ન એવ, અકૃતેન (અપિ) કશ્ચન અસ્ય (અર્થઃ) ન,
(તથા) સર્વ-ભૂતેષુ ચ (અસ્ય) કશ્ચિત્ અર્થ-વ્યપાશ્રયઃ ન ।

તસ્માદસક્તઃ સતતં કાર્યં કર્મ સમાચર ।
અસક્તો હ્યાચરન્કર્મ પરમાપ્નોતિ પૂરુષઃ ॥ ૩-૧૯॥

તસ્માત્ અસક્તઃ સતતમ્ કાર્યમ્ કર્મ સમાચર ।
અસક્તઃ હિ આચરન્ કર્મ પરમ્ આપ્નોતિ પૂરુષઃ ॥ ૩-૧૯॥

તસ્માત્ (ત્વં) અસક્તઃ (સન્) સતતમ્ કાર્યમ્ કર્મ સમાચર,
હિ પૂરુષઃ અસક્તઃ (સન્) કર્મ આચરન્, પરમ્ આપ્નોતિ ।

કર્મણૈવ હિ સંસિદ્ધિમાસ્થિતા જનકાદયઃ ।
લોકસંગ્રહમેવાપિ સમ્પશ્યન્કર્તુમર્હસિ ॥ ૩-૨૦॥

કર્મણા એવ હિ સંસિદ્ધિમ્ આસ્થિતાઃ જનક-આદયઃ ।
લોક-સંગ્રહમ્ એવ અપિ સમ્પશ્યન્ કર્તુમ્ અર્હસિ ॥ ૩-૨૦॥

હિ જનક-આદયઃ કર્મણા એવ સંસિદ્ધિમ્ આસ્થિતાઃ ।
(ત્વં) અપિ લોક-સંગ્રહમ્ એવ સમ્પશ્યન્ કર્તુમ્ અર્હસિ ।

યદ્યદાચરતિ શ્રેષ્ઠસ્તત્તદેવેતરો જનઃ ।
સ યત્પ્રમાણં કુરુતે લોકસ્તદનુવર્તતે ॥ ૩-૨૧॥

યત્ યત્ આચરતિ શ્રેષ્ઠઃ તત્ તત્ એવ ઇતરઃ જનઃ ।
સઃ યત્ પ્રમાણમ્ કુરુતે લોકઃ તત્ અનુવર્તતે ॥ ૩-૨૧॥

યત્ યત્ શ્રેષ્ઠઃ આચરતિ તત્ તત્ એવ ઇતરઃ જનઃ ( આચરતિ)।
સઃ યત્ પ્રમાણમ્ કુરુતે, લોકઃ તત્ અનુવર્તતે ।

ન મે પાર્થાસ્તિ કર્તવ્યં ત્રિષુ લોકેષુ કિઞ્ચન ।
નાનવાપ્તમવાપ્તવ્યં વર્ત એવ ચ કર્મણિ ॥ ૩-૨૨॥

ન મે પાર્થ અસ્તિ કર્તવ્યમ્ ત્રિષુ લોકેષુ કિઞ્ચન ।
ન અનવાપ્તમ્ અવાપ્તવ્યમ્ વર્તે એવ ચ કર્મણિ ॥ ૩-૨૨॥

હે પાર્થ! (યદ્યપિ) મે ત્રિષુ લોકેષુ કિઞ્ચન કર્તવ્યમ્ ન અસ્તિ,
અનવાપ્તમ્ અવાપ્તવ્યમ્ ચ ન (અસ્તિ, તથા અપિ અહં) કર્મણિ વર્તે એવ ।

યદિ હ્યહં ન વર્તેયં જાતુ કર્મણ્યતન્દ્રિતઃ ।
મમ વર્ત્માનુવર્તન્તે મનુષ્યાઃ પાર્થ સર્વશઃ ॥ ૩-૨૩॥

યદિ હિ અહં ન વર્તેયમ્ જાતુ કર્મણિ અતન્દ્રિતઃ ।
મમ વર્ત્મ અનુવર્તન્તે મનુષ્યાઃ પાર્થ સર્વશઃ ॥ ૩-૨૩॥

યદિ હિ અહં અતન્દ્રિતઃ (સન્) કર્મણિ જાતુ ન વર્તેયમ્, (તર્હિ)
હે પાર્થ! મનુષ્યાઃ સર્વશઃ મમ વર્ત્મ અનુવર્તન્તે ।

ઉત્સીદેયુરિમે લોકા ન કુર્યાં કર્મ ચેદહમ્ ।
સઙ્કરસ્ય ચ કર્તા સ્યામુપહન્યામિમાઃ પ્રજાઃ ॥ ૩-૨૪॥

ઉત્સીદેયુઃ ઇમે લોકાઃ ન કુર્યામ્ કર્મ ચેત્ અહમ્ ।
સઙ્કરસ્ય ચ કર્તા સ્યામ્ ઉપહન્યામ્ ઇમાઃ પ્રજાઃ ॥ ૩-૨૪॥

અહમ્ કર્મ ન કુર્યામ્ ચેત્ ઇમે લોકાઃ ઉત્સીદેયુઃ,
સઙ્કરસ્ય કર્તા સ્યામ્ ઇમાઃ પ્રજાઃ ચ ઉપહન્યામ્ ।

સક્તાઃ કર્મણ્યવિદ્વાંસો યથા કુર્વન્તિ ભારત ।
કુર્યાદ્વિદ્વાંસ્તથાસક્તશ્ચિકીર્ષુર્લોકસંગ્રહમ્ ॥ ૩-૨૫॥

સક્તાઃ કર્મણિ અવિદ્વાંસઃ યથા કુર્વન્તિ ભારત ।
કુર્યાત્ વિદ્વાન્ તથા અસક્તઃ ચિકીર્ષુઃ લોક-સંગ્રહમ્ ॥ ૩-૨૫॥

હે ભારત! અવિદ્વાંસઃ યથા કર્મણિ સક્તાઃ (કર્મ) કુર્વન્તિ,
તથા લોક-સંગ્રહમ્ ચિકીર્ષુઃ વિદ્વાન્ અસક્તઃ (સન્ કર્મ) કુર્યાત્ ।

ન બુદ્ધિભેદં જનયેદજ્ઞાનાં કર્મસઙ્ગિનામ્ ।
જોષયેત્સર્વકર્માણિ વિદ્વાન્યુક્તઃ સમાચરન્ ॥ ૩-૨૬॥

ન બુદ્ધિ-ભેદમ્ જનયેત્ અજ્ઞાનામ્ કર્મ-સઙ્ગિનામ્ ।
જોષયેત્ સર્વ-કર્માણિ વિદ્વાન્ યુક્તઃ સમાચરન્ ॥ ૩-૨૬॥

વિદ્વાન્ કર્મ-સઙ્ગિનામ્ અજ્ઞાનામ્ બુદ્ધિ-ભેદમ્ ન જનયેત્
(કિન્તુ) યુક્તઃ સમાચરન્ સર્વ-કર્માણિ જોષયેત્ ।

પ્રકૃતેઃ ક્રિયમાણાનિ ગુણૈઃ કર્માણિ સર્વશઃ ।
અહઙ્કારવિમૂઢાત્મા કર્તાહમિતિ મન્યતે ॥ ૩-૨૭॥

પ્રકૃતેઃ ક્રિયમાણાનિ ગુણૈઃ કર્માણિ સર્વશઃ ।
અહઙ્કાર-વિમૂઢ-આત્મા કર્તા અહમ્ ઇતિ મન્યતે ॥ ૩-૨૭॥

પ્રકૃતેઃ ગુણૈઃ કર્માણિ સર્વશઃ ક્રિયમાણાનિ (સન્તિ, પરન્તુ)
અહઙ્કાર-વિમૂઢ-આત્મા 'અહમ્' કર્તા ઇતિ મન્યતે ।

તત્ત્વવિત્તુ મહાબાહો ગુણકર્મવિભાગયોઃ ।
ગુણા ગુણેષુ વર્તન્ત ઇતિ મત્વા ન સજ્જતે ॥ ૩-૨૮॥

તત્ત્વવિત્ તુ મહાબાહો ગુણ-કર્મ-વિભાગયોઃ ।
ગુણાઃ ગુણેષુ વર્તન્તે ઇતિ મત્વા ન સજ્જતે ॥ ૩-૨૮॥

હે મહાબાહો! ગુણ-કર્મ-વિભાગયોઃ તત્ત્વવિત્ તુ
'ગુણાઃ ગુણેષુ વર્તન્તે' ઇતિ મત્વા ન સજ્જતે ।

પ્રકૃતેર્ગુણસમ્મૂઢાઃ સજ્જન્તે ગુણકર્મસુ ।
તાનકૃત્સ્નવિદો મન્દાન્કૃત્સ્નવિન્ન વિચાલયેત્ ॥ ૩-૨૯॥

પ્રકૃતેઃ ગુણ-સમ્મૂઢાઃ સજ્જન્તે ગુણ-કર્મસુ ।
તાન્ અકૃત્સ્નવિદઃ મન્દાન્ કૃત્સ્નવિત્ ન વિચાલયેત્ ॥ ૩-૨૯॥

પ્રકૃતેઃ ગુણ-સમ્મૂઢાઃ ગુણ-કર્મસુ સજ્જન્તે, તાન્
અકૃત્સ્નવિદઃ મન્દાન્ કૃત્સ્નવિત્ ન વિચાલયેત્ ।

મયિ સર્વાણિ કર્માણિ સંન્યસ્યાધ્યાત્મચેતસા ।
નિરાશીર્નિર્મમો ભૂત્વા યુધ્યસ્વ વિગતજ્વરઃ ॥ ૩-૩૦॥

મયિ સર્વાણિ કર્માણિ સંન્યસ્ય અધ્યાત્મ-ચેતસા ।
નિરાશીઃ નિર્મમઃ ભૂત્વા યુધ્યસ્વ વિગત-જ્વરઃ ॥ ૩-૩૦॥

મયિ અધ્યાત્મ-ચેતસા સર્વાણિ કર્માણિ સંન્યસ્ય નિરાશીઃ
નિર્મમઃ વિગત-જ્વરઃ ભૂત્વા, યુધ્યસ્વ ।

યે મે મતમિદં નિત્યમનુતિષ્ઠન્તિ માનવાઃ ।
શ્રદ્ધાવન્તોઽનસૂયન્તો મુચ્યન્તે તેઽપિ કર્મભિઃ ॥ ૩-૩૧॥

યે મે મતમ્ ઇદમ્ નિત્યમ્ અનુતિષ્ઠન્તિ માનવાઃ ।

શ્રદ્ધાવન્તઃ અનસૂયન્તઃ મુચ્યન્તે તે અપિ કર્મભિઃ ॥ ૩-૩૧॥

યે માનવાઃ શ્રદ્ધાવન્તઃ અનસૂયન્તઃ ઇદમ્ મે મતમ્
નિત્યમ્ અનુતિષ્ઠન્તિ, તે અપિ કર્મભિઃ મુચ્યન્તે ।

યે ત્વેતદભ્યસૂયન્તો નાનુતિષ્ઠન્તિ મે મતમ્ ।
સર્વજ્ઞાનવિમૂઢાંસ્તાન્વિદ્ધિ નષ્ટાનચેતસઃ ॥ ૩-૩૨॥

યે તુ એતત્ અભ્યસૂયન્તઃ ન અનુતિષ્ઠન્તિ મે મતમ્ ।
સર્વ-જ્ઞાન-વિમૂઢાન્ તાન્ વિદ્ધિ નષ્ટાન્ અચેતસઃ ॥ ૩-૩૨॥

યે તુ એતત્ અભ્યસૂયન્તઃ મે મતમ્ ન અનુતિષ્ઠન્તિ, તાન્
સર્વ-જ્ઞાન-વિમૂઢાન્ અચેતસઃ નષ્ટાન્ વિદ્ધિ ।

સદૃશં ચેષ્ટતે સ્વસ્યાઃ પ્રકૃતેર્જ્ઞાનવાનપિ ।
પ્રકૃતિં યાન્તિ ભૂતાનિ નિગ્રહઃ કિં કરિષ્યતિ ॥ ૩-૩૩॥

સદૃશમ્ ચેષ્ટતે સ્વસ્યાઃ પ્રકૃતેઃ જ્ઞાનવાન્ અપિ ।
પ્રકૃતિમ્ યાન્તિ ભૂતાનિ નિગ્રહઃ કિમ્ કરિષ્યતિ ॥ ૩-૩૩॥

જ્ઞાનવાન્ અપિ સ્વસ્યાઃ પ્રકૃતેઃ સદૃશમ્ ચેષ્ટતે ।
ભૂતાનિ પ્રકૃતિમ્ યાન્તિ । નિગ્રહઃ કિમ્ કરિષ્યતિ ?

ઇન્દ્રિયસ્યેન્દ્રિયસ્યાર્થે રાગદ્વેષૌ વ્યવસ્થિતૌ ।
તયોર્ન વશમાગચ્છેત્તૌ હ્યસ્ય પરિપન્થિનૌ ॥ ૩-૩૪॥

ઇન્દ્રિયસ્ય ઇન્દ્રિયસ્ય-અર્થે રાગ-દ્વેષૌ વ્યવસ્થિતૌ ।
તયોઃ ન વશમ્ આગચ્છેત્ તૌ હિ અસ્ય પરિપન્થિનૌ ॥ ૩-૩૪॥

ઇન્દ્રિયસ્ય-અર્થે ઇન્દ્રિયસ્ય રાગ-દ્વેષૌ વ્યવસ્થિતૌ,
તયોઃ વશમ્ ન આગચ્છેત્ । તૌ હિ અસ્ય પરિપન્થિનૌ ।

શ્રેયાન્સ્વધર્મો વિગુણઃ પરધર્માત્સ્વનુષ્ઠિતાત્ ।
સ્વધર્મે નિધનં શ્રેયઃ પરધર્મો ભયાવહઃ ॥ ૩-૩૫॥

શ્રેયાન્ સ્વધર્મઃ વિગુણઃ પરધર્માત્ સ્વનુષ્ઠિતાત્ ।
સ્વધર્મે નિધનમ્ શ્રેયઃ પરધર્મઃ ભય-આવહઃ ॥ ૩-૩૫॥

સ્વનુષ્ઠિતાત્ પરધર્માત્ વિગુણઃ સ્વધર્મઃ (અપિ) શ્રેયાન્ ।
સ્વધર્મે નિધનમ્ શ્રેયઃ । પરધર્મઃ ભય-આવહઃ ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

અથ કેન પ્રયુક્તોઽયં પાપં ચરતિ પૂરુષઃ ।
અનિચ્છન્નપિ વાર્ષ્ણેય બલાદિવ નિયોજિતઃ ॥ ૩-૩૬॥

અથ કેન પ્રયુક્તઃ અયં પાપમ્ ચરતિ પૂરુષઃ ।
અનિચ્છન્ અપિ વાર્ષ્ણેય બલાત્ ઇવ નિયોજિતઃ ॥ ૩-૩૬॥

હે વાર્ષ્ણેય! અથ કેન પ્રયુક્તઃ અયં પૂરુષઃ અનિચ્છન્ અપિ,
બલાત્ નિયોજિતઃ ઇવ પાપમ્ ચરતિ?

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

કામ એષ ક્રોધ એષ રજોગુણસમુદ્ભવઃ ।
મહાશનો મહાપાપ્મા વિદ્ધ્યેનમિહ વૈરિણમ્ ॥ ૩-૩૭॥

કામઃ એષઃ ક્રોધઃ એષઃ રજઃ ગુણ-સમુદ્ભવઃ ।
મહા-અશનઃ મહા-પાપ્મા વિદ્ધિ એનમ્ ઇહ વૈરિણમ્ ॥ ૩-૩૭॥

રજઃ ગુણ-સમુદ્ભવઃ મહા-પાપ્મા મહા-અશનઃ એષઃ કામઃ,
એષઃ ક્રોધઃ (અસ્તિ; ત્વં) એનમ્ ઇહ વૈરિણમ્ વિદ્ધિ ।

ધૂમેનાવ્રિયતે વહ્નિર્યથાદર્શો મલેન ચ ।
યથોલ્બેનાવૃતો ગર્ભસ્તથા તેનેદમાવૃતમ્ ॥ ૩-૩૮॥

ધૂમેન આવ્રિયતે વહ્નિઃ યથા આદર્શઃ મલેન ચ ।
યથા ઉલ્બેન આવૃતઃ ગર્ભઃ તથા તેન ઇદમ્ આવૃતમ્ ॥ ૩-૩૮॥

યથા ધૂમેન વહ્નિઃ, યથા ચ મલેન આદર્શઃ, આવ્રિયતે,
(યથા) ઉલ્બેન ગર્ભઃ આવૃતઃ, તથા તેન ઇદમ્ આવૃતમ્ ।

આવૃતં જ્ઞાનમેતેન જ્ઞાનિનો નિત્યવૈરિણા ।
કામરૂપેણ કૌન્તેય દુષ્પૂરેણાનલેન ચ ॥ ૩-૩૯॥

આવૃતમ્ જ્ઞાનમ્ એતેન જ્ઞાનિનઃ નિત્યવૈરિણા ।
કામરૂપેણ કૌન્તેય દુષ્પૂરેણ અનલેન ચ ॥ ૩-૩૯॥

હે કૌન્તેય! નિત્યવૈરિણા એતેન દુષ્પૂરેણ કામરૂપેણ
ચ અનલેન જ્ઞાનિનઃ જ્ઞાનમ્ આવૃતમ્ ।

ઇન્દ્રિયાણિ મનો બુદ્ધિરસ્યાધિષ્ઠાનમુચ્યતે ।
એતૈર્વિમોહયત્યેષ જ્ઞાનમાવૃત્ય દેહિનમ્ ॥ ૩-૪૦॥

ઇન્દ્રિયાણિ મનઃ બુદ્ધિઃ અસ્ય અધિષ્ઠાનમ્ ઉચ્યતે ।
એતૈઃ વિમોહયતિ એષઃ જ્ઞાનમ્ આવૃત્ય દેહિનમ્ ॥ ૩-૪૦॥

ઇન્દ્રિયાણિ મનઃ બુદ્ધિઃ અસ્ય અધિષ્ઠાનમ્ ઉચ્યતે ।
એષઃ એતૈઃ જ્ઞાનમ્ આવૃત્ય દેહિનમ્ વિમોહયતિ ।

તસ્માત્ત્વમિન્દ્રિયાણ્યાદૌ નિયમ્ય ભરતર્ષભ ।
પાપ્માનં પ્રજહિ હ્યેનં જ્ઞાનવિજ્ઞાનનાશનમ્ ॥ ૩-૪૧॥

તસ્માત્ ત્વમ્ ઇન્દ્રિયાણિ આદૌ નિયમ્ય ભરતર્ષભ ।
પાપ્માનમ્ પ્રજહિ હિ એનં જ્ઞાન-વિજ્ઞાન-નાશનમ્ ॥ ૩-૪૧॥

હે ભરતર્ષભ! તસ્માત્ ત્વમ્ આદૌ ઇન્દ્રિયાણિ નિયમ્ય,
જ્ઞાન-વિજ્ઞાન-નાશનમ્ એનં પાપ્માનમ્ પ્રજહિ હિ ।

ઇન્દ્રિયાણિ પરાણ્યાહુરિન્દ્રિયેભ્યઃ પરં મનઃ ।
મનસસ્તુ પરા બુદ્ધિર્યો બુદ્ધેઃ પરતસ્તુ સઃ ॥ ૩-૪૨॥

ઇન્દ્રિયાણિ પરાણિ આહુઃ ઇન્દ્રિયેભ્યઃ પરમ્ મનઃ ।
મનસઃ તુ પરા બુદ્ધિઃ યઃ બુદ્ધેઃ પરતઃ તુ સઃ ॥ ૩-૪૨॥

ઇન્દ્રિયાણિ પરાણિ આહુઃ, ઇન્દ્રિયેભ્યઃ મનઃ પરમ્, મનસઃ તુ
બુદ્ધિઃ પરા, યઃ તુ બુદ્ધેઃ પરતઃ સઃ (આત્મા અસ્તિ)।

એવં બુદ્ધેઃ પરં બુદ્ધ્વા સંસ્તભ્યાત્માનમાત્મના ।
જહિ શત્રું મહાબાહો કામરૂપં દુરાસદમ્ ॥ ૩-૪૩॥

એવમ્ બુદ્ધેઃ પરમ્ બુદ્ધ્વા સંસ્તભ્ય આત્માનમ્ આત્મના ।
જહિ શત્રુમ્ મહાબાહો કામ-રૂપમ્ દુરાસદમ્ ॥ ૩-૪૩॥

હે મહાબાહો! એવમ્ (આત્માનં) બુદ્ધેઃ પરમ્ બુદ્ધ્વા
આત્મના આત્માનમ્ સંસ્તભ્ય, કામ-રૂપમ્ દુરાસદમ્ શત્રુમ્ જહિ ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
કર્મયોગો નામ તૃતીયોઽધ્યાયઃ ॥ ૩॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્-ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રી-કૃષ્ણ-અર્જુન-સંવાદે
કર્મ-યોગઃ નામ તૃતીયઃ અધ્યાયઃ ॥ ૩ ॥

---

અથ ચતુર્થોઽધ્યાયઃ । જ્ઞાનકર્મસંન્યાસયોગઃ
અથ ચતુર્થોઅઃ અધ્યાયઃ । જ્ઞાન-કર્મ-સંન્યાસ-યોગઃ
શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

ઇમં વિવસ્વતે યોગં પ્રોક્તવાનહમવ્યયમ્ ।
વિવસ્વાન્મનવે પ્રાહ મનુરિક્ષ્વાકવેઽબ્રવીત્ ॥ ૪-૧ ॥

ઇમમ્ વિવસ્વતે યોગમ્ પ્રોક્તવાન્ અહમ્ અવ્યયમ્ ।
વિવસ્વાન્ મનવે પ્રાહ મનુઃ ઇક્ષ્વાકવે અબ્રવીત્ ॥ ૪-૧ ॥

અહમ્ ઇમમ્ અવ્યયમ્ યોગમ્ વિવસ્વતે પ્રોક્તવાન્ ।
વિવસ્વાન્ મનવે પ્રાહ । મનુઃ ઇક્ષ્વાકવે અબ્રવીત્ ।

એવં પરમ્પરાપ્રાપ્તમિમં રાજર્ષયો વિદુઃ ।
સ કાલેનેહ મહતા યોગો નષ્ટઃ પરન્તપ ॥ ૪-૨ ॥

એવમ્ પરમ્પરા-પ્રાપ્તમ્ ઇમમ્ રાજર્ષયઃ વિદુઃ ।
સઃ કાલેન ઇહ મહતા યોગઃ નષ્ટઃ પરન્તપ ॥ ૪-૨ ॥

હે પરન્તપ! એવમ્ પરમ્પરા-પ્રાપ્તમ્ ઇમમ્ (યોગં)
રાજર્ષયઃ વિદુઃ । સઃ યોગઃ મહતા કાલેન ઇહ નષ્ટઃ ।

સ એવાયં મયા તેઽદ્ય યોગઃ પ્રોક્તઃ પુરાતનઃ ।
ભક્તોઽસિ મે સખા ચેતિ રહસ્યં હ્યેતદુત્તમમ્ ॥ ૪-૩ ॥

સઃ એવ અયમ્ મયા તે અદ્ય યોગઃ પ્રોક્તઃ પુરાતનઃ ।
ભક્તઃ અસિ મે સખા ચ ઇતિ રહસ્યમ્ હિ એતત્ ઉત્તમમ્ ॥ ૪-૩ ॥

સઃ એવ અયમ્ પુરાતનઃ યોગઃ મયા અદ્ય તે પ્રોક્તઃ । (ત્વં) મે
ભક્તઃ સખા ચ અસિ ઇતિ, હિ એતત્ ઉત્તમમ્ રહસ્યમ્ ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

અપરં ભવતો જન્મ પરં જન્મ વિવસ્વતઃ ।
કથમેતદ્વિજાનીયાં ત્વમાદૌ પ્રોક્તવાનિતિ ॥ ૪-૪॥

અપરમ્ ભવતઃ જન્મ પરમ્ જન્મ વિવસ્વતઃ ।
કથમ્ એતત્ વિજાનીયામ્ ત્વમ્ આદૌ પ્રોક્તવાન્ ઇતિ ॥ ૪-૪॥

ભવતઃ જન્મ અપરમ્, વિવસ્વતઃ જન્મ પરમ્, (અતઃ) ત્વમ્
આદૌ એતત્ પ્રોક્તવાન્ ઇતિ કથમ્ વિજાનીયામ્ ?

શ્રીભગવાનુવાચ ।
શ્રીભગવાનુવાચ ।

બહૂનિ મે વ્યતીતાનિ જન્માનિ તવ ચાર્જુન ।
તાન્યહં વેદ સર્વાણિ ન ત્વં વેત્થ પરન્તપ ॥ ૪-૫॥

બહૂનિ મે વ્યતીતાનિ જન્માનિ તવ ચ અર્જુન ।
તાનિ અહમ્ વેદ સર્વાણિ ન ત્વમ્ વેત્થ પરન્તપ ॥ ૪-૫॥

હે પરન્તપ અર્જુન! મે તવ ચ બહૂનિ જન્માનિ વ્યતીતાનિ;
તાનિ સર્વાણિ અહમ્ વેદ, ત્વમ્ ન વેત્થ ।

અજોઽપિ સન્નવ્યયાત્મા ભૂતાનામીશ્વરોઽપિ સન્ ।
પ્રકૃતિં સ્વામધિષ્ઠાય સમ્ભવામ્યાત્મમાયયા ॥ ૪-૬॥

અજઃ અપિ સન્ અવ્યય-આત્મા ભૂતાનામ્ ઈશ્વરઃ અપિ સન્ ।
પ્રકૃતિમ્ સ્વામ્ અધિષ્ઠાય સમ્ભવામિ આત્મ-માયયા ॥ ૪-૬॥

(અહં) અજઃ અવ્યય-આત્મા અપિ સન્, ભૂતાનામ્ ઈશ્વરઃ અપિ સન્,
સ્વામ્ પ્રકૃતિમ્ અધિષ્ઠાય, આત્મ-માયયા સમ્ભવામિ ।

યદા યદા હિ ધર્મસ્ય ગ્લાનિર્ભવતિ ભારત ।
અભ્યુત્થાનમધર્મસ્ય તદાત્માનં સૃજામ્યહમ્ ॥ ૪-૭॥

યદા યદા હિ ધર્મસ્ય ગ્લાનિઃ ભવતિ ભારત ।
અભ્યુત્થાનમ્ અધર્મસ્ય તદા આત્માનમ્ સૃજામિ અહમ્ ॥ ૪-૭॥

હે ભારત! યદા યદા હિ ધર્મસ્ય ગ્લાનિઃ, અધર્મસ્ય (ચ)
અભ્યુત્થાનમ્ ભવતિ, તદા અહમ્ આત્માનમ્ સૃજામિ ।

પરિત્રાણાય સાધૂનાં વિનાશાય ચ દુષ્કૃતામ્ ।
ધર્મસંસ્થાપનાર્થાય સમ્ભવામિ યુગે યુગે ॥ ૪-૮॥

પરિત્રાણાય સાધૂનામ્ વિનાશાય ચ દુષ્કૃતામ્ ।
ધર્મ-સંસ્થાપન-અર્થાય સમ્ભવામિ યુગે યુગે ॥ ૪-૮॥

સાધૂનામ્ પરિત્રાણાય, દુષ્કૃતામ્ વિનાશાય,
ધર્મ-સંસ્થાપન-અર્થાય ચ, (અહં) યુગે યુગે સમ્ભવામિ ।

જન્મ કર્મ ચ મે દિવ્યમેવં યો વેત્તિ તત્ત્વતઃ ।
ત્યક્ત્વા દેહં પુનર્જન્મ નૈતિ મામેતિ સોઽર્જુન ॥ ૪-૯॥

જન્મ કર્મ ચ મે દિવ્યમ્ એવમ્ યઃ વેત્તિ તત્ત્વતઃ ।
ત્યક્ત્વા દેહમ્ પુનઃ જન્મ ન એતિ મામ્ એતિ સઃ અર્જુન ॥ ૪-૯॥

હે અર્જુન! યઃ મે દિવ્યમ્ જન્મ કર્મ ચ એવમ્ તત્ત્વતઃ વેત્તિ,
સઃ દેહમ્ ત્યક્ત્વા, પુનઃ જન્મ ન એતિ, (કિન્તુ સઃ) મામ્ એતિ ।

વીતરાગભયક્રોધા મન્મયા મામુપાશ્રિતાઃ ।
બહવો જ્ઞાનતપસા પૂતા મદ્ભાવમાગતાઃ ॥ ૪-૧૦॥

વીત-રાગ-ભય-ક્રોધાઃ મન્મયાઃ મામ્ ઉપાશ્રિતાઃ ।
બહવઃ જ્ઞાન-તપસા પૂતાઃ મદ્ભાવમ્ આગતાઃ ॥ ૪-૧૦॥

વીત-રાગ-ભય-ક્રોધાઃ, મન્મયાઃ મામ્ ઉપાશ્રિતાઃ,
જ્ઞાન-તપસા પૂતાઃ, બહવઃ મદ્ભાવમ્ આગતાઃ ।

યે યથા માં પ્રપદ્યન્તે તાંસ્તથૈવ ભજામ્યહમ્ ।
મમ વર્ત્માનુવર્તન્તે મનુષ્યાઃ પાર્થ સર્વશઃ ॥ ૪-૧૧॥

યે યથા મામ્ પ્રપદ્યન્તે તાન્ તથા એવ ભજામ્યિ અહમ્ ।
મમ વર્ત્મ અનુવર્તન્તે મનુષ્યાઃ પાર્થ સર્વશઃ ॥ ૪-૧૧॥

યે યથા મામ્ પ્રપદ્યન્તે, તાન્ તથા એવ અહમ્ ભજામિ ।
હે પાર્થ! મનુષ્યાઃ સર્વશઃ મમ વર્ત્મ અનુવર્તન્તે ।

કાઙ્ક્ષન્તઃ કર્મણાં સિદ્ધિં યજન્ત ઇહ દેવતાઃ ।
ક્ષિપ્રં હિ માનુષે લોકે સિદ્ધિર્ભવતિ કર્મજા ॥ ૪-૧૨॥

કાઙ્ક્ષન્તઃ કર્મણામ્ સિદ્ધિમ્ યજન્તે ઇહ દેવતાઃ ।
ક્ષિપ્રમ્ હિ માનુષે લોકે સિદ્ધિઃ ભવતિ કર્મજા ॥ ૪-૧૨॥

કર્મણામ્ સિદ્ધિમ્ કાઙ્ક્ષન્તઃ (મનુષ્યાઃ) ઇહ દેવતાઃ યજન્તે;

હિ માનુષે લોકે કર્મજા સિદ્ધિઃ ક્ષિપ્રમ્ ભવતિ ।

ચાતુર્વર્ણ્યં મયા સૃષ્ટં ગુણકર્મવિભાગશઃ ।
તસ્ય કર્તારમપિ માં વિદ્ધ્યકર્તારમવ્યયમ્ ॥ ૪-૧૩ ॥

ચાતુર્વર્ણ્યમ્ મયા સૃષ્ટમ્ ગુણ-કર્મ-વિભાગશઃ ।
તસ્ય કર્તારમ્ અપિ મામ્ વિદ્ધિ અકર્તારમ્ અવ્યયમ્ ॥ ૪-૧૩ ॥

મયા ગુણ-કર્મ-વિભાગશઃ ચાતુર્વર્ણ્યમ્ સૃષ્ટમ્,
તસ્ય કર્તારમ્ અપિ મામ્ અવ્યયમ્ અકર્તારમ્ વિદ્ધિ ।

ન માં કર્માણિ લિમ્પન્તિ ન મે કર્મફલે સ્પૃહા ।
ઇતિ માં યોઽભિજાનાતિ કર્મભિર્ન સ બધ્યતે ॥ ૪-૧૪ ॥

ન મામ્ કર્માણિ લિમ્પન્તિ ન મે કર્મ-ફલે સ્પૃહા ।
ઇતિ મામ્ યઃ અભિજાનાતિ કર્મભિઃ ન સ બધ્યતે ॥ ૪-૧૪ ॥

કર્મ-ફલે મે સ્પૃહા ન (અતઃ) કર્માણિ મામ્ ન લિમ્પન્તિ ।
ઇતિ યઃ મામ્ અભિજાનાતિ, સઃ કર્મભિઃ ન બધ્યતે ।

એવં જ્ઞાત્વા કૃતં કર્મ પૂર્વૈરપિ મુમુક્ષુભિઃ ।
કુરુ કર્મૈવ તસ્માત્ત્વં પૂર્વૈઃ પૂર્વતરં કૃતમ્ ॥ ૪-૧૫ ॥

એવમ્ જ્ઞાત્વા કૃતમ્ કર્મ પૂર્વૈઃ અપિ મુમુક્ષુભિઃ ।
કુરુ કર્મ એવ તસ્માત્ ત્વમ્ પૂર્વૈઃ પૂર્વતરમ્ કૃતમ્ ॥ ૪-૧૫ ॥

એવમ્ જ્ઞાત્વા પૂર્વૈઃ મુમુક્ષુભિઃ અપિ કર્મ કૃતમ્ ।
તસ્માત્ ત્વમ્ પૂર્વૈઃ પૂર્વતરમ્ કૃતમ્ એવ કર્મ કુરુ ।

કિં કર્મ કિમકર્મેતિ કવયોઽપ્યત્ર મોહિતાઃ ।
તત્તે કર્મ પ્રવક્ષ્યામિ યજ્જ્ઞાત્વા મોક્ષ્યસેઽશુભાત્ ॥ ૪-૧૬ ॥

કિમ્ કર્મ કિમ્ અકર્મ ઇતિ કવયઃ અપિ અત્ર મોહિતાઃ ।
તત્ તે કર્મ પ્રવક્ષ્યામિ યત્ જ્ઞાત્વા મોક્ષ્યસે અશુભાત્ ॥ ૪-૧૬ ॥

'કિમ્ કર્મ, કિમ્ અકર્મ' ઇતિ અત્ર કવયઃ અપિ મોહિતાઃ ।
તત્ કર્મ તે પ્રવક્ષ્યામિ, યત્ જ્ઞાત્વા અશુભાત્ મોક્ષ્યસે ।

કર્મણો હ્યપિ બોદ્ધવ્યં બોદ્ધવ્યં ચ વિકર્મણઃ ।
અકર્મણશ્ચ બોદ્ધવ્યં ગહના કર્મણો ગતિઃ ॥ ૪-૧૭ ॥

કર્મણઃ હિ અપિ બોદ્ધવ્યમ્ બોદ્ધવ્યમ્ ચ વિકર્મણઃ ।
અકર્મણઃ ચ બોદ્ધવ્યમ્ ગહના કર્મણઃ ગતિઃ ॥ ૪-૧૭॥

કર્મણઃ (તત્ત્વં) હિ અપિ બોદ્ધવ્યમ્, વિકર્મણઃ ચ (તત્ત્વં)
બોદ્ધવ્યમ્, (તથા) અકર્મણઃ ચ (તત્ત્વં) બોદ્ધવ્યમ્,
કર્મણઃ ગતિઃ ગહના ।

કર્મણ્યકર્મ યઃ પશ્યેદકર્મણિ ચ કર્મ યઃ ।
સ બુદ્ધિમાન્મનુષ્યેષુ સ યુક્તઃ કૃત્સ્નકર્મકૃત્ ॥ ૪-૧૮॥

કર્મણિ અકર્મ યઃ પશ્યેત્ અકર્મણિ ચ કર્મ યઃ ।
સઃ બુદ્ધિમાન્ મનુષ્યેષુ સઃ યુક્તઃ કૃત્સ્ન-કર્મ-કૃત્ ॥ ૪-૧૮॥

યઃ કર્મણિ અકર્મ પશ્યેત્ અકર્મણિ ચ યઃ કર્મ ( પશ્યેત્) સઃ
મનુષ્યેષુ બુદ્ધિમાન્, સઃ યુક્તઃ, (સઃ) કૃત્સ્ન-કર્મ-કૃત્ ।

યસ્ય સર્વે સમારમ્ભાઃ કામસઙ્કલ્પવર્જિતાઃ ।
જ્ઞાનાગ્નિદગ્ધકર્માણં તમાહુઃ પણ્ડિતં બુધાઃ ॥ ૪-૧૯॥

યસ્ય સર્વે સમારમ્ભાઃ કામ-સઙ્કલ્પ-વર્જિતાઃ ।
જ્ઞાન-અગ્નિ-દગ્ધ-કર્માણમ્ તમ્ આહુઃ પણ્ડિતમ્ બુધાઃ ॥ ૪-૧૯॥

યસ્ય સર્વે સમારમ્ભાઃ કામ-સઙ્કલ્પ-વર્જિતાઃ, તમ્
જ્ઞાન-અગ્નિ-દગ્ધ-કર્માણમ્ બુધાઃ પણ્ડિતમ્ આહુઃ ।

ત્યક્ત્વા કર્મફલાસઙ્ગં નિત્યતૃપ્તો નિરાશ્રયઃ ।
કર્મણ્યભિપ્રવૃત્તોઽપિ નૈવ કિઞ્ચિત્કરોતિ સઃ ॥ ૪-૨૦॥

ત્યક્ત્વા કર્મ-ફલ-આસઙ્ગમ્ નિત્ય-તૃપ્તઃ નિરાશ્રયઃ ।
કર્મણિ અભિપ્રવૃત્તઃ અપિ ન એવ કિઞ્ચિત્ કરોતિ સઃ ॥ ૪-૨૦॥

(યઃ) કર્મ-ફલ-આસઙ્ગમ્ ત્યક્ત્વા નિત્ય-તૃપ્તઃ નિરાશ્રયઃ,
સઃ કર્મણિ અભિપ્રવૃત્તઃ અપિ ન એવ કિઞ્ચિત્ કરોતિ ।

નિરાશીર્યતચિત્તાત્મા ત્યક્તસર્વપરિગ્રહઃ ।
શારીરં કેવલં કર્મ કુર્વન્નાપ્નોતિ કિલ્બિષમ્ ॥ ૪-૨૧॥

નિરાશીઃ યત-ચિત્ત-આત્મા ત્યક્ત-સર્વ-પરિગ્રહઃ ।
શારીરમ્ કેવલમ્ કર્મ કુર્વન્ ન આપ્નોતિ કિલ્બિષમ્ ॥ ૪-૨૧॥

નિરાશીઃ યત-ચિત્ત-આત્મા ત્યક્ત-સર્વ-પરિગ્રહઃ, કેવલમ્

શારીરમ્ કર્મ કુર્વન્ કિલ્બિષમ્ ન આપ્નોતિ ।

યદૃચ્છાલાભસન્તુષ્ટો દ્વન્દ્વાતીતો વિમત્સરઃ ।
સમઃ સિદ્ધાવસિદ્ધૌ ચ કૃત્વાપિ ન નિબધ્યતે ॥ ૪-૨૨॥

યદૃચ્છા-લાભ-સન્તુષ્ટઃ દ્વન્દ્વ-અતીતઃ વિમત્સરઃ ।
સમઃ સિદ્ધૌ અસિદ્ધૌ ચ કૃત્વા અપિ ન નિબધ્યતે ॥ ૪-૨૨॥

યદૃચ્છા-લાભ-સન્તુષ્ટઃ દ્વન્દ્વ-અતીતઃ વિમત્સરઃ સિદ્ધૌ
અસિદ્ધૌ ચ સમઃ, કૃત્વા અપિ ન નિબધ્યતે ।

ગતસઙ્ગસ્ય મુક્તસ્ય જ્ઞાનાવસ્થિતચેતસઃ ।
યજ્ઞાયાચરતઃ કર્મ સમગ્રં પ્રવિલીયતે ॥ ૪-૨૩॥

ગત-સઙ્ગસ્ય મુક્તસ્ય જ્ઞાન-અવસ્થિત-ચેતસઃ ।
યજ્ઞાય આચરતઃ કર્મ સમગ્રમ્ પ્રવિલીયતે ॥ ૪-૨૩॥

ગત-સઙ્ગસ્ય જ્ઞાન-અવસ્થિત-ચેતસઃ યજ્ઞાય આચરતઃ
મુક્તસ્ય કર્મ સમગ્રમ્ પ્રવિલીયતે ।

બ્રહ્માર્પણં બ્રહ્મ હવિર્બ્રહ્માગ્નૌ બ્રહ્મણા હુતમ્ ।
બ્રહ્મૈવ તેન ગન્તવ્યં બ્રહ્મકર્મસમાધિના ॥ ૪-૨૪॥

બ્રહ્મ-અર્પણં બ્રહ્મ હવિઃ બ્રહ્મ-અગ્નૌ બ્રહ્મણા હુતમ્ ।
બ્રહ્મ એવ તેન ગન્તવ્યમ્ બ્રહ્મ-કર્મ-સમાધિના ॥ ૪-૨૪॥

બ્રહ્મ અર્પણં, બ્રહ્મ હવિઃ, બ્રહ્મ-અગ્નૌ બ્રહ્મણા હુતમ્,
બ્રહ્મ-કર્મ-સમાધિના તેન બ્રહ્મ એવ ગન્તવ્યમ્ ।

દૈવમેવાપરે યજ્ઞં યોગિનઃ પર્યુપાસતે ।
બ્રહ્માગ્નાવપરે યજ્ઞં યજ્ઞેનૈવોપજુહ્વતિ ॥ ૪-૨૫॥

દૈવમ્ એવ અપરે યજ્ઞમ્ યોગિનઃ પર્યુપાસતે ।
બ્રહ્મ-અગ્નૌ અપરે યજ્ઞં યજ્ઞેન એવ ઉપજુહ્વતિ ॥ ૪-૨૫॥

અપરે યોગિનઃ દૈવમ્ એવ યજ્ઞમ્ પર્યુપાસતે; અપરે
બ્રહ્મ-અગ્નૌ યજ્ઞેન યજ્ઞં એવ ઉપજુહ્વતિ ।

શ્રોત્રાદીનીન્દ્રિયાણ્યન્યે સંયમાગ્નિષુ જુહ્વતિ ।
શબ્દાદીન્વિષયાનન્ય ઇન્દ્રિયાગ્નિષુ જુહ્વતિ ॥ ૪-૨૬॥

શ્રોત્ર-આદીનિ ઇન્દ્રિયાણિ અન્યે સંયમ-અગ્નિષુ જુહ્વતિ ।
શબ્દ-આદીન્ વિષયાન્ અન્યે ઇન્દ્રિય-અગ્નિષુ જુહ્વતિ ॥ ૪-૨૬॥

અન્યે શ્રોત્ર-આદીનિ ઇન્દ્રિયાણિ સંયમ-અગ્નિષુ જુહ્વતિ, અન્યે
શબ્દ-આદીન્ વિષયાન્ ઇન્દ્રિય-અગ્નિષુ જુહ્વતિ ।

સર્વાણીન્દ્રિયકર્માણિ પ્રાણકર્માણિ ચાપરે ।
આત્મસંયમયોગાગ્નૌ જુહ્વતિ જ્ઞાનદીપિતે ॥ ૪-૨૭॥

સર્વાણિ ઇન્દ્રિય-કર્માણિ પ્રાણ-કર્માણિ ચ અપરે ।
આત્મ-સંયમ-યોગ-અગ્નૌ જુહ્વતિ જ્ઞાન-દીપિતે ॥ ૪-૨૭॥

અપરે જ્ઞાન-દીપિતે આત્મ-સંયમ-યોગ-અગ્નૌ સર્વાણિ
ઇન્દ્રિય-કર્માણિ પ્રાણ-કર્માણિ ચ જુહ્વતિ ।

દ્રવ્યયજ્ઞાસ્તપોયજ્ઞા યોગયજ્ઞાસ્તથાપરે ।
સ્વાધ્યાયજ્ઞાનયજ્ઞાશ્ચ યતયઃ સંશિતવ્રતાઃ ॥ ૪-૨૮॥

દ્રવ્ય-યજ્ઞાઃ તપો-યજ્ઞાઃ યોગ-યજ્ઞાઃ તથા અપરે ।
સ્વાધ્યાય-જ્ઞાન-યજ્ઞાઃ ચ યતયઃ સંશિતવ્રતાઃ ॥ ૪-૨૮॥

અપરે સંશિતવ્રતાઃ દ્રવ્ય-યજ્ઞાઃ તપો-યજ્ઞાઃ યોગ-યજ્ઞાઃ
તથા ચ સ્વાધ્યાય-જ્ઞાન-યજ્ઞાઃ યતયઃ (સન્તિ) ।

અપાને જુહ્વતિ પ્રાણં પ્રાણેઽપાનં તથાપરે ।
પ્રાણાપાનગતી રુદ્ધ્વા પ્રાણાયામપરાયણાઃ ॥ ૪-૨૯॥

અપાને જુહ્વતિ પ્રાણમ્ પ્રાણે અપાનમ્ તથા અપરે ।
પ્રાણ-અપાન-ગતી રુદ્ધ્વા પ્રાણાયામ-પરાયણાઃ ॥ ૪-૨૯॥

અપાને પ્રાણમ્ પ્રાણે અપાનમ્ જુહ્વતિ । (તથા અપરે)
પ્રાણ-અપાન-ગતી રુદ્ધ્વા પ્રાણાયામ-પરાયણાઃ (સન્તિ) ।

અપરે નિયતાહારાઃ પ્રાણાન્પ્રાણેષુ જુહ્વતિ ।
સર્વેઽપ્યેતે યજ્ઞવિદો યજ્ઞક્ષપિતકલ્મષાઃ ॥ ૪-૩૦॥

અપરે નિયત-આહારાઃ પ્રાણાન્ પ્રાણેષુ જુહ્વતિ ।
સર્વે અપિ એતે યજ્ઞવિદઃ યજ્ઞ-ક્ષપિત-કલ્મષાઃ ॥ ૪-૩૦॥

અપરે નિયત-આહારાઃ પ્રાણાન્ પ્રાણેષુ જુહ્વતિ । એતે સર્વે અપિ
યજ્ઞવિદઃ યજ્ઞ-ક્ષપિત-કલ્મષાઃ (સન્તિ) ।

યજ્ઞશિષ્ટામૃતભુજો યાન્તિ બ્રહ્મ સનાતનમ્ ।
નાયં લોકોઽસ્ત્યયજ્ઞસ્ય કુતોઽન્યઃ કુરુસત્તમ ॥ ૪-૩૧॥

યજ્ઞ-શિષ્ટ-અમૃત-ભુજઃ યાન્તિ બ્રહ્મ સનાતનમ્ ।
નાયમ્ લોકઃ અસ્તિ અયજ્ઞસ્ય કુતઃ અન્યઃ કુરુસત્તમ ॥ ૪-૩૧॥

હે કુરુસત્તમ! યજ્ઞ-શિષ્ટ-અમૃત-ભુજઃ સનાતનમ્ બ્રહ્મ યાન્તિ ।
અયજ્ઞસ્ય અયમ્ લોકઃ ન અસ્તિ, કુતઃ અન્યઃ ?

એવં બહુવિધા યજ્ઞા વિતતા બ્રહ્મણો મુખે ।
કર્મજાન્વિદ્ધિ તાન્સર્વાનેવં જ્ઞાત્વા વિમોક્ષ્યસે ॥ ૪-૩૨॥

એવમ્ બહુવિધાઃ યજ્ઞાઃ વિતતાઃ બ્રહ્મણઃ મુખે ।
કર્મજાન્ વિદ્ધિ તાન્ સર્વાન્ એવમ્ જ્ઞાત્વા વિમોક્ષ્યસે ॥ ૪-૩૨॥

એવમ્ બહુવિધાઃ યજ્ઞાઃ બ્રહ્મણઃ મુખે વિતતાઃ (સન્તિ, ત્વં)
તાન્ સર્વાન્ કર્મજાન્ વિદ્ધિ । એવમ્ જ્ઞાત્વા (ત્વં) વિમોક્ષ્યસે ।

શ્રેયાન્દ્રવ્યમયાદ્યજ્ઞાજ્જ્ઞાનયજ્ઞઃ પરન્તપ ।
સર્વં કર્માખિલં પાર્થ જ્ઞાને પરિસમાપ્યતે ॥ ૪-૩૩॥

શ્રેયાન્ દ્રવ્યમયાત્ યજ્ઞાત્ જ્ઞાન-યજ્ઞઃ પરન્તપ ।
સર્વમ્ કર્મ-અખિલમ્ પાર્થ જ્ઞાને પરિસમાપ્યતે ॥ ૪-૩૩॥

હે પરન્તપ! દ્રવ્યમયાત્ યજ્ઞાત્ જ્ઞાન-યજ્ઞઃ શ્રેયાન્ ।
હે પાર્થ! સર્વમ્ અખિલમ્ કર્મ જ્ઞાને પરિસમાપ્યતે ।

તદ્વિદ્ધિ પ્રણિપાતેન પરિપ્રશ્નેન સેવયા ।
ઉપદેક્ષ્યન્તિ તે જ્ઞાનં જ્ઞાનિનસ્તત્ત્વદર્શિનઃ ॥ ૪-૩૪॥

તત્ વિદ્ધિ પ્રણિપાતેન પરિપ્રશ્નેન સેવયા ।
ઉપદેક્ષ્યન્તિ તે જ્ઞાનમ્ જ્ઞાનિનઃ તત્ત્વ-દર્શિનઃ ॥ ૪-૩૪॥

પ્રણિપાતેન પરિપ્રશ્નેન સેવયા તત્ત્વ-દર્શિનઃ જ્ઞાનિનઃ
જ્ઞાનમ્ તે ઉપદેક્ષ્યન્તિ તત્ (ત્વં) વિદ્ધિ ।

યજ્જ્ઞાત્વા ન પુનર્મોહમેવં યાસ્યસિ પાણ્ડવ ।
યેન ભૂતાન્યશેષાણ દ્રક્ષ્યસ્યાત્મન્યથો મયિ ॥ ૪-૩૫॥

યત્ જ્ઞાત્વા ન પુનઃ મોહમ્ એવમ્ યાસ્યસિ પાણ્ડવ ।

યેન ભૂતાનિ અશેષાણિ દ્રક્ષ્યસિ આત્મનિ અથો મયિ ॥ ૪-૩૫॥

હે પાણ્ડવ! યત્ જ્ઞાત્વા (ત્વં) પુનઃ એવમ્ મોહમ્
ન યાસ્યસિ, યેન ભૂતાનિ અશેષેણ આત્મનિ અથો મયિ દ્રક્ષ્યસિ ।

અપિ ચેદસિ પાપેભ્યઃ સર્વેભ્યઃ પાપકૃત્તમઃ ।
સર્વં જ્ઞાનપ્લવેનૈવ વૃજિનં સન્તરિષ્યસિ ॥ ૪-૩૬॥

અપિ ચેત્ અસિ પાપેભ્યઃ સર્વેભ્યઃ પાપ-કૃત્તમઃ ।
સર્વમ્ જ્ઞાન-પ્લવેન એવ વૃજિનમ્ સન્તરિષ્યસિ ॥ ૪-૩૬॥

(ત્વં) સર્વેભ્યઃ પાપેભ્યઃ અપિ પાપ-કૃત્તમઃ અસિ ચેત્ સર્વમ્
વૃજિનમ્ જ્ઞાન-પ્લવેન એવ સન્તરિષ્યસિ ।

યથૈધાંસિ સમિદ્ધોઽગ્નિર્ભસ્મસાત્કુરુતેઽર્જુન ।
જ્ઞાનાગ્નિઃ સર્વકર્માણિ ભસ્મસાત્કુરુતે તથા ॥ ૪-૩૭॥

યથા એધાંસિ સમિદ્ધઃ અગ્નિઃ ભસ્મસાત્ કુરુતે અર્જુન ।
જ્ઞાન-અગ્નિઃ સર્વ-કર્માણિ ભસ્મસાત્ કુરુતે તથા ॥ ૪-૩૭॥

હે અર્જુન! યથા સમિદ્ધઃ અગ્નિઃ એધાંસિ ભસ્મસાત્ કુરુતે,
તથા જ્ઞાન-અગ્નિઃ સર્વ-કર્માણિ ભસ્મસાત્ કુરુતે ।

ન હિ જ્ઞાનેન સદૃશં પવિત્રમિહ વિદ્યતે ।
તત્સ્વયં યોગસંસિદ્ધઃ કાલેનાત્મનિ વિન્દતિ ॥ ૪-૩૮॥

ન હિ જ્ઞાનેન સદૃશમ્ પવિત્રમ્ ઇહ વિદ્યતે ।
તત્ સ્વયં યોગ-સંસિદ્ધઃ કાલેન આત્મનિ વિન્દતિ ॥ ૪-૩૮॥

હિ ઇહ જ્ઞાનેન સદૃશમ્ પવિત્રમ્ ન વિદ્યતે । તત્ (જ્ઞાનં)
સ્વયં યોગ-સંસિદ્ધઃ કાલેન આત્મનિ વિન્દતિ ।

શ્રદ્ધાવાઁલ્લભતે જ્ઞાનં તત્પરઃ સંયતેન્દ્રિયઃ ।
જ્ઞાનં લબ્ધ્વા પરાં શાન્તિમચિરેણાધિગચ્છતિ ॥ ૪-૩૯॥

શ્રદ્ધાવાન્ લભતે જ્ઞાનમ્ તત્પરઃ સંયત-ઇન્દ્રિયઃ ।
જ્ઞાનમ્ લબ્ધ્વા પરામ્ શાન્તિમ્ અચિરેણાધિગચ્છતિ ॥ ૪-૩૯॥

શ્રદ્ધાવાન્, તત્પરઃ, સંયત-ઇન્દ્રિયઃ જ્ઞાનમ્ લભતે ।
જ્ઞાનમ્ લબ્ધ્વા અચિરેણ પરામ્ શાન્તિમ્ અધિગચ્છતિ ।

અજ્ઞશ્ચાશ્રદ્દ્ધાનશ્ચ સંશયાત્મા વિનશ્યતિ ।
નાયં લોકોઽસ્તિ ન પરો ન સુખં સંશયાત્મનઃ ॥ ૪-૪૦॥

અજ્ઞઃ ચ અશ્રદ્દ્ધાનઃ ચ સંશય-આત્મા વિનશ્યતિ ।
ન અયં લોકઃ અસ્તિ ન પરઃ ન સુખં સંશયાત્મનઃ ॥ ૪-૪૦॥

અજ્ઞઃ ચ અશ્રદ્દ્ધાનઃ ચ સંશય-આત્મા વિનશ્યતિ ।
સંશયાત્મનઃ અયં લોકઃ ન અસ્તિ, ન પરઃ (લોકઃ),
ન (ચ) સુખં (અસ્તિ)।

યોગસંન્યસ્તકર્માણં જ્ઞાનસઞ્છિન્નસંશયમ્ ।
આત્મવન્તં ન કર્માણિ નિબધ્નન્તિ ધનઞ્જય ॥ ૪-૪૧॥

યોગ-સંન્યસ્તકર્માણં જ્ઞાનસઞ્છિન્નસંશયમ્ ।
આત્મવન્તં ન કર્માણિ નિબધ્નન્તિ ધનઞ્જય ॥ ૪-૪૧॥

હે ધનઞ્જય! યોગ-સંન્યસ્તકર્માણં જ્ઞાનસઞ્છિન્નસંશયમ્
આત્મવન્તં કર્માણિ ન નિબધ્નન્તિ ।

તસ્માદજ્ઞાનસમ્ભૂતં હૃત્સ્થં જ્ઞાનાસિનાત્મનઃ ।
છિત્ત્વૈનં સંશયં યોગમાતિષ્ઠોત્તિષ્ઠ ભારત ॥ ૪-૪૨॥

તસ્માત્ અજ્ઞાન-સમ્ભૂતમ્ હૃત્સ્થમ્ જ્ઞાન-અસિના-આત્મનઃ ।
છિત્ત્વા એનમ્ સંશયમ્ યોગમ્ આતિષ્ઠ ઉત્તિષ્ઠ ભારત ॥ ૪-૪૨॥

હે ભારત!તસ્માત્ અજ્ઞાન-સમ્ભૂતમ્ હૃત્સ્થમ્ આત્મનઃ
એનમ્ સંશયમ્ જ્ઞાન-અસિના છિત્ત્વા યોગમ્ આતિષ્ઠ,
(યુદ્ધાય ચ) ઉત્તિષ્ઠ ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
જ્ઞાનકર્મસંન્યાસયોગો નામ ચતુર્થોઽધ્યાયઃ ॥ ૪॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદે
જ્ઞાન-કર્મ-સંન્યાસ-યોગઃ નામ ચતુર્થઃ અધ્યાયઃ ॥ ૪॥

---

અથ પઞ્ચમોઽધ્યાયઃ ।   સંન્યાસયોગઃ ।

અથ પઞ્ચમઃ અધ્યાયઃ । સંન્યાસ-યોગઃ ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

સંન્યાસં કર્મણાં કૃષ્ણ પુનર્યોગં ચ શંસસિ ।
યચ્છ્રેય એતયોરેકં તન્મે બ્રૂહિ સુનિશ્ચિતમ્ ॥ ૫-૧॥

સંન્યાસમ્ કર્મણામ્ કૃષ્ણ પુનઃ યોગમ્ ચ શંસસિ ।
યત્ શ્રેયઃ એતયોઃ એકમ્ તત્ મે બ્રૂહિ સુનિશ્ચિતમ્ ॥ ૫-૧॥

હે કૃષ્ણ! કર્મણામ્ સંન્યાસમ્, પુનઃ યોગમ્ ચ શંસસિ;
એતયોઃ યત્ એકમ્ શ્રેયઃ તત્ મે સુનિશ્ચિતમ્ બ્રૂહિ ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

સંન્યાસઃ કર્મયોગશ્ચ નિઃશ્રેયસકરાવુભૌ ।
તયોસ્તુ કર્મસંન્યાસાત્કર્મયોગો વિશિષ્યતે ॥ ૫-૨॥

સંન્યાસઃ કર્મ-યોગઃ ચ નિઃશ્રેયસકરૌ ઉભૌ ।
તયોઃ તુ કર્મ-સંન્યાસાત્ કર્મ-યોગઃ વિશિષ્યતે ॥ ૫-૨॥

સંન્યાસઃ કર્મ-યોગઃ ચ ઉભૌ નિઃશ્રેયસકરૌ;
તયોઃ તુ કર્મ-સંન્યાસાત્ કર્મ-યોગઃ વિશિષ્યતે ।

જ્ઞેયઃ સ નિત્યસંન્યાસી યો ન દ્વેષ્ટિ ન કાઙ્ક્ષતિ ।
નિર્દ્વન્દ્વો હિ મહાબાહો સુખં બન્ધાત્પ્રમુચ્યતે ॥ ૫-૩॥

જ્ઞેયઃ સઃ નિત્ય-સંન્યાસી યઃ ન દ્વેષ્ટિ ન કાઙ્ક્ષતિ ।
નિર્દ્વન્દ્વઃ હિ મહાબાહો સુખમ્ બન્ધાત્ પ્રમુચ્યતે ॥ ૫-૩॥

યઃ ન દ્વેષ્ટિ, ન (ચ) કાઙ્ક્ષતિ, સઃ નિત્ય-સંન્યાસી
જ્ઞેયઃ; મહાબાહો! હિ નિર્દ્વન્દ્વઃ બન્ધાત્ સુખમ્ પ્રમુચ્યતે ।

સાઙ્ખ્યયોગૌ પૃથગ્બાલાઃ પ્રવદન્તિ ન પણ્ડિતાઃ ।
એકમપ્યાસ્થિતઃ સમ્યગુભયોર્વિન્દતે ફલમ્ ॥ ૫-૪॥

સાઙ્ખ્ય-યોગૌ પૃથક્ બાલાઃ પ્રવદન્તિ ન પણ્ડિતાઃ ।
એકમ્ અપિ આસ્થિતઃ સમ્યક્ ઉભયોઃ વિન્દતે ફલમ્ ॥ ૫-૪॥

સાઙ્ખ્ય-યોગૌ પૃથક્ (ઇતિ) બાલાઃ પ્રવદન્તિ, ન પણ્ડિતાઃ ।
એકમ્ અપિ સમ્યક્ આસ્થિતઃ (પુરુષઃ) ઉભયોઃ ફલમ્ વિન્દતે ।

યત્સાઙ્ખ્યૈઃ પ્રાપ્યતે સ્થાનં તદ્યોગૈરપિ ગમ્યતે ।
એકં સાઙ્ખ્યં ચ યોગં ચ યઃ પશ્યતિ સ પશ્યતિ ॥ ૫-૫॥

યત્ સાઙ્ખ્યૈઃ પ્રાપ્યતે સ્થાનમ્ તત્ યોગૈઃ અપિ ગમ્યતે ।
એકમ્ સાઙ્ખ્યમ્ ચ યોગમ્ ચ યઃ પશ્યતિ સ પશ્યતિ ॥ ૫-૫॥

યત્ સ્થાનમ્ સાઙ્ખ્યૈઃ પ્રાપ્યતે, તત્ યોગૈઃ અપિ ગમ્યતે;
યઃ સાઙ્ખ્યમ્ ચ યોગમ્ ચ એકમ્ પશ્યતિ, સ (એવ) પશ્યતિ ।

સંન્યાસસ્તુ મહાબાહો દુઃખમાપ્તુમયોગતઃ ।
યોગયુક્તો મુનિર્બ્રહ્મ નચિરેણાધિગચ્છતિ ॥ ૫-૬॥

સંન્યાસઃ તુ મહાબાહો દુઃખમ્ આપ્તુમ્ અયોગતઃ ।
યોગ-યુક્તઃ મુનિઃ બ્રહ્મ નચિરેણ અધિગચ્છતિ ॥ ૫-૬॥

હે મહાબાહો! અયોગતઃ સંન્યાસઃ તુ દુઃખમ્ આપ્તુમ્,
યોગ-યુક્તઃ મુનિઃ ન ચિરેણ બ્રહ્મ અધિગચ્છતિ ।

યોગયુક્તો વિશુદ્ધાત્મા વિજિતાત્મા જિતેન્દ્રિયઃ ।
સર્વભૂતાત્મભૂતાત્મા કુર્વન્નપિ ન લિપ્યતે ॥ ૫-૭॥

યોગ-યુક્તઃ વિશુદ્ધ-આત્મા વિજિત-આત્મા જિત-ઇન્દ્રિયઃ ।
સર્વ-ભૂત-આત્મ-ભૂત-આત્મા કુર્વન્ અપિ ન લિપ્યતે ॥ ૫-૭॥

યોગ-યુક્તઃ, વિશુદ્ધ-આત્મા, વિજિત-આત્મા, જિત-ઇન્દ્રિયઃ,
સર્વ-ભૂત-આત્મ-ભૂત-આત્મા, કુર્વન્ અપિ ન લિપ્યતે ।

નૈવ કિઞ્ચિત્કરોમીતિ યુક્તો મન્યેત તત્ત્વવિત્ ।
પશ્યઞ્શ‍ૃણ્વન્સ્પૃશઞ્જિઘ્રન્નશ્નન્ગચ્છન્સ્વપઞ્શ્વસન્ ॥ ૫-૮॥

પ્રલપન્વિસૃજન્ગૃહ્ણન્નુન્મિષન્નિમિષન્નપિ ।
ઇન્દ્રિયાણીન્દ્રિયાર્થેષુ વર્તન્ત ઇતિ ધારયન્ ॥ ૫-૯॥

ન એવ કિઞ્ચિત્ કરોમિ ઇતિ યુક્તઃ મન્યેત તત્ત્વવિત્ ।
પશ્યન્ શ‍ૃણ્વન્ સ્પૃશન્ જિઘ્રન્ અશ્નન્ ગચ્છન્ સ્વપઞ્ શ્વસન્ ॥ ૫-૮॥

પ્રલપન્ વિસૃજન્ ગૃહ્ણન્ ઉન્મિષન્ નિમિષન્ અપિ ।
ઇન્દ્રિયાણિ ઇન્દ્રિય-અર્થેષુ વર્તન્તે ઇતિ ધારયન્ ॥ ૫-૯॥

યુક્તઃ તત્ત્વવિત્ પશ્યન્, શ‍ૃણ્વન્, સ્પૃશન્, જિઘ્રન્, અશ્નન્,
ગચ્છન્, સ્વપન્, શ્વસન્, પ્રલપન્, વિસૃજન્, ગૃહ્ણન્,
ઉન્મિષન્ નિમિષન્ અપિ, ઇન્દ્રિયાણિ ઇન્દ્રિય-અર્થેષુ વર્તન્તે ઇતિ ધારયન્
કિઞ્ચિત્ ન એવ કરોમિ ઇતિ મન્યેત ।

બ્રહ્મણ્યાધાય કર્માણિ સઙ્ગં ત્યક્ત્વા કરોતિ યઃ ।
લિપ્યતે ન સ પાપેન પદ્મપત્રમિવામ્ભસા ॥ ૫-૧૦॥

બ્રહ્મણિ આધાય કર્માણિ સઙ્ગમ્ ત્યક્ત્વા કરોતિ યઃ ।
લિપ્યતે ન સઃ પાપેન પદ્મ-પત્રમ્ ઇવ અમ્ભસા ॥ ૫-૧૦॥

યઃ સઙ્ગમ્ ત્યક્ત્વા કર્માણિ, બ્રહ્મણિ આધાય કરોતિ, સઃ
પદ્મ-પત્રમ્ અમ્ભસા ઇવ, પાપેન ન લિપ્યતે ।

કાયેન મનસા બુદ્ધ્યા કેવલૈરિન્દ્રિયૈરપિ ।
યોગિનઃ કર્મ કુર્વન્તિ સઙ્ગં ત્યક્ત્વાત્મશુદ્ધયે ॥ ૫-૧૧॥

કાયેન મનસા બુદ્ધ્યા કેવલૈઃ ઇન્દ્રિયૈઃ અપિ ।
યોગિનઃ કર્મ કુર્વન્તિ સઙ્ગમ્ ત્યક્ત્વા આત્મ-શુદ્ધયે ॥ ૫-૧૧॥

યોગિનઃ આત્મ-શુદ્ધયે કાયેન, મનસા, બુદ્ધ્યા, કેવલૈઃ
ઇન્દ્રિયૈઃ અપિ સઙ્ગમ્ ત્યક્ત્વા કર્મ કુર્વન્તિ ।

યુક્તઃ કર્મફલં ત્યક્ત્વા શાન્તિમાપ્નોતિ નૈષ્ઠિકીમ્ ।
અયુક્તઃ કામકારેણ ફલે સક્તો નિબધ્યતે ॥ ૫-૧૨॥

યુક્તઃ કર્મ-ફલં ત્યક્ત્વા શાન્તિમ્ આપ્નોતિ નૈષ્ઠિકીમ્ ।
અયુક્તઃ કામકારેણ ફલે સક્તઃ નિબધ્યતે ॥ ૫-૧૨॥

યુક્તઃ કર્મ-ફલં ત્યક્ત્વા નૈષ્ઠિકીમ્ શાન્તિમ્ આપ્નોતિ ।
અયુક્તઃ કામકારેણ ફલે સક્તઃ નિબધ્યતે ।

સર્વકર્માણિ મનસા સંન્યસ્યાસ્તે સુખં વશી ।
નવદ્વારે પુરે દેહી નૈવ કુર્વન્ન કારયન્ ॥ ૫-૧૩॥

સર્વ-કર્માણિ મનસા સંન્યસ્ય આસ્તે સુખમ્ વશી ।
નવ-દ્વારે પુરે દેહી ન એવ કુર્વન્ ન કારયન્ ॥ ૫-૧૩॥

વશી દેહી સર્વ-કર્માણિ મનસા સંન્યસ્ય, નવ-દ્વારે પુરે,

ન એવ કુર્વન્, ન કારયન્ સુખમ્ આસ્તે ।

ન કર્તૃત્વં ન કર્માણિ લોકસ્ય સૃજતિ પ્રભુઃ ।
ન કર્મફલસંયોગં સ્વભાવસ્તુ પ્રવર્તતે ॥ ૫-૧૪॥

ન કર્તૃત્વમ્ ન કર્માણિ લોકસ્ય સૃજતિ પ્રભુઃ ।
ન કર્મ-ફલ-સંયોગમ્ સ્વભાવઃ તુ પ્રવર્તતે ॥ ૫-૧૪॥

પ્રભુઃ લોકસ્ય ન કર્તૃત્વમ્, ન કર્માણિ, ન કર્મ-ફલ-સંયોગમ્
સૃજતિ । સ્વભાવઃ તુ પ્રવર્તતે ।

નાદત્તે કસ્યચિત્પાપં ન ચૈવ સુકૃતં વિભુઃ ।
અજ્ઞાનેનાવૃતં જ્ઞાનં તેન મુહ્યન્તિ જન્તવઃ ॥ ૫-૧૫॥

ન આદત્તે કસ્યચિત્ પાપં ન ચ એવ સુકૃતં વિભુઃ ।
અજ્ઞાનેન આવૃતમ્ જ્ઞાનમ્ તેન મુહ્યન્તિ જન્તવઃ ॥ ૫-૧૫॥

વિભુઃ ન કસ્યચિત્ પાપં, ન ચ એવ સુકૃતં આદત્તે ।
અજ્ઞાનેન જ્ઞાનમ્ આવૃતમ્, તેન જન્તવઃ મુહ્યન્તિ ।

જ્ઞાનેન તુ તદજ્ઞાનં યેષાં નાશિતમાત્મનઃ ।
તેષામાદિત્યવજ્જ્ઞાનં પ્રકાશયતિ તત્પરમ્ ॥ ૫-૧૬॥

જ્ઞાનેન તુ તત્ અજ્ઞાનમ્ યેષામ્ નાશિતમ્ આત્મનઃ ।
તેષામ્ આદિત્યવત્ જ્ઞાનમ્ પ્રકાશયતિ તત્ પરમ્ ॥ ૫-૧૬॥

યેષામ્ તુ તત્ અજ્ઞાનમ્ આત્મનઃ જ્ઞાનેન નાશિતમ્, તેષામ્
જ્ઞાનમ્ આદિત્યવત્ તત્ પરમ્ પ્રકાશયતિ ।

તદ્બુદ્ધયસ્તદાત્માનસ્તન્નિષ્ઠાસ્તત્પરાયણાઃ ।
ગચ્છન્ત્યપુનરાવૃત્તિં જ્ઞાનનિર્ધૂતકલ્મષાઃ ॥ ૫-૧૭॥

તત્ બુદ્ધયઃ તત્ આત્માનઃ તત્ નિષ્ઠાઃ તત્ પરાયણાઃ ।
ગચ્છન્તિ અપુનરાવૃત્તિમ્ જ્ઞાન-નિર્ધૂત-કલ્મષાઃ ॥ ૫-૧૭॥

તત્ બુદ્ધયઃ, તત્ આત્માનઃ, તત્ નિષ્ઠાઃ, તત્ પરાયણાઃ,
જ્ઞાન-નિર્ધૂત-કલ્મષાઃ અપુનરાવૃત્તિમ્ ગચ્છન્તિ ।

વિદ્યાવિનયસમ્પન્ને બ્રાહ્મણે ગવિ હસ્તિનિ ।
શુનિ ચૈવ શ્વપાકે ચ પણ્ડિતાઃ સમદર્શિનઃ ॥ ૫-૧૮॥

વિદ્યા-વિનય-સમ્પન્ને બ્રાહ્મણે ગવિ હસ્તિનિ ।
શુનિ ચ એવ શ્વપાકે ચ પણ્ડિતાઃ સમ-દર્શિનઃ ॥ ૫-૧૮॥

પણ્ડિતાઃ વિદ્યા-વિનય-સમ્પન્ને બ્રાહ્મણે, ગવિ, હસ્તિનિ, શુનિ, ચ
શ્વપાકે ચ એવ સમ-દર્શિનઃ (સન્તિ) ।

ઇહૈવ તૈર્જિતઃ સર્ગો યેષાં સામ્યે સ્થિતં મનઃ ।
નિર્દોષં હિ સમં બ્રહ્મ તસ્માદ્ બ્રહ્મણિ તે સ્થિતાઃ ॥ ૫-૧૯॥

ઇહ એવ તૈઃ જિતઃ સર્ગઃ યેષામ્ સામ્યે સ્થિતમ્ મનઃ ।
નિર્દોષમ્ હિ સમમ્ બ્રહ્મ તસ્માત્ બ્રહ્મણિ તે સ્થિતાઃ ॥ ૫-૧૯॥

યેષામ્ મનઃ સામ્યે સ્થિતમ્, તૈઃ ઇહ એવ સર્ગઃ જિતઃ,
બ્રહ્મ હિ સમમ્ નિર્દોષમ્, તસ્માત્ તે બ્રહ્મણિ સ્થિતાઃ ।

ન પ્રહૃષ્યેત્પ્રિયં પ્રાપ્ય નોદ્વિજેત્પ્રાપ્ય ચાપ્રિયમ્ ।
સ્થિરબુદ્ધિરસમ્મૂઢો બ્રહ્મવિદ્ બ્રહ્મણિ સ્થિતઃ ॥ ૫-૨૦॥

ન પ્રહૃષ્યેત્ પ્રિયમ્ પ્રાપ્ય ન ઉદ્વિજેત્ પ્રાપ્ય ચ અપ્રિયમ્ ।
સ્થિર-બુદ્ધિઃ અસમ્મૂઢઃ બ્રહ્મવિત્ બ્રહ્મણિ સ્થિતઃ ॥ ૫-૨૦॥

પ્રિયમ્ પ્રાપ્ય ન પ્રહૃષ્યેત્, અપ્રિયમ્ પ્રાપ્ય ચ ન ઉદ્વિજેત્,
(એવં) સ્થિર-બુદ્ધિઃ, અસમ્મૂઢઃ, બ્રહ્મવિત્ બ્રહ્મણિ સ્થિતઃ ।

બાહ્યસ્પર્શેષ્વસક્તાત્મા વિન્દત્યાત્મનિ યત્સુખમ્ ।
સ બ્રહ્મયોગયુક્તાત્મા સુખમક્ષયમશ્નુતે ॥ ૫-૨૧॥

બાહ્ય-સ્પર્શેષુ અસક્ત-આત્મા વિન્દતિ આત્મનિ યત્ સુખમ્ ।
સઃ બ્રહ્મ-યોગ-યુક્તાત્મા સુખમ્ અક્ષયમ્ અશ્નુતે ॥ ૫-૨૧॥

બાહ્ય-સ્પર્શેષુ અસક્ત-આત્મા, આત્મનિ યત્ સુખમ્ વિન્દતિ,
સઃ બ્રહ્મ-યોગ-યુક્તાત્મા અક્ષયમ્ સુખમ્ અશ્નુતે ।

યે હિ સંસ્પર્શજા ભોગા દુઃખયોનય એવ તે ।
આદ્યન્તવન્તઃ કૌન્તેય ન તેષુ રમતે બુધઃ ॥ ૫-૨૨॥

યે હિ સંસ્પર્શજાઃ ભોગાઃ દુઃખ-યોનયઃ એવ તે ।
આદિ અન્તવન્તઃ કૌન્તેય ન તેષુ રમતે બુધઃ ॥ ૫-૨૨॥

હે કૌન્તેય! યે હિ સંસ્પર્શજાઃ ભોગાઃ તે દુઃખ-યોનયઃ
આદિ અન્તવન્તઃ એવ, તેષુ બુધઃ ન રમતે ।

શક્નોતીહૈવ યઃ સોઢું પ્રાક્શરીરવિમોક્ષણાત્ ।
કામક્રોધોદ્ભવં વેગં સ યુક્તઃ સ સુખી નરઃ ॥ ૫-૨૩॥

શક્નોતિ ઇહ એવ યઃ સોઢુમ્ પ્રાક્ શરીર-વિમોક્ષણાત્ ।
કામ-ક્રોધ-ઉદ્ભવમ્ વેગમ્ સઃ યુક્તઃ સઃ સુખી નરઃ ॥ ૫-૨૩॥

ઇહ એવ શરીર-વિમોક્ષણાત્ પ્રાક્, યઃ કામ-ક્રોધ-ઉદ્ભવમ્
વેગમ્ સોઢુમ્ શક્નોતિ, સઃ નરઃ યુક્તઃ, સઃ સુખી (ભવતિ) ।

યોઽન્તઃસુખોઽન્તરારામસ્તથાન્તર્જ્યોતિરેવ યઃ ।
સ યોગી બ્રહ્મનિર્વાણં બ્રહ્મભૂતોઽધિગચ્છતિ ॥ ૫-૨૪॥

યઃ અન્તઃ-સુખઃ અન્તર-આરામઃ તથા અન્તર્-જ્યોતિઃ એવ યઃ ।
સઃ યોગી બ્રહ્મ-નિર્વાણમ્ બ્રહ્મ-ભૂતઃ અધિગચ્છતિ ॥ ૫-૨૪॥

યઃ અન્તઃ-સુખઃ, અન્તર-આરામઃ, તથા યઃ અન્તર્-જ્યોતિઃ એવ,
સઃ યોગી બ્રહ્મ-ભૂતઃ બ્રહ્મ-નિર્વાણમ્ અધિગચ્છતિ ।

લભન્તે બ્રહ્મનિર્વાણમૃષયઃ ક્ષીણકલ્મષાઃ ।
છિન્નદ્વૈધા યતાત્માનઃ સર્વભૂતહિતે રતાઃ ॥ ૫-૨૫॥

લભન્તે બ્રહ્મ-નિર્વાણમ્ ઋષયઃ ક્ષીણ-કલ્મષાઃ ।
છિન્ન-દ્વૈધાઃ યત-આત્માનઃ સર્વ-ભૂતહિતે રતાઃ ॥ ૫-૨૫॥

ક્ષીણ-કલ્મષાઃ, છિન્ન-દ્વૈધાઃ, યત-આત્માનઃ,
સર્વ-ભૂતહિતે રતાઃ ઋષયઃ બ્રહ્મ-નિર્વાણમ્ લભન્તે ।

કામક્રોધવિયુક્તાનાં યતીનાં યતચેતસામ્ ।
અભિતો બ્રહ્મનિર્વાણં વર્તતે વિદિતાત્મનામ્ ॥ ૫-૨૬॥

કામ-ક્રોધ-વિયુક્તાનામ્ યતીનામ્ યત-ચેતસામ્ ।
અભિતઃ બ્રહ્મ-નિર્વાણં વર્તતે વિદિત-આત્મનામ્ ॥ ૫-૨૬॥

કામ- ક્રોધ-વિયુક્તાનામ્ યત-ચેતસામ્ વિદિત-આત્મનામ્
યતીનામ્ અભિતઃ બ્રહ્મ-નિર્વાણં વર્તતે ।

સ્પર્શાન્કૃત્વા બહિર્બાહ્યાંશ્ચક્ષુશ્ચૈવાન્તરે ભ્રુવોઃ ।
પ્રાણાપાનૌ સમૌ કૃત્વા નાસાભ્યન્તરચારિણૌ ॥ ૫-૨૭॥

યતેન્દ્રિયમનોબુદ્ધિર્મુનિર્મોક્ષપરાયણઃ ।

વિગતેચ્છાભયક્રોધો યઃ સદા મુક્ત એવ સઃ ॥ ૫-૨૮॥

સ્પર્શાન્ કૃત્વા બહિઃ બાહ્યાન્ ચક્ષુઃ ચ એવ અન્તરે ભ્રુવોઃ ।
પ્રાણ-અપાનૌ સમૌ કૃત્વા નાસ-અભ્યન્તર-ચારિણૌ ॥ ૫-૨૭॥

યત-ઇન્દ્રિય-મનઃ બુદ્ધિઃ મુનિઃ મોક્ષ-પરાયણઃ ।
વિગત-ઇચ્છા-ભય-ક્રોધઃ યઃ સદા મુક્તઃ એવ સઃ ॥ ૫-૨૮॥

યઃ મુનિઃ બાહ્યાન્ સ્પર્શાન્ બહિઃ કૃત્વા, ચક્ષુઃ ચ એવ
ભ્રુવોઃ અન્તરે કૃત્વા, પ્રાણ-અપાનૌ નાસ-અભ્યન્તર-ચારિણૌ
સમૌ ( કૃત્વા), યત-ઇન્દ્રિય-મનઃ બુદ્ધિઃ, વિગત-ઇચ્છા-ભય-ક્રોધઃ,
મોક્ષ-પરાયણઃ (સ્યાત્) સઃ સદા મુક્તઃ એવ ।

ભોક્તારં યજ્ઞતપસાં સર્વલોકમહેશ્વરમ્ ।
સુહૃદં સર્વભૂતાનાં જ્ઞાત્વા માં શાન્તિમૃચ્છતિ ॥ ૫-૨૯॥

ભોક્તારમ્ યજ્ઞ-તપસામ્ સર્વ-લોક-મહેશ્વરમ્ ।
સુહૃદમ્ સર્વ-ભૂતાનામ્ જ્ઞાત્વા માં શાન્તિમ્ ઋચ્છતિ ॥ ૫-૨૯॥

યજ્ઞ-તપસામ્ ભોક્તારમ્ સર્વ-ભૂતાનામ્ સુહૃદમ્
સર્વ-લોક-મહેશ્વરમ્ મામ્ જ્ઞાત્વા શાન્તિમ્ ઋચ્છતિ ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
સંન્યાસયોગો નામ પઞ્ચમોઽધ્યાયઃ ॥ ૫॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદે
સંન્યાસ-યોગઃ નામ પઞ્ચમઃ અધ્યાયઃ ॥ ૫॥

---

અથ ષષ્ઠોઽધ્યાયઃ । આત્મસંયમયોગઃ ।
અથ ષષ્ઠઃ અધ્યાયઃ । આત્મ-સંયમ-યોગઃ ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

અનાશ્રિતઃ કર્મફલં કાર્યં કર્મ કરોતિ યઃ ।
સ સંન્યાસી ચ યોગી ચ ન નિરગ્નિર્ન ચાક્રિયઃ ॥ ૬-૧॥

અનાશ્રિતઃ કર્મ-ફલમ્ કાર્યમ્ કર્મ કરોતિ યઃ ।
સઃ સંન્યાસી ચ યોગી ચ ન નિરગ્નિઃ ન ચ અક્રિયઃ ॥ ૬-૧॥

યઃ કર્મ-ફલમ્ અનાશ્રિતઃ કાર્યમ્ કર્મ કરોતિ,
સઃ સંન્યાસી ચ યોગી ચ, નિરગ્નિઃ ન અક્રિયઃ ચ ન ।

યં સંન્યાસમિતિ પ્રાહુર્યોગં તં વિદ્ધિ પાણ્ડવ ।
ન હ્યસંન્યસ્તસઙ્કલ્પો યોગી ભવતિ કશ્ચન ॥ ૬-૨॥

યમ્ સંન્યાસમ્ ઇતિ પ્રાહુઃ યોગમ્ તમ્ વિદ્ધિ પાણ્ડવ ।
ન હિ અસંન્યસ્ત-સઙ્કલ્પઃ યોગી ભવતિ કશ્ચન ॥ ૬-૨॥

હે પાણ્ડવ! યમ્ સંન્યાસમ્ ઇતિ પ્રાહુઃ તમ્ યોગમ્ વિદ્ધિ,
કશ્ચન અસંન્યસ્ત-સઙ્કલ્પઃ યોગી ન ભવતિ હિ ।

આરુરુક્ષોર્મુનેર્યોગં કર્મ કારણમુચ્યતે ।
યોગારૂઢસ્ય તસ્યૈવ શમઃ કારણમુચ્યતે ॥ ૬-૩॥

આરુરુક્ષોઃ મુનેઃ યોગમ્ કર્મ કારણમ્ ઉચ્યતે ।
યોગ-આરૂઢસ્ય તસ્ય એવ શમઃ કારણમ્ ઉચ્યતે ॥ ૬-૩॥

યોગમ્ આરુરુક્ષોઃ મુનેઃ કર્મ કારણમ્ ઉચ્યતે,
યોગ-આરૂઢસ્ય તસ્ય એવ શમઃ કારણમ્ ઉચ્યતે ।

યદા હિ નેન્દ્રિયાર્થેષુ ન કર્મસ્વનુષજ્જતે ।
સર્વસઙ્કલ્પસંન્યાસી યોગારૂઢસ્તદોચ્યતે ॥ ૬-૪॥

યદા હિ ન ઇન્દ્રિય-અર્થેષુ ન કર્મસુ અનુષજ્જતે ।
સર્વ-સઙ્કલ્પ-સંન્યાસી યોગ-આરૂઢઃ તદા ઉચ્યતે ॥ ૬-૪॥

યદા હિ ન ઇન્દ્રિય-અર્થેષુ ન કર્મસુ અનુષજ્જતે, તદા
સર્વ-સઙ્કલ્પ-સંન્યાસી યોગ-આરૂઢઃ ઉચ્યતે ।

ઉદ્ધરેદાત્મનાત્માનં નાત્માનમવસાદયેત્ ।
આત્મૈવ હ્યાત્મનો બન્ધુરાત્મૈવ રિપુરાત્મનઃ ॥ ૬-૫॥

ઉદ્ધરેત્ આત્મના આત્માનમ્ ન આત્માનમ્ અવસાદયેત્ ।
આત્મા એવ હિ આત્મનઃ બન્ધુઃ આત્મા એવ રિપુઃ આત્મનઃ ॥ ૬-૫॥

આત્મના આત્માનમ્ ઉદ્ધરેત્, આત્માનમ્ ન અવસાદયેત્ ।
આત્મા એવ હિ આત્મનઃ બન્ધુઃ, આત્મા એવ આત્મનઃ રિપુઃ ।

બન્ધુરાત્માત્મનસ્તસ્ય યેનાત્મૈવાત્મના જિતઃ ।
અનાત્મનસ્તુ શત્રુત્વે વર્તેતાત્મૈવ શત્રુવત્ ॥ ૬-૬॥

બન્ધુઃ આત્મા આત્મનઃ તસ્ય યેન આત્મા એવ આત્મના જિતઃ ।
અનાત્મનઃ તુ શત્રુત્વે વર્તેત આત્મા એવ શત્રુવત્ ॥ ૬-૬॥

યેન આત્મના એવ આત્મા જિતઃ, તસ્ય આત્મનઃ બન્ધુઃ આત્મા,
અનાત્મનઃ તુ શત્રુત્વે આત્મા એવ શત્રુવત્ વર્તેત ।

જિતાત્મનઃ પ્રશાન્તસ્ય પરમાત્મા સમાહિતઃ ।
શીતોષ્ણસુખદુઃખેષુ તથા માનાપમાનયોઃ ॥ ૬-૭॥

જિત-આત્મનઃ પ્રશાન્તસ્ય પરમાત્મા સમાહિતઃ ।
શીત-ઉષ્ણ-સુખ-દુઃખેષુ તથા માન-અપમાનયોઃ ॥ ૬-૭॥

જિત-આત્મનઃ પ્રશાન્તસ્ય પરમ-આત્મા શીત-ઉષ્ણ-સુખ-દુઃખેષુ
તથા માન-અપમાનયોઃ સમાહિતઃ (ભવતિ)।

જ્ઞાનવિજ્ઞાનતૃપ્તાત્મા કૂટસ્થો વિજિતેન્દ્રિયઃ ।
યુક્ત ઇત્યુચ્યતે યોગી સમલોષ્ટાશ્મકાઞ્ચનઃ ॥ ૬-૮॥

જ્ઞાન-વિજ્ઞાન-તૃપ્ત-આત્મા કૂટસ્થઃ વિજિત-ઇન્દ્રિયઃ ।
યુક્તઃ ઇતિ ઉચ્યતે યોગી સમ-લોષ્ટ-અશ્મ-કાઞ્ચનઃ ॥ ૬-૮॥

જ્ઞાન-વિજ્ઞાન-તૃપ્ત-આત્મા કૂટસ્થઃ વિજિત-ઇન્દ્રિયઃ
સમ-લોષ્ટ-અશ્મ-કાઞ્ચનઃ યોગી યુક્તઃ ઇતિ ઉચ્યતે ।

સુહૃન્મિત્રાર્યુદાસીનમધ્યસ્થદ્વેષ્યબન્ધુષુ ।
સાધુષ્વપિ ચ પાપેષુ સમબુદ્ધિર્વિશિષ્યતે ॥ ૬-૯॥

સુહૃત્ મિત્ર-અરિ-ઉદાસીન-મધ્યસ્થ-દ્વેષ્ય-બન્ધુષુ ।
સાધુષુ અપિ ચ પાપેષુ સમ-બુદ્ધિઃ વિશિષ્યતે ॥ ૬-૯॥

સુહૃત્ મિત્ર-અરિ-ઉદાસીન-મધ્યસ્થ-દ્વેષ્ય-બન્ધુષુ સાધુષુ
અપિ ચ પાપેષુ સમ-બુદ્ધિઃ વિશિષ્યતે ।

યોગી યુઞ્જીત સતતમાત્માનં રહસિ સ્થિતઃ ।
એકાકી યતચિત્તાત્મા નિરાશીરપરિગ્રહઃ ॥ ૬-૧૦॥

યોગી યુઞ્જીત સતતમ્ આત્માનમ્ રહસિ સ્થિતઃ ।

એકાકી યત-ચિત્ત-આત્મા નિરાશીઃ અપરિગ્રહઃ ॥ ૬-૧૦॥

યોગી રહસિ સ્થિતઃ એકાકી, યત-ચિત્ત-આત્મા, નિરાશીઃ,
અપરિગ્રહઃ (ચ સન્) સતતમ્ આત્માનમ્ યુઞ્જીત ।

શુચૌ દેશે પ્રતિષ્ઠાપ્ય સ્થિરમાસનમાત્મનઃ ।
નાત્યુચ્છ્રિતં નાતિનીચં ચૈલાજિનકુશોત્તરમ્ ॥ ૬-૧૧॥

તત્રૈકાગ્રં મનઃ કૃત્વા યતચિત્તેન્દ્રિયક્રિયઃ ।
ઉપવિશ્યાસને યુઞ્જ્યાદ્યોગમાત્મવિશુદ્ધયે ॥ ૬-૧૨॥

શુચૌ દેશે પ્રતિષ્ઠાપ્ય સ્થિરમ્ આસનમ્ આત્મનઃ ।
ન અતિ-ઉચ્છ્રિતમ્ ન અતિ-નીચમ્ ચૈલ-અજિન-કુશ-ઉત્તરમ્ ॥ ૬-૧૧॥

તત્ર એકાગ્રમ્ મનઃ કૃત્વા યત-ચિત્ત-ઇન્દ્રિય-ક્રિયઃ ।
ઉપવિશ્ય આસને યુઞ્જ્યાત્ યોગમ્ આત્મ-વિશુદ્ધયે ॥ ૬-૧૨॥

શુચૌ દેશે, ન અતિ-ઉચ્છ્રિતમ્, ન અતિ-નીચમ્, ચૈલ-અજિન-કુશ-ઉત્તરમ્,
આત્મનઃ સ્થિરમ્ આસનમ્ પ્રતિષ્ઠાપ્ય તત્ર આસને ઉપવિશ્ય
મનઃ એકાગ્રમ્ કૃત્વા, યત-ચિત્ત-ઇન્દ્રિય-ક્રિયઃ (સન્)
આત્મ-વિશુદ્ધયે યોગમ્ યુઞ્જ્યાત્ ।

સમં કાયશિરોગ્રીવં ધારયન્નચલં સ્થિરઃ ।
સમ્પ્રેક્ષ્ય નાસિકાગ્રં સ્વં દિશશ્ચાનવલોકયન્ ॥ ૬-૧૩॥

પ્રશાન્તાત્મા વિગતભીર્બ્રહ્મચારિવ્રતે સ્થિતઃ ।
મનઃ સંયમ્ય મચ્ચિત્તો યુક્ત આસીત મત્પરઃ ॥ ૬-૧૪॥

સમમ્ કાય-શિરઃ-ગ્રીવમ્ ધારયન્ અચલમ્ સ્થિરઃ ।
સમ્પ્રેક્ષ્ય નાસિક-અગ્રં સ્વમ્ દિશઃ ચ અનવલોકયન્ ॥ ૬-૧૩॥

પ્રશાન્ત-આત્મા વિગત-ભીઃ બ્રહ્મચારિ-વ્રતે સ્થિતઃ ।
મનઃ સંયમ્ય મત્-ચિત્તઃ યુક્તઃ આસીત મત્-પરઃ ॥ ૬-૧૪॥

સ્થિરઃ (ભૂત્વા) કાય-શિરઃ-ગ્રીવમ્ અચલમ્ સમમ્ ધારયન્
સ્વમ્ નાસિક-અગ્રં સમ્પ્રેક્ષ્ય, ચ દિશઃ અનવલોકયન્ પ્રશાન્ત-આત્મા
વિગત-ભીઃ બ્રહ્મચારિ-વ્રતે સ્થિતઃ, મનઃ સંયમ્ય, મત્-ચિત્તઃ મત્-પરઃ યુક્તઃ આસીત ।

યુઞ્જન્નેવં સદાત્માનં યોગી નિયતમાનસઃ ।
શાન્તિં નિર્વાણપરમાં મત્સંસ્થામધિગચ્છતિ ॥ ૬-૧૫॥

યુઞ્જન્ એવં સદા આત્માનમ્ યોગી નિયત-માનસઃ ।
શાન્તિમ્ નિર્વાણ-પરમામ્ મત્-સંસ્થામ્ અધિગચ્છતિ ॥ ૬-૧૫॥

એવં સદા આત્માનમ્ યુઞ્જન્, નિયત-માનસઃ યોગી
નિર્વાણ-પરમામ્ મત્-સંસ્થામ્ શાન્તિમ્ અધિગચ્છતિ ।

નાત્યશ્નતસ્તુ યોગોઽસ્તિ ન ચૈકાન્તમનશ્નતઃ ।
ન ચાતિસ્વપ્નશીલસ્ય જાગ્રતો નૈવ ચાર્જુન ॥ ૬-૧૬॥

ન અતિ અશ્નતઃ તુ યોગઃ અસ્તિ ન ચ એકાન્તમ્ અનશ્નતઃ ।
ન ચ અતિ-સ્વપ્ન-શીલસ્ય જાગ્રતઃ ન એવ ચ અર્જુન ॥ ૬-૧૬॥

હે અર્જુન! અતિ અશ્નતઃ તુ ન યોગઃ અસ્તિ, એકાન્તમ્ અનશ્નતઃ ચ ન,
અતિ-સ્વપ્ન-શીલસ્ય ચ ન, જાગ્રતઃ ચ ન એવ ।

યુક્તાહારવિહારસ્ય યુક્તચેષ્ટસ્ય કર્મસુ ।
યુક્તસ્વપ્નાવબોધસ્ય યોગો ભવતિ દુઃખહા ॥ ૬-૧૭॥

યુક્ત-આહાર-વિહારસ્ય યુક્ત-ચેષ્ટસ્ય કર્મસુ ।
યુક્ત-સ્વપ્ન-અવબોધસ્ય યોગઃ ભવતિ દુઃખહા ॥ ૬-૧૭॥

યુક્ત-આહાર-વિહારસ્ય, કર્મસુ યુક્ત-ચેષ્ટસ્ય,
યુક્ત-સ્વપ્ન-અવબોધસ્ય યોગઃ દુઃખહા ભવતિ ।

યદા વિનિયતં ચિત્તમાત્મન્યેવાવતિષ્ઠતે ।
નિઃસ્પૃહઃ સર્વકામેભ્યો યુક્ત ઇત્યુચ્યતે તદા ॥ ૬-૧૮॥

યદા વિનિયતમ્ ચિત્તમ્ આત્મનિ એવ અવતિષ્ઠતે ।
નિઃસ્પૃહઃ સર્વ-કામેભ્યઃ યુક્તઃ ઇતિ ઉચ્યતે તદા ॥ ૬-૧૮॥

યદા વિનિયતમ્ ચિત્તમ્ આત્મનિ એવ અવતિષ્ઠતે,
સર્વ-કામેભ્યઃ નિઃસ્પૃહઃ તદા યુક્તઃ ઇતિ ઉચ્યતે ।

યથા દીપો નિવાતસ્થો નેઙ્ગતે સોપમા સ્મૃતા ।
યોગિનો યતચિત્તસ્ય યુઞ્જતો યોગમાત્મનઃ ॥ ૬-૧૯॥

યથા દીપઃ નિવાતસ્થઃ નેઙ્ગતે સોપમા સ્મૃતા ।
યોગિનઃ યત-ચિત્તસ્ય યુઞ્જતઃ યોગમ્ આત્મનઃ ॥ ૬-૧૯॥

યથા નિવાતસ્થઃ દીપઃ ન ઇઙ્ગતે સા ઉપમા, આત્મનઃ યોગમ્
યુઞ્જતઃ યત-ચિત્તસ્ય યોગિનઃ, સ્મૃતા ।

યત્રોપરમતે ચિત્તં નિરુદ્ધં યોગસેવયા ।
યત્ર ચૈવાત્મનાત્માનં પશ્યન્નાત્મનિ તુષ્યતિ ॥ ૬-૨૦॥

સુખમાત્યન્તિકં યત્તદ્ બુદ્ધિગ્રાહ્યમતીન્દ્રિયમ્ ।
વેત્તિ યત્ર ન ચૈવાયં સ્થિતશ્ચલતિ તત્ત્વતઃ ॥ ૬-૨૧॥

યં લબ્ધ્વા ચાપરં લાભં મન્યતે નાધિકં તતઃ ।
યસ્મિન્સ્થિતો ન દુઃખેન ગુરુણાપિ વિચાલ્યતે ॥ ૬-૨૨॥

તં વિદ્યાદ્ દુઃખસંયોગવિયોગં યોગસંજ્ઞિતમ્ ।
સ નિશ્ચયેન યોક્તવ્યો યોગોऽનિર્વિણ્ણચેતસા ॥ ૬-૨૩॥

યત્ર ઉપરમતે ચિત્તમ્ નિરુદ્ધમ્ યોગ-સેવયા ।
યત્ર ચ એવ આત્મના આત્માનમ્ પશ્યન્ આત્મનિ તુષ્યતિ ॥ ૬-૨૦॥

સુખમ્ આત્યન્તિકમ્ યત્ તત્ બુદ્ધિ-ગ્રાહ્યમ્-અતીન્દ્રિયમ્ ।
વેત્તિ યત્ર ન ચ એવ અયમ્ સ્થિતઃ ચલતિ તત્ત્વતઃ ॥ ૬-૨૧॥

યમ્ લબ્ધ્વા ચ અપરમ્ લાભમ્ મન્યતે ન અધિકમ્ તતઃ ।
યસ્મિન્ સ્થિતઃ ન દુઃખેન ગુરુણા અપિ વિચાલ્યતે ॥ ૬-૨૨॥

તમ્ વિદ્યાત્ દુઃખ-સંયોગ-વિયોગમ્ યોગ-સંજ્ઞિતમ્ ।
સઃ નિશ્ચયેન યોક્તવ્યઃ યોગઃ અનિર્વિણ્ણ-ચેતસા ॥ ૬-૨૩॥

યોગ-સેવયા નિરુદ્ધમ્ ચિત્તમ્ યત્ર ઉપરમતે,
ચ એવ યત્ર આત્મના આત્માનમ્ પશ્યન્ આત્મનિ તુષ્યતિ,
યત્ર યત્ તત્ બુદ્ધિ-ગ્રાહ્યમ્-અતીન્દ્રિયમ્ આત્યન્તિકમ્
સુખમ્ વેત્તિ, (યત્ર) ચ સ્થિતઃ અયમ્ તત્ત્વતઃ ન એવ ચલતિ,
યમ્ ચ લબ્ધ્વા, તતઃ અધિકમ્ અપરમ્ લાભમ્ ન મન્યતે,
યસ્મિન્ સ્થિતઃ ગુરુણા અપિ દુઃખેન ન વિચાલ્યતે,
તમ્ દુઃખ-સંયોગ-વિયોગમ્ યોગ-સંજ્ઞિતમ્ વિદ્યાત્,
સઃ યોગઃ અનિર્વિણ્ણ-ચેતસા નિશ્ચયેન યોક્તવ્યઃ ।

સઙ્કલ્પપ્રભવાન્કામાંસ્ત્યક્ત્વા સર્વાનશેષતઃ ।
મનસૈવેન્દ્રિયગ્રામં વિનિયમ્ય સમન્તતઃ ॥ ૬-૨૪॥

સઙ્કલ્પ-પ્રભવાન્ કામાન્ ત્યક્ત્વા સર્વાન્ અશેષતઃ ।
મનસા એવ ઇન્દ્રિય-ગ્રામમ્ વિનિયમ્ય સમન્તતઃ ॥ ૬-૨૪॥

સઙ્કલ્પ-પ્રભવાન્ સર્વાન્ કામાન્ અશેષતઃ ત્યક્ત્વા,
મનસા એવ ઇન્દ્રિય-ગ્રામમ્ સમન્તતઃ વિનિયમ્ય,

શનૈઃ શનૈરુપરમેદ્ બુદ્ધ્યા ધૃતિગૃહીતયા ।
આત્મસંસ્થં મનઃ કૃત્વા ન કિઞ્ચિદપિ ચિન્તયેત્ ॥ ૬-૨૫॥

શનૈઃ શનૈઃ ઉપરમેત્ બુદ્ધ્યા ધૃતિ-ગૃહીતયા ।
આત્મ-સંસ્થમ્ મનઃ કૃત્વા ન કિઞ્ચિત્ અપિ ચિન્તયેત્ ॥ ૬-૨૫॥

ધૃતિ-ગૃહીતયા બુદ્ધ્યા શનૈઃ શનૈઃ ઉપરમેત્, મનઃ
આત્મ-સંસ્થમ્ કૃત્વા, કિઞ્ચિત્ અપિ ન ચિન્તયેત્ ।

યતો યતો નિશ્ચરતિ મનશ્ચઞ્ચલમસ્થિરમ્ ।
તતસ્તતો નિયમ્યૈતદાત્મન્યેવ વશં નયેત્ ॥ ૬-૨૬॥

યતઃ યતઃ નિશ્ચરતિ મનઃ ચઞ્ચલમ્ અસ્થિરમ્ ।
તતઃ તતઃ નિયમ્ય એતત્ આત્મનિ એવ વશં નયેત્ ॥ ૬-૨૬॥

ચઞ્ચલમ્ અસ્થિરમ્ મનઃ યતઃ યતઃ નિશ્ચરતિ, તતઃ તતઃ
એતત્ નિયમ્ય આત્મનિ એવ વશં નયેત્ ।

પ્રશાન્તમનસં હ્યેનં યોગિનં સુખમુત્તમમ્ ।
ઉપૈતિ શાન્તરજસં બ્રહ્મભૂતમકલ્મષમ્ ॥ ૬-૨૭॥

પ્રશાન્ત-મનસમ્ હિ એનમ્ યોગિનમ્ સુખમ્ ઉત્તમમ્ ।
ઉપૈતિ શાન્ત-રજસમ્ બ્રહ્મ-ભૂતમ્ અકલ્મષમ્ ॥ ૬-૨૭॥

પ્રશાન્ત-મનસમ્ શાન્ત-રજસમ્ અકલ્મષમ્ બ્રહ્મ-ભૂતમ્
એનમ્ યોગિનમ્ હિ ઉત્તમમ્ સુખમ્ ઉપૈતિ ।

યુઞ્જન્નેવં સદાત્માનં યોગી વિગતકલ્મષઃ ।
સુખેન બ્રહ્મસંસ્પર્શમત્યન્તં સુખમશ્નુતે ॥ ૬-૨૮॥

યુઞ્જન્ એવમ્ સદા આત્માનમ્ યોગી વિગત-કલ્મષઃ ।
સુખેન બ્રહ્મ-સંસ્પર્શમ્ અત્યન્તમ્ સુખમ્ અશ્નુતે ॥ ૬-૨૮॥

એવમ્ સદા આત્માનમ્ યુઞ્જન્ યોગી વિગત-કલ્મષઃ
બ્રહ્મ-સંસ્પર્શમ્ અત્યન્તમ્ સુખમ્ સુખેન અશ્નુતે ।
સર્વભૂતસ્થમાત્માનં સર્વભૂતાનિ ચાત્મનિ ।

ઈક્ષતે યોગયુક્તાત્મા સર્વત્ર સમદર્શનઃ ॥ ૬-૨૯॥

સર્વ-ભૂતસ્થમ્ આત્માનમ્ સર્વ-ભૂતાનિ ચ આત્મનિ ।
ઈક્ષતે યોગ-યુક્ત-આત્મા સર્વત્ર સમ-દર્શનઃ ॥ ૬-૨૯॥

યોગ-યુક્ત-આત્મા સર્વત્ર સમ-દર્શનઃ, આત્માનમ્
સર્વ-ભૂતસ્થમ્ સર્વ-ભૂતાનિ ચ આત્મનિ ઈક્ષતે ।

યો માં પશ્યતિ સર્વત્ર સર્વં ચ મયિ પશ્યતિ ।
તસ્યાહં ન પ્રણશ્યામિ સ ચ મે ન પ્રણશ્યતિ ॥ ૬-૩૦॥

યો મામ્ પશ્યતિ સર્વત્ર સર્વમ્ ચ મયિ પશ્યતિ ।
તસ્ય અહં ન પ્રણશ્યામિ સઃ ચ મે ન પ્રણશ્યતિ ॥ ૬-૩૦॥

યઃ મામ્ સર્વત્ર પશ્યતિ, સર્વમ્ ચ મયિ પશ્યતિ,
તસ્ય અહં ન પ્રણશ્યામિ, સઃ ચ મે ન પ્રણશ્યતિ ।

સર્વભૂતસ્થિતં યો માં ભજત્યેકત્વમાસ્થિતઃ ।
સર્વથા વર્તમાનોઽપિ સ યોગી મયિ વર્તતે ॥ ૬-૩૧॥

સર્વ-ભૂત-સ્થિતમ્ યઃ મામ્ ભજતિ એકત્વમ્ આસ્થિતઃ ।
સર્વથા વર્તમાનઃ અપિ સઃ યોગી મયિ વર્તતે ॥ ૬-૩૧॥

યઃ એકત્વમ્ આસ્થિતઃ સર્વ-ભૂત-સ્થિતમ્ મામ્ ભજતિ,
સઃ યોગી સર્વથા વર્તમાનઃ અપિ, મયિ વર્તતે ।

આત્મૌપમ્યેન સર્વત્ર સમં પશ્યતિ યોઽર્જુન ।
સુખં વા યદિ વા દુઃખં સ યોગી પરમો મતઃ ॥ ૬-૩૨॥

આત્મા-ઉપમ્યેન સર્વત્ર સમમ્ પશ્યતિ યઃ અર્જુન ।
સુખમ્ વા યદિ વા દુઃખમ્ સઃ યોગી પરમઃ મતઃ ॥ ૬-૩૨॥

હે અર્જુન! યઃ આત્મા-ઉપમ્યેન સર્વત્ર સુખમ્ વા યદિ વા દુઃખમ્
સમમ્ પશ્યતિ, સઃ યોગી પરમઃ મતઃ ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

યોઽયં યોગસ્ત્વયા પ્રોક્તઃ સામ્યેન મધુસૂદન ।
એતસ્યાહં ન પશ્યામિ ચઞ્ચલત્વાત્સ્થિતિં સ્થિરામ્ ॥ ૬-૩૩॥

યઃ અયં યોગઃ ત્વયા પ્રોક્તઃ સામ્યેન મધુસૂદન ।
એતસ્ય અહં ન પશ્યામિ ચઞ્ચલત્વાત્ સ્થિતિમ્ સ્થિરામ્ ॥ ૬-૩૩

હે મધુસૂદન! યઃ અયં યોગઃ ત્વયા સામ્યેન પ્રોક્તઃ, એતસ્ય
સ્થિરામ્ સ્થિતિમ્ ચઞ્ચલત્વાત્ અહં ન પશ્યામિ ।

ચઞ્ચલં હિ મનઃ કૃષ્ણ પ્રમાથિ બલવદ્ દૃઢમ્ ।
તસ્યાહં નિગ્રહં મન્યે વાયોરિવ સુદુષ્કરમ્ ॥ ૬-૩૪॥

ચઞ્ચલમ્ હિ મનઃ કૃષ્ણ પ્રમાથિ બલવત્ દૃઢમ્ ।
તસ્ય અહમ્ નિગ્રહમ્ મન્યે વાયોઃ ઇવ સુદુષ્કરમ્ ॥ ૬-૩૪॥

હે કૃષ્ણ! મનઃ બલવત્ દૃઢમ્ ચઞ્ચલમ્ પ્રમાથિ,
અહમ્ હિ તસ્ય નિગ્રહમ્ વાયોઃ ઇવ, સુદુષ્કરમ્ મન્યે ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

અસંશયં મહાબાહો મનો દુર્નિગ્રહં ચલમ્ ।
અભ્યાસેન તુ કૌન્તેય વૈરાગ્યેણ ચ ગૃહ્યતે ॥ ૬-૩૫॥

અસંશયમ્ મહાબાહો મનઃ દુર્નિગ્રહમ્ ચલમ્ ।
અભ્યાસેન તુ કૌન્તેય વૈરાગ્યેણ ચ ગૃહ્યતે ॥ ૬-૩૫॥

હે મહાબાહો! મનઃ અસંશયમ્ ચલમ્ દુર્નિગ્રહમ્,
હે કૌન્તેય! (તત્) તુ અભ્યાસેન વૈરાગ્યેણ ચ ગૃહ્યતે ।

અસંયતાત્મના યોગો દુષ્પ્રાપ ઇતિ મે મતિઃ ।
વશ્યાત્મના તુ યતતા શક્યોઽવાપ્તુમુપાયતઃ ॥ ૬-૩૬॥

અસંયત-આત્મના યોગઃ દુષ્પ્રાપઃ ઇતિ મે મતિઃ ।
વશ્ય-આત્મના તુ યતતા શક્યઃ અવાપ્તુમ્ ઉપાયતઃ ॥ ૬-૩૬॥

અસંયત-આત્મના યોગઃ દુષ્પ્રાપઃ, વશ્ય-આત્મના યતતા
તુ ઉપાયતઃ અવાપ્તુમ્ શક્યઃ, ઇતિ મે મતિઃ ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

અયતિઃ શ્રદ્ધયોપેતો યોગાચ્ચલિતમાનસઃ ।
અપ્રાપ્ય યોગસંસિદ્ધિં કાં ગતિં કૃષ્ણ ગચ્છતિ ॥ ૬-૩૭॥

અયતિઃ શ્રદ્ધયા ઉપેતઃ યોગાત્ ચલિત-માનસઃ ।
અપ્રાપ્ય યોગ-સંસિદ્ધિમ્ કામ્ ગતિમ્ કૃષ્ણ ગચ્છતિ ॥ ૬-૩૭॥

હે કૃષ્ણ! શ્રદ્ધયા ઉપેતઃ અયતિઃ, યોગાત્ ચલિત-માનસઃ,
યોગ-સંસિદ્ધિમ્ અપ્રાપ્ય, કામ્ ગતિમ્ ગચ્છતિ?

કચ્ચિન્નોભયવિભ્રષ્ટશ્છિન્નાભ્રમિવ નશ્યતિ ।
અપ્રતિષ્ઠો મહાબાહો વિમૂઢો બ્રહ્મણઃ પથિ ॥ ૬-૩૮॥

કચ્ચિત્ ન ઉભય-વિભ્રષ્ટઃ છિન્ન-અભ્રમ્ ઇવ નશ્યતિ ।
અપ્રતિષ્ઠઃ મહાબાહો વિમૂઢઃ બ્રહ્મણઃ પથિ ॥ ૬-૩૮॥

હે મહાબાહો! બ્રહ્મણઃ પથિ અપ્રતિષ્ઠઃ વિમૂઢઃ ઉભય-વિભ્રષ્ટઃ
છિન્ન-અભ્રમ્ ઇવ ન નશ્યતિ કચ્ચિત્?

એતન્મે સંશયં કૃષ્ણ છેત્તુમર્હસ્યશેષતઃ ।
ત્વદન્યઃ સંશયસ્યાસ્ય છેત્તા ન હ્યુપપદ્યતે ॥ ૬-૩૯॥

એતત્ મે સંશયમ્ કૃષ્ણ છેત્તુમ્ અર્હસિ અશેષતઃ ।
ત્વત્ અન્યઃ સંશયસ્ય અસ્ય છેત્તા ન હિ ઉપપદ્યતે ॥ ૬-૩૯॥

હે કૃષ્ણ! મે એતત્ સંશયમ્ અશેષતઃ છેત્તુમ્ અર્હસિ;
હિ ત્વત્ અન્યઃ અસ્ય સંશયસ્ય છેત્તા ન ઉપપદ્યતે ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

પાર્થ નૈવેહ નામુત્ર વિનાશસ્તસ્ય વિદ્યતે ।
ન હિ કલ્યાણકૃત્કશ્ચિદ્ દુર્ગતિં તાત ગચ્છતિ ॥ ૬-૪૦॥

પાર્થ ન એવ ઇહ ન અમુત્ર વિનાશઃ તસ્ય વિદ્યતે ।
ન હિ કલ્યાણ-કૃત્ કશ્ચિત્ દુર્ગતિમ્ તાત ગચ્છતિ ॥ ૬-૪૦॥

હે પાર્થ! ન ઇહ ન એવ (ચ) અમુત્ર તસ્ય વિનાશઃ વિદ્યતે ।
હે તાત! હિ કશ્ચિત્ કલ્યાણ-કૃત્ દુર્ગતિમ્ ન ગચ્છતિ ।

પ્રાપ્ય પુણ્યકૃતાં લોકાનુષિત્વા શાશ્વતીઃ સમાઃ ।
શુચીનાં શ્રીમતાં ગેહે યોગભ્રષ્ટોઽભિજાયતે ॥ ૬-૪૧॥

પ્રાપ્ય પુણ્ય-કૃતામ્ લોકાન્ ઉષિત્વા શાશ્વતીઃ સમાઃ ।

શુચીનામ્ શ્રીમતામ્ ગેહે યોગ-ભ્રષ્ટઃ અભિજાયતે ॥ ૬-૪૧॥

યોગ-ભ્રષ્ટઃ પુણ્ય-કૃતામ્ લોકાન્ પ્રાપ્ય, (તત્ર)
શાશ્વતીઃ સમાઃ ઉષિત્વા, શુચીનામ્ શ્રીમતામ્ ગેહે અભિજાયતે ।

અથવા યોગિનામેવ કુલે ભવતિ ધીમતામ્ ।
એતદ્ધિ દુર્લભતરં લોકે જન્મ યદીદૃશમ્ ॥ ૬-૪૨॥

અથવા યોગિનામ્ એવ કુલે ભવતિ ધીમતામ્ ।
એતત્ હિ દુર્લભતરં લોકે જન્મ યત્ ઈદૃશમ્ ॥ ૬-૪૨॥

અથવા ધીમતામ્ યોગિનામ્ એવ કુલે ભવતિ, યત્ એતત્
ઈદૃશમ્ જન્મ લોકે દુર્લભતરં હિ ।

તત્ર તં બુદ્ધિસંયોગં લભતે પૌર્વદેહિકમ્ ।
યતતે ચ તતો ભૂયઃ સંસિદ્ધૌ કુરુનન્દન ॥ ૬-૪૩॥

તત્ર તમ્ બુદ્ધિ-સંયોગમ્ લભતે પૌર્વ-દેહિકમ્ ।
યતતે ચ તતઃ ભૂયઃ સંસિદ્ધૌ કુરુનન્દન ॥ ૬-૪૩॥

હે કુરુનન્દન! (સઃ) તત્ર તમ્ પૌર્વ-દેહિકમ્ બુદ્ધિ-સંયોગમ્
લભતે, તતઃ ચ ભૂયઃ સંસિદ્ધૌ યતતે ।

પૂર્વાભ્યાસેન તેનૈવ હ્રિયતે હ્યવશોઽપિ સઃ ।
જિજ્ઞાસુરપિ યોગસ્ય શબ્દબ્રહ્માતિવર્તતે ॥ ૬-૪૪॥

પૂર્વ-અભ્યાસેન તેન એવ હ્રિયતે હિ અવશઃ અપિ સઃ ।
જિજ્ઞાસુઃ અપિ યોગસ્ય શબ્દ-બ્રહ્મ અતિવર્તતે ॥ ૬-૪૪॥

તેન એવ પૂર્વ-અભ્યાસેન સઃ અવશઃ અપિ હ્રિયતે, હિ
યોગસ્ય જિજ્ઞાસુઃ અપિ શબ્દ-બ્રહ્મ અતિવર્તતે ।

પ્રયત્નાદ્યતમાનસ્તુ યોગી સંશુદ્ધકિલ્બિષઃ ।
અનેકજન્મસંસિદ્ધસ્તતો યાતિ પરાં ગતિમ્ ॥ ૬-૪૫॥

પ્રયત્નાત્ યતમાનઃ તુ યોગી સંશુદ્ધ-કિલ્બિષઃ ।
અનેક-જન્મ-સંસિદ્ધઃ તતઃ યાતિ પરામ્ ગતિમ્ ॥ ૬-૪૫॥

તતઃ પ્રયત્નાત્ યતમાનઃ સંશુદ્ધ-કિલ્બિષઃ યોગી તુ
અનેક-જન્મ-સંસિદ્ધઃ પરામ્ ગતિમ્ યાતિ ।

તપસ્વિભ્યોऽધિકો યોગી જ્ઞાનિભ્યોऽપિ મતોऽધિકઃ ।
કર્મિભ્યશ્ચાધિકો યોગી તસ્માદ્યોગી ભવાર્જુન ॥ ૬-૪૬॥

તપસ્વિભ્યઃ અધિકઃ યોગી જ્ઞાનિભ્યઃ અપિ મતઃ અધિકઃ ।
કર્મિભ્યઃ ચ અધિકઃ યોગી તસ્માત્ યોગી ભવ અર્જુન ॥ ૬-૪૬॥

યોગી તપસ્વિભ્યઃ અધિકઃ, જ્ઞાનિભ્યઃ અપિ ચ અધિકઃ મતઃ,
યોગી કર્મિભ્યઃ (ચ) અધિકઃ, તસ્માત્ હે અર્જુન!
(ત્વં) યોગી ભવ ।

યોગિનામપિ સર્વેષાં મદ્ગતેનાન્તરાત્મના ।
શ્રદ્ધાવાન્ભજતે યો માં સ મે યુક્તતમો મતઃ ॥ ૬-૪૭॥

યોગિનામ્ અપિ સર્વેષામ્ મત્ ગતેન અન્તર-આત્મના ।
શ્રદ્ધાવાન્ ભજતે યઃ મામ્ સઃ મે યુક્તતમઃ મતઃ ॥ ૬-૪૭॥

સર્વેષામ્ અપિ યોગિનામ્ યઃ શ્રદ્ધાવાન્, મત્ ગતેન
અન્તર-આત્મના મામ્ ભજતે, સઃ મે યુક્તતમઃ મતઃ ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
આત્મસંયમયોગો નામ ષષ્ઠોऽધ્યાયઃ ॥ ૬॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદે
આત્મ-સંયમ-યોગઃ નામ ષષ્ઠઃ અધ્યાયઃ ॥ ૬॥

---

અથ સપ્તમોऽધ્યાયઃ । જ્ઞાનવિજ્ઞાનયોગઃ ।
અથ સપ્તમઃ અધ્યાયઃ । જ્ઞાન-વિજ્ઞાન-યોગઃ ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

મય્યાસક્તમનાઃ પાર્થ યોગં યુઞ્જન્મદાશ્રયઃ ।
અસંશયં સમગ્રં માં યથા જ્ઞાસ્યસિ તચ્છૃણુ ॥ ૭-૧॥

મયિ આસક્ત-મનાઃ પાર્થ યોગમ્ યુઞ્જન્ મત્ આશ્રયઃ ।
અસંશયમ્ સમગ્રમ્ મામ્ યથા જ્ઞાસ્યસિ તત્ શ઼ૃણુ ॥ ૭-૧॥

હે પાર્થ! મયિ આસક્ત-મનાઃ મત્ આશ્રયઃ (ત્વં) યોગમ્
યુઞ્જન્, મામ્ સમગ્રમ્ યથા અસંશયમ્ જ્ઞાસ્યસિ, તત્ શ ृણુ ।

જ્ઞાનં તેઽહં સવિજ્ઞાનમિદં વક્ષ્યામ્યશેષતઃ ।
યજ્જ્ઞાત્વા નેહ ભૂયોઽન્યજ્જ્ઞાતવ્યમવશિષ્યતે ॥ ૭-૨॥

જ્ઞાનમ્ તે અહમ્ સવિજ્ઞાનમ્ ઇદમ્ વક્ષ્યામિ અશેષતઃ ।
યત્ જ્ઞાત્વા ન ઇહ ભૂયઃ અન્યત્ જ્ઞાતવ્યમ્ અવશિષ્યતે ॥ ૭-૨॥

અહમ્ ઇદમ્ સવિજ્ઞાનમ્ જ્ઞાનમ્ તે અશેષતઃ વક્ષ્યામિ;
યત્ જ્ઞાત્વા ઇહ ભૂયઃ અન્યત્ જ્ઞાતવ્યમ્ ન અવશિષ્યતે ।

મનુષ્યાણાં સહસ્રેષુ કશ્ચિદ્યતતિ સિદ્ધયે ।
યતતામપિ સિદ્ધાનાં કશ્ચિન્માં વેત્તિ તત્ત્વતઃ ॥ ૭-૩॥

મનુષ્યાણામ્ સહસ્રેષુ કશ્ચિત્ યતતિ સિદ્ધયે ।
યતતામ્ અપિ સિદ્ધાનામ્ કશ્ચિત્ મામ્ વેત્તિ તત્ત્વતઃ ॥ ૭-૩॥

મનુષ્યાણામ્ સહસ્રેષુ કશ્ચિત્ સિદ્ધયે યતતિ;
યતતામ્ સિદ્ધાનામ્ અપિ કશ્ચિત્ મામ્ તત્ત્વતઃ વેત્તિ ।

ભૂમિરાપોઽનલો વાયુઃ ખં મનો બુદ્ધિરેવ ચ ।
અહંકાર ઇતીયં મે ભિન્ના પ્રકૃતિરષ્ટધા ॥ ૭-૪॥

ભૂમિઃ આપઃ અનલઃ વાયુઃ ખમ્ મનઃ બુદ્ધિઃ એવ ચ ।
અહંકારઃ ઇતિ ઇયમ્ મે ભિન્ના પ્રકૃતિઃ અષ્ટધા ॥ ૭-૪॥

ભૂમિઃ, આપઃ, અનલઃ, વાયુઃ, ખમ્, મનઃ, બુદ્ધિઃ એવ ચ
અહંકારઃ ઇતિ અષ્ટધા ભિન્ના મે ઇયમ્ પ્રકૃતિઃ ।

અપરેયમિતસ્ત્વન્યાં પ્રકૃતિં વિદ્ધિ મે પરામ્ ।
જીવભૂતાં મહાબાહો યયેદં ધાર્યતે જગત્ ॥ ૭-૫॥

અપરા ઇયમ્ ઇતઃ તુ અન્યામ્ પ્રકૃતિમ્ વિદ્ધિ મે પરામ્ ।
જીવ-ભૂતામ્ મહાબાહો યયા ઇદમ્ ધાર્યતે જગત્ ॥ ૭-૫॥

હે મહાબાહો! ઇયમ્ અપરા (પ્રકૃતિઃ અસ્તિ) ઇતઃ તુ અન્યામ્
જીવ-ભૂતામ્ મે પરામ્ પ્રકૃતિમ્ વિદ્ધિ, યયા ઇદમ્ જગત્ ધાર્યતે ।

એતદ્યોનીનિ ભૂતાનિ સર્વાણીત્યુપધારય ।
અહં કૃત્સ્નસ્ય જગતઃ પ્રભવઃ પ્રલયસ્તથા ॥ ૭-૬॥

એતત્ યોનીનિ ભૂતાનિ સર્વાણિ ઇતિ ઉપધારય ।
અહમ્ કૃત્સ્નસ્ય જગતઃ પ્રભવઃ પ્રલયઃ તથા ॥ ૭-૬॥

સર્વાણિ ભૂતાનિ એતત્ યોનીનિ ઇતિ, ઉપધારય । અહમ્ કૃત્સ્નસ્ય
જગતઃ પ્રભવઃ તથા પ્રલયઃ (અસ્મિ)।

મત્તઃ પરતરં નાન્યત્કિઞ્ચિદસ્તિ ધનઞ્જય ।
મયિ સર્વમિદં પ્રોતં સૂત્રે મણિગણા ઇવ ॥ ૭-૭॥

મત્તઃ પરતરં ન અન્યત્ કિઞ્ચિત્ અસ્તિ ધનઞ્જય ।
મયિ સર્વમ્ ઇદમ્ પ્રોતમ્ સૂત્રે મણિગણાઃ ઇવ ॥ ૭-૭॥

હે ધનઞ્જય! મત્તઃ પરતરં અન્યત્ કિઞ્ચિત્ ન અસ્તિ ।
સૂત્રે મણિગણાઃ ઇવ ઇદમ્ સર્વમ્ મયિ પ્રોતમ્ ।

રસોઽહમપ્સુ કૌન્તેય પ્રભાસ્મિ શશિસૂર્યયોઃ ।
પ્રણવઃ સર્વવેદેષુ શબ્દઃ ખે પૌરુષં નૃષુ ॥ ૭-૮॥

રસઃ અહમ્ અપ્સુ કૌન્તેય પ્રભા અસ્મિ શશિ-સૂર્યયોઃ ।
પ્રણવઃ સર્વ-વેદેષુ શબ્દઃ ખે પૌરુષમ્ નૃષુ ॥ ૭-૮॥

હે કૌન્તેય! અહમ્ અપ્સુ રસઃ, શશિ-સૂર્યયોઃ પ્રભા,
સર્વ-વેદેષુ પ્રણવઃ, ખે શબ્દઃ, નૃષુ પૌરુષમ્ અસ્મિ ।

પુણ્યો ગન્ધઃ પૃથિવ્યાં ચ તેજશ્ચાસ્મિ વિભાવસૌ ।
જીવનં સર્વભૂતેષુ તપશ્ચાસ્મિ તપસ્વિષુ ॥ ૭-૯॥

પુણ્યઃ ગન્ધઃ પૃથિવ્યામ્ ચ તેજઃ ચ અસ્મિ વિભાવસૌ ।
જીવનમ્ સર્વ-ભૂતેષુ તપઃ ચ અસ્મિ તપસ્વિષુ ॥ ૭-૯॥

ચ પૃથિવ્યામ્ પુણ્યઃ ગન્ધઃ, વિભાવસૌ ચ તેજઃ અસ્મિ;
સર્વ-ભૂતેષુ જીવનમ્, તપસ્વિષુ ચ તપઃ અસ્મિ ।

બીજં માં સર્વભૂતાનાં વિદ્ધિ પાર્થ સનાતનમ્ ।
બુદ્ધિર્બુદ્ધિમતામસ્મિ તેજસ્તેજસ્વિનામહમ્ ॥ ૭-૧૦॥

બીજમ્ મામ્ સર્વ-ભૂતાનામ્ વિદ્ધિ પાર્થ સનાતનમ્ ।
બુદ્ધિઃ બુદ્ધિમતામ્ અસ્મિ તેજઃ તેજસ્વિનામ્ અહમ્ ॥ ૭-૧૦॥

હે પાર્થ! મામ્ સર્વ-ભૂતાનામ્ સનાતનમ્ બીજમ્ વિદ્ધિ,

અહમ્ બુદ્ધિમતામ્ બુદ્ધિઃ અસ્મિ, તેજસ્વિનામ્ તેજઃ ।

બલં બલવતાં ચાહં કામરાગવિવર્જિતમ્ ।
ધર્માવિરુદ્ધો ભૂતેષુ કામોઽસ્મિ ભરતર્ષભ ॥ ૭-૧૧॥

બલમ્ બલવતામ્ ચ અહમ્ કામ-રાગ-વિવર્જિતમ્ ।
ધર્મ-અવિરુદ્ધઃ ભૂતેષુ કામઃ અસ્મિ ભરતર્ષભ ॥ ૭-૧૧-

અહમ્ ચ બલવતામ્ કામ-રાગ-વિવર્જિતમ્ બલમ્ અસ્મિ,
હે ભરતર્ષભ! ભૂતેષુ ધર્મ-અવિરુદ્ધઃ કામઃ (અહમ્ અસ્મિ)।

યે ચૈવ સાત્ત્વિકા ભાવા રાજસાસ્તામસાશ્ચ યે ।
મત્ત એવેતિ તાન્વિદ્ધિ ન ત્વહં તેષુ તે મયિ ॥ ૭-૧૨॥

યે ચ એવ સાત્ત્વિકાઃ ભાવાઃ રાજસાઃ તામસાઃ ચ યે ।
મત્તઃ એવ ઇતિ તાન્ વિદ્ધિ ન તુ અહં તેષુ તે મયિ ॥ ૭-૧૨॥

યે ચ એવ સાત્ત્વિકાઃ રાજસાઃ તામસાઃ ચ ભાવાઃ, તે
મત્તઃ એવ ઇતિ તાન્ વિદ્ધિ, અહં તેષુ ન (અસ્મિ), તુ તે મયિ (વર્તન્તે) ।

ત્રિભિઃ ગુણમયૈઃ ભાવૈઃ એભિઃ સર્વમ્ ઇદમ્ જગત્ ।
મોહિતમ્ ન અભિજાનાતિ મામ્ એભ્યઃ પરમ્ અવ્યયમ્ ॥ ૭-૧૩॥

ત્રિભિર્ગુણમયૈર્ભાવૈરેભિઃ સર્વમિદં જગત્ ।
મોહિતં નાભિજાનાતિ મામેભ્યઃ પરમવ્યયમ્ ॥ ૭-૧૩॥

એભિઃ ત્રિભિઃ ગુણમયૈઃ ભાવૈઃ ઇદમ્ સર્વમ્ જગત્ મોહિતમ્,
(અતઃ) એભ્યઃ પરમ્ અવ્યયમ્ મામ્ ન અભિજાનાતિ ।

દૈવી હ્યેષા ગુણમયી મમ માયા દુરત્યયા ।
મામેવ યે પ્રપદ્યન્તે માયામેતાં તરન્તિ તે ॥ ૭-૧૪॥

દૈવી હિ એષા ગુણમયી મમ માયા દુરત્યયા ।
મામ્ એવ યે પ્રપદ્યન્તે માયામ્ એતામ્ તરન્તિ તે ॥ ૭-૧૪॥

એષા દૈવી ગુણમયી મમ માયા હિ દુરત્યયા । યે મામ્ એવ
પ્રપદ્યન્તે, તે એતામ્ માયામ્ તરન્તિ ।

ન માં દુષ્કૃતિનો મૂઢાઃ પ્રપદ્યન્તે નરાધમાઃ ।
માયયાપહૃતજ્ઞાના આસુરં ભાવમાશ્રિતાઃ ॥ ૭-૧૫॥

ન મામ્ દુષ્કૃતિનઃ મૂઢાઃ પ્રપદ્યન્તે નર-અધમાઃ ।
માયયા અપહૃત-જ્ઞાનાઃ આસુરમ્ ભાવમ્ આશ્રિતાઃ ॥ ૭-૧૫॥

માયયા અપહૃત-જ્ઞાનાઃ આસુરમ્ ભાવમ્ આશ્રિતાઃ
દુષ્કૃતિનઃ મૂઢાઃ નર-અધમાઃ મામ્ ન પ્રપદ્યન્તે ।

ચતુર્વિધા ભજન્તે માં જનાઃ સુકૃતિનોઽર્જુન ।
આર્તો જિજ્ઞાસુરર્થાર્થી જ્ઞાની ચ ભરતર્ષભ ॥ ૭-૧૬॥

ચતુઃ-વિધાઃ ભજન્તે મામ્ જનાઃ સુકૃતિનઃ અર્જુન ।
આર્તઃ જિજ્ઞાસુઃ અર્થાર્થી જ્ઞાની ચ ભરતર્ષભ ॥ ૭-૧૬॥

હે ભરતર્ષભ અર્જુન! આર્તઃ, જિજ્ઞાસુઃ, અર્થાર્થી,
જ્ઞાની ચ (ઇતિ) ચતુઃ-વિધાઃ સુકૃતિનઃ જનાઃ મામ્ ભજન્તે ।

તેષાં જ્ઞાની નિત્યયુક્ત એકભક્તિર્વિશિષ્યતે ।
પ્રિયો હિ જ્ઞાનિનોઽત્યર્થમહં સ ચ મમ પ્રિયઃ ॥ ૭-૧૭॥

તેષામ્ જ્ઞાની નિત્ય-યુક્તઃ એક-ભક્તિઃ વિશિષ્યતે ।
પ્રિયઃ હિ જ્ઞાનિનઃ અત્યર્થમ્ અહમ્ સઃ ચ મમ પ્રિયઃ ॥ ૭-૧૭॥

તેષામ્ નિત્ય-યુક્તઃ એક-ભક્તિઃ જ્ઞાની વિશિષ્યતે । અહમ્ હિ
જ્ઞાનિનઃ અત્યર્થમ્ પ્રિયઃ (અસ્મિ), સઃ (જ્ઞાની) ચ મમ પ્રિયઃ (અસ્તિ)।

ઉદારાઃ સર્વ એવૈતે જ્ઞાની ત્વાત્મૈવ મે મતમ્ ।
આસ્થિતઃ સ હિ યુક્તાત્મા મામેવાનુત્તમાં ગતિમ્ ॥ ૭-૧૮॥

ઉદારાઃ સર્વે એવ એતે જ્ઞાની તુ આત્મા એવ મે મતમ્ ।
આસ્થિતઃ સઃ હિ યુક્ત-આત્મા મામ્ એવ અનુત્તમામ્ ગતિમ્ ॥ ૭-૧૮॥

એતે સર્વે એવ ઉદારાઃ (સન્તિ), જ્ઞાની તુ (મમ) આત્મા એવ
(અસ્તિ ઇતિ) મે મતમ્ । સઃ હિ યુક્ત-આત્મા અનુત્તમામ્ ગતિમ્
મામ્ એવ આસ્થિતઃ (અસ્તિ)।

બહૂનાં જન્મનામન્તે જ્ઞાનવાન્માં પ્રપદ્યતે ।
વાસુદેવઃ સર્વમિતિ સ મહાત્મા સુદુર્લભઃ ॥ ૭-૧૯॥

બહૂનામ્ જન્મનામ્ અન્તે જ્ઞાનવાન્ મામ્ પ્રપદ્યતે ।
વાસુદેવઃ સર્વમ્ ઇતિ સઃ મહાત્મા સુદુર્લભઃ ॥ ૭-૧૯॥

જ્ઞાનવાન્ બહૂનામ્ જન્મનામ્ અન્તે 'વાસુદેવઃ

સર્વમ્' ઇતિ (અનુભૂય) મામ્ પ્રપદ્યતે । સઃ મહાત્મા સુદુર્લભઃ ।

કામૈસ્તૈસ્તૈર્હૃતજ્ઞાનાઃ પ્રપદ્યન્તેઽન્યદેવતાઃ ।
તં તં નિયમમાસ્થાય પ્રકૃત્યા નિયતાઃ સ્વયા ॥ ૭-૨૦॥

કામૈઃ તૈઃ તૈઃ હૃત-જ્ઞાનાઃ પ્રપદ્યન્તે અન્ય-દેવતાઃ ।
તમ્ તમ્ નિયમમ્ આસ્થાય પ્રકૃત્યા નિયતાઃ સ્વયા ॥ ૭-૨૦॥

તૈઃ તૈઃ કામૈઃ હૃત-જ્ઞાનાઃ સ્વયા પ્રકૃત્યા નિયતાઃ
(અજ્ઞાનિનઃ) તમ્ તમ્ નિયમમ્ આસ્થાય અન્ય-દેવતાઃ પ્રપદ્યન્તે ।

યો યો યાં યાં તનું ભક્તઃ શ્રદ્ધયાર્ચિતુમિચ્છતિ ।
તસ્ય તસ્યાચલાં શ્રદ્ધાં તામેવ વિદધામ્યહમ્ ॥ ૭-૨૧॥

યઃ યઃ યામ્ યામ્ તનુમ્ ભક્તઃ શ્રદ્ધયા અર્ચિતુમ્ ઇચ્છતિ ।
તસ્ય તસ્ય અચલામ્ શ્રદ્ધામ્ તામ્ એવ વિદધામિ અહમ્ ॥ ૭-૨૧॥

યઃ યઃ ભક્તઃ યામ્ યામ્ તનુમ્ શ્રદ્ધયા અર્ચિતુમ્ ઇચ્છતિ,
તસ્ય તસ્ય તામ્ એવ શ્રદ્ધામ્ અહમ્ અચલામ્ વિદધામિ ।

સ તયા શ્રદ્ધયા યુક્તસ્તસ્યારાધનમીહતે ।
લભતે ચ તતઃ કામાન્મયૈવ વિહિતાન્હિ તાન્ ॥ ૭-૨૨॥

સઃ તયા શ્રદ્ધયા યુક્તઃ તસ્ય અરાધનમ્ ઈહતે ।
લભતે ચ તતઃ કામાન્ મયા એવ વિહિતાન્ હિ તાન્ ॥ ૭-૨૨॥

સઃ તયા શ્રદ્ધયા યુક્તઃ તસ્ય આરાધનમ્ ઈહતે, તતઃ ચ
મયા એવ વિહિતાન્ તાન્ કામાન્ લભતે હિ ।

અન્તવત્તુ ફલં તેષાં તદ્ભવત્યલ્પમેધસામ્ ।
દેવાન્દેવયજો યાન્તિ મદ્ભક્તા યાન્તિ મામપિ ॥ ૭-૨૩॥

અન્તવત્ તુ ફલમ્ તેષામ્ તત્ ભવતિ અલ્પ-મેધસામ્ ।
દેવાન્ દેવ-યજઃ યાન્તિ મત્ ભક્તાઃ યાન્તિ મામ્ અપિ ॥ ૭-૨૩॥

તેષામ્ અલ્પ-મેધસામ્ તત્ ફલમ્ તુ અન્તવત્ ભવતિ;
દેવ-યજઃ દેવાન્ યાન્તિ, મત્ ભક્તાઃ અપિ મામ્ યાન્તિ ।

અવ્યક્તં વ્યક્તિમાપન્નં મન્યન્તે મામબુદ્ધયઃ ।
પરં ભાવમજાનન્તો મમાવ્યયમનુત્તમમ્ ॥ ૭-૨૪॥

અવ્યક્તમ્ વ્યક્તિમ્ આપન્નમ્ મન્યન્તે મામ્ અબુદ્ધયઃ ।
પરમ્ ભાવમ્ અજાનન્તઃ મમ અવ્યયમ્ અનુત્તમમ્ ॥ ૭-૨૪॥

મમ પરમ્ અવ્યયમ્ અવ્યક્તમ્ અનુત્તમમ્ ભાવમ્
અજાનન્તઃ અબુદ્ધયઃ મામ્ વ્યક્તિમ્ આપન્નમ્ મન્યન્તે ।

નાહં પ્રકાશઃ સર્વસ્ય યોગમાયાસમાવૃતઃ ।
મૂઢોઽયં નાભિજાનાતિ લોકો મામજમવ્યયમ્ ॥ ૭-૨૫॥

ન અહમ્ પ્રકાશઃ સર્વસ્ય યોગ-માયા-સમાવૃતઃ ।
મૂઢઃ અયમ્ ન અભિજાનાતિ લોકઃ મામ્ અજમ્ અવ્યયમ્ ॥ ૭-૨૫॥

યોગ-માયા-સમાવૃતઃ અહમ્ સર્વસ્ય પ્રકાશઃ ન ।
અયમ્ મૂઢઃ લોકઃ અજમ્ અવ્યયમ્ મામ્ ન અભિજાનાતિ ।

વેદાહં સમતીતાનિ વર્તમાનાનિ ચાર્જુન ।
ભવિષ્યાણિ ચ ભૂતાનિ માં તુ વેદ ન કશ્ચન ॥ ૭-૨૬॥

વેદ અહમ્ સમતીતાનિ વર્તમાનાનિ ચ અર્જુન ।
ભવિષ્યાણિ ચ ભૂતાનિ મામ્ તુ વેદ ન કશ્ચન ॥ ૭-૨૬॥

હે અર્જુન! અહમ્ સમતીતાનિ વર્તમાનાનિ ચ ભવિષ્યાણિ ચ
ભૂતાનિ વેદ । કશ્ચન તુ મામ્ ન વેદ ।

ઇચ્છાદ્વેષસમુત્થેન દ્વન્દ્વમોહેન ભારત ।
સર્વભૂતાનિ સમ્મોહં સર્ગે યાન્તિ પરન્તપ ॥ ૭-૨૭॥

ઇચ્છા-દ્વેષ-સમુત્થેન દ્વન્દ્વ-મોહેન ભારત ।
સર્વ-ભૂતાનિ સમ્મોહમ્ સર્ગે યાન્તિ પરન્તપ ॥ ૭-૨૭॥

હે પરન્તપ ભારત! સર્વ-ભૂતાનિ ઇચ્છા-દ્વેષ-સમુત્થેન
દ્વન્દ્વ-મોહેન સર્ગે સમ્મોહમ્ યાન્તિ ।

યેષાં ત્વન્તગતં પાપં જનાનાં પુણ્યકર્મણામ્ ।
તે દ્વન્દ્વમોહનિર્મુક્તા ભજન્તે માં દૃઢવ્રતાઃ ॥ ૭-૨૮॥

યેષામ્ તુ અન્તગતમ્ પાપમ્ જનાનામ્ પુણ્ય-કર્મણામ્ ।
તે દ્વન્દ્વ-મોહ-નિર્મુક્તાઃ ભજન્તે મામ્ દૃઢ-વ્રતાઃ ॥ ૭-૨૮॥

યેષામ્ પુણ્ય-કર્મણામ્ જનાનામ્ તુ પાપમ્ અન્તગતમ્,
તે દૃઢ-વ્રતાઃ દ્વન્દ્વ-મોહ-નિર્મુક્તાઃ મામ્ ભજન્તે ।

જરામરણમોક્ષાય મામાશ્રિત્ય યતન્તિ યે ।
તે બ્રહ્મ તદ્વિદુઃ કૃત્સ્નમધ્યાત્મં કર્મ ચાખિલમ્ ॥ ૭-૨૯ ॥

જરા-મરણ-મોક્ષાય મામ્ આશ્રિત્ય યતન્તિ યે ।
તે બ્રહ્મ તત્ વિદુઃ કૃત્સ્નમ્ અધ્યાત્મમ્ કર્મ ચ અખિલમ્ ॥ ૭-૨૯ ॥

યે મામ્ આશ્રિત્ય જરા-મરણ-મોક્ષાય યતન્તિ, તે તત્ બ્રહ્મ,
કૃત્સ્નમ્ અધ્યાત્મમ્, અખિલમ્ કર્મ ચ વિદુઃ ।

સાધિભૂતાધિદૈવં માં સાધિયજ્ઞં ચ યે વિદુઃ ।
પ્રયાણકાલેઽપિ ચ માં તે વિદુર્યુક્તચેતસઃ ॥ ૭-૩૦ ॥

સાધિભૂત-અધિદૈવમ્ મામ્ સાધિયજ્ઞમ્ ચ યે વિદુઃ ।
પ્રયાણકાલે અપિ ચ માં તે વિદુઃ યુક્ત-ચેતસઃ ॥ ૭-૩૦ ॥

યે સાધિભૂત-અધિદૈવમ્ સાધિયજ્ઞમ્ ચ મામ્ વિદુઃ
તે યુક્ત-ચેતસઃ પ્રયાણ-કાલે અપિ ચ મામ્ વિદુઃ ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
જ્ઞાનવિજ્ઞાનયોગો નામ સપ્તમોઽધ્યાયઃ ॥ ૭ ॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદે
જ્ઞાન-વિજ્ઞાન-યોગઃ નામ સપ્તમઃ અધ્યાયઃ ॥ ૭ ॥

---

અથ અષ્ટમોઽધ્યાયઃ । અક્ષરબ્રહ્મયોગઃ ।
અથ અષ્ટમઃ અધ્યાયઃ । અક્ષર-બ્રહ્મ-યોગઃ ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

કિં તદ્ બ્રહ્મ કિમધ્યાત્મં કિં કર્મ પુરુષોત્તમ ।
અધિભૂતં ચ કિં પ્રોક્તમધિદૈવં કિમુચ્યતે ॥ ૮-૧ ॥

કિમ્ તત્ બ્રહ્મ કિમ્ અધ્યાત્મમ્ કિમ્ કર્મ પુરુષોત્તમ ।
અધિભૂતમ્ ચ કિમ્ પ્રોક્તમ્ અધિદૈવમ્ કિમ્ ઉચ્યતે ॥ ૮-૧ ॥

હે પુરુષોત્તમ! તત્ બ્રહ્મ કિમ્? અધ્યાત્મમ્ કિમ્? કર્મ કિમ્?
અધિભૂતમ્ કિમ્ પ્રોક્તમ્? અધિદૈવમ્ ચ કિમ્ ઉચ્યતે ?

અધિયજ્ઞઃ કથં કોઽત્ર દેહેઽસ્મિન્મધુસૂદન ।
પ્રયાણકાલે ચ કથં જ્ઞેયોઽસિ નિયતાત્મભિઃ ॥ ૮-૨॥

અધિયજ્ઞઃ કથમ્ કઃ અત્ર દેહે અસ્મિન્ મધુસૂદન ।
પ્રયાણ-કાલે ચ કથમ્ જ્ઞેયઃ અસિ નિયત-આત્મભિઃ ॥ ૮-૨॥

હે મધુસૂદન! અત્ર અસ્મિન્ દેહે અધિયજ્ઞઃ કઃ કથમ્ (ચ અસ્તિ)?
પ્રયાણ-કાલે ચ નિયત-આત્મભિઃ કથમ્ જ્ઞેયઃ અસિ ?

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

અક્ષરં બ્રહ્મ પરમં સ્વભાવોઽધ્યાત્મમુચ્યતે ।
ભૂતભાવોદ્ભવકરો વિસર્ગઃ કર્મસંજ્ઞિતઃ ॥ ૮-૩॥

અક્ષરમ્ બ્રહ્મ પરમમ્ સ્વભાવઃ અધ્યાત્મમ્ ઉચ્યતે ।
ભૂત-ભાવ-ઉદ્ભવ-કરઃ વિસર્ગઃ કર્મ-સંજ્ઞિતઃ ॥ ૮-૩॥

અક્ષરમ્ પરમમ્ બ્રહ્મ, સ્વભાવઃ અધ્યાત્મમ્ ઉચ્યતે,
ભૂત-ભાવ-ઉદ્ભવ-કરઃ વિસર્ગઃ કર્મ-સંજ્ઞિતઃ ।

અધિભૂતં ક્ષરો ભાવઃ પુરુષશ્ચાધિદૈવતમ્ ।
અધિયજ્ઞોઽહમેવાત્ર દેહે દેહભૃતાં વર ॥ ૮-૪॥

અધિભૂતમ્ ક્ષરઃ ભાવઃ પુરુષઃ ચ અધિદૈવતમ્ ।
અધિયજ્ઞઃ અહમ્ એવ અત્ર દેહે દેહ-ભૃતામ્ વર ॥ ૮-૪॥

હે દેહ-ભૃતામ્ વર! ક્ષરઃ ભાવઃ અધિભૂતમ્, પુરુષઃ
અધિદૈવતમ્, અત્ર દેહે ચ અહમ્ એવ અધિયજ્ઞઃ ।

અન્તકાલે ચ મામેવ સ્મરન્મુક્ત્વા કલેવરમ્ ।
યઃ પ્રયાતિ સ મદ્ભાવં યાતિ નાસ્ત્યત્ર સંશયઃ ॥ ૮-૫॥

અન્ત-કાલે ચ મામ્ એવ સ્મરન્ મુક્ત્વા કલેવરમ્ ।
યઃ પ્રયાતિ સઃ મત્ ભાવમ્ યાતિ ન અસ્તિ અત્ર સંશયઃ ॥ ૮-૫॥

યઃ ચ અન્ત-કાલે મામ્ એવ સ્મરન્ કલેવરમ્ મુક્ત્વા
પ્રયાતિ, સઃ મત્ ભાવમ્ યાતિ, અત્ર સંશયઃ ન અસ્તિ ।

યં યં વાપિ સ્મરન્ભાવં ત્યજત્યન્તે કલેવરમ્ ।
તં તમેવૈતિ કૌન્તેય સદા તદ્ભાવભાવિતઃ ॥ ૮-૬॥

યમ્ યમ્ વા અપિ સ્મરન્ ભાવમ્ ત્યજતિ અન્તે કલેવરમ્ ।
તમ્ તમ્ એવ એતિ કૌન્તેય સદા તદ્ત્ ભાવ-ભાવિતઃ ॥ ૮-૬॥

હે કૌન્તેય! યમ્ યમ્ વા અપિ ભાવમ્ સ્મરન્ અન્તે કલેવરમ્ ત્યજતિ;
સદા તદ્ત્ ભાવ-ભાવિતઃ (સઃ) તમ્ તમ્ એવ એતિ ।

તસ્માત્સર્વેષુ કાલેષુ મામનુસ્મર યુધ્ય ચ ।
મય્યર્પિતમનોબુદ્ધિર્મામેવૈષ્યસ્યસંશયમ્ ॥ ૮-૭॥

તસ્માત્ સર્વેષુ કાલેષુ મામ્ અનુસ્મર યુધ્ય ચ ।
મયિ અર્પિત-મનઃ-બુદ્ધિઃ મામ્ એવ એષ્યસિ અસંશયમ્ ॥ ૮-૭॥

તસ્માત્ સર્વેષુ કાલેષુ મયિ અર્પિત-મનઃ-બુદ્ધિઃ (ભવ),
મામ્ અનુસ્મર, યુધ્ય ચ । (એવં) અસંશયમ્ મામ્ એવ એષ્યસિ ।

અભ્યાસયોગયુક્તેન ચેતસા નાન્યગામિના ।
પરમં પુરુષં દિવ્યં યાતિ પાર્થાનુચિન્તયન્ ॥ ૮-૮॥

અભ્યાસ-યોગ-યુક્તેન ચેતસા ન અન્ય-ગામિના ।
પરમમ્ પુરુષમ્ દિવ્યમ્ યાતિ પાર્થ અનુચિન્તયન્ ॥ ૮-૮॥

હે પાર્થ! અભ્યાસ-યોગ-યુક્તેન ન અન્ય-ગામિના ચેતસા
અનુચિન્તયન્, દિવ્યમ્ પરમમ્ પુરુષમ્ યાતિ ।

કવિં પુરાણમનુશાસિતારં
    અણોરણીયાંસમનુસ્મરેદ્યઃ ।
સર્વસ્ય ધાતારમચિન્ત્યરૂપમ્-
    માદિત્યવર્ણં તમસઃ પરસ્તાત્ ॥ ૮-૯॥

પ્રયાણકાલે મનસાઽચલેન
    ભક્ત્યા યુક્તો યોગબલેન ચૈવ ।
ભ્રુવોર્મધ્યે પ્રાણમાવેશ્ય સમ્યક્
    સ તં પરં પુરુષમુપૈતિ દિવ્યમ્ ॥ ૮-૧૦॥

કવિમ્ પુરાણમ્ અનુશાસિતારમ્

અણોઃ અણીયાંસમ્ અનુસ્મરેત્ યઃ ।
સર્વસ્ય ધાતારમ્ અચિન્ત્ય-રૂપં
આદિત્ય-વર્ણમ્ તમસઃ પરસ્તાત્ ॥ ૮-૯ ॥

પ્રયાણ-કાલે મનસા અચલેન
ભક્ત્યા યુક્તઃ યોગ-બલેન ચ એવ ।
ભ્રુવોઃ મધ્યે પ્રાણમ્ આવેશ્ય સમ્યક્
સઃ તમ્ પરમ્ પુરુષમ્ ઉપૈતિ દિવ્યમ્ ॥ ૮-૧૦ ॥

કવિમ્, પુરાણમ્, અનુશાસિતારમ્, અણોઃ અણીયાંસમ્,
સર્વસ્ય ધાતારમ્, અચિન્ત્ય-રૂપં, તમસઃ પરસ્તાત્
આદિત્ય-વર્ણમ્ (વિદ્યમાનં પુરુષં), પ્રયાણ-કાલે,
અચલેન મનસા, ભક્ત્યા યુક્તઃ યોગ-બલેન ચ એવ ભ્રુવોઃ
મધ્યે સમ્યક્ પ્રાણમ્ આવેશ્ય, યઃ અનુસ્મરેત્ સઃ તમ્ પરમ્ દિવ્યમ્ પુરુષમ્ ઉપૈતિ ।

યદક્ષરં વેદવિદો વદન્તિ
વિશન્તિ યદ્યતયો વીતરાગાઃ ।
યદિચ્છન્તો બ્રહ્મચર્યં ચરન્તિ
તત્તે પદં સંગ્રહેણ પ્રવક્ષ્યે ॥ ૮-૧૧ ॥

યત્ અક્ષરમ્ વેદ-વિદઃ વદન્તિ
વિશન્તિ યત્ યતયઃ વીત-રાગાઃ ।
યત્ ઇચ્છન્તઃ બ્રહ્મચર્યમ્ ચરન્તિ
તત્ તે પદમ્ સંગ્રહેણ પ્રવક્ષ્યે ॥ ૮-૧૧ ॥

વેદ-વિદઃ યત્ અક્ષરમ્ વદન્તિ, વીત-રાગાઃ યતયઃ યત્
વિશન્તિ, (બ્રહ્મચારિણઃ) યત્ ઇચ્છન્તઃ બ્રહ્મચર્યમ્ ચરન્તિ,
તત્ પદમ્ તે સંગ્રહેણ પ્રવક્ષ્યે ।

સર્વદ્વારાણિ સંયમ્ય મનો હૃદિ નિરુધ્ય ચ ।
મૂર્ધ્ન્યાધાયાત્મનઃ પ્રાણમાસ્થિતો યોગધારણામ્ ॥ ૮-૧૨ ॥

ઓમિત્યેકાક્ષરં બ્રહ્મ વ્યાહરન્મામનુસ્મરન્ ।
યઃ પ્રયાતિ ત્યજન્દેહં સ યાતિ પરમાં ગતિમ્ ॥ ૮-૧૩ ॥

સર્વ-દ્વારાણિ સંયમ્ય મનઃ હૃદિ નિરુધ્ય ચ ।
મૂર્ધ્નિ આધાય આત્મનઃ પ્રાણમ્ આસ્થિતઃ યોગ-ધારણામ્ ॥ ૮-૧૨ ॥

ઓમ્ ઇતિ એક-અક્ષરમ્ બ્રહ્મ વ્યાહરન્ મામ્ અનુસ્મરન્ ।
યઃ પ્રયાતિ ત્યજન્ દેહમ્ સઃ યાતિ પરમામ્ ગતિમ્ ॥ ૮-૧૩॥

સર્વ-દ્વારાણિ સંયમ્ય, મનઃ ચ હૃદિ નિરુધ્ય,
મૂર્ધ્નિ આત્મનઃ પ્રાણમ્ આધાય, યોગ-ધારણામ્ આસ્થિતઃ,
ઓમ્ ઇતિ એક-અક્ષરમ્ બ્રહ્મ વ્યાહરન્ મામ્ અનુસ્મરન્,
યઃ દેહમ્ ત્યજન્ પ્રયાતિ, સઃ પરમામ્ ગતિમ્ યાતિ ।

અનન્યચેતાઃ સતતં યો માં સ્મરતિ નિત્યશઃ ।
તસ્યાહં સુલભઃ પાર્થ નિત્યયુક્તસ્ય યોગિનઃ ॥ ૮-૧૪॥

અનન્ય-ચેતાઃ સતતમ્ યઃ મામ્ સ્મરતિ નિત્યશઃ ।
તસ્ય અહં સુલભઃ પાર્થ નિત્ય-યુક્તસ્ય યોગિનઃ ॥ ૮-૧૪॥

હે પાર્થ! યઃ નિત્યશઃ અનન્ય-ચેતાઃ (સન્) મામ્
સતતં સ્મરતિ, તસ્ય નિત્ય-યુક્તસ્ય યોગિનઃ અહં સુલભઃ (અસ્મિ) ।

મામુપેત્ય પુનર્જન્મ દુઃખાલયમશાશ્વતમ્ ।
નાપ્નુવન્તિ મહાત્માનઃ સંસિદ્ધિં પરમાં ગતાઃ ॥ ૮-૧૫॥

મામ્ ઉપેત્ય પુનઃ-જન્મ દુઃખ-આલયમ્ અશાશ્વતમ્ ।
ન આપ્નુવન્તિ મહાત્માનઃ સંસિદ્ધિમ્ પરમામ્ ગતાઃ ॥ ૮-૧૫॥

પરમામ્ સંસિદ્ધિમ્ ગતાઃ મહાત્માનઃ મામ્ ઉપેત્ય,
પુનઃ દુઃખ-આલયમ્ અશાશ્વતમ્ જન્મ ન આપ્નુવન્તિ ।

આબ્રહ્મભુવનાલ્લોકાઃ પુનરાવર્તિનોઽર્જુન ।
મામુપેત્ય તુ કૌન્તેય પુનર્જન્મ ન વિદ્યતે ॥ ૮-૧૬॥

આબ્રહ્મ-ભુવનાત્ લોકાઃ પુનઃ-આવર્તિનઃ અર્જુન ।
મામ્ ઉપેત્ય તુ કૌન્તેય પુનઃ-જન્મ ન વિદ્યતે ॥ ૮-૧૬॥

હે અર્જુન! આબ્રહ્મ-ભુવનાત્ (સર્વે) લોકાઃ પુનઃ-આવર્તિનઃ
(સન્તિ); હે કૌન્તેય! મામ્ ઉપેત્ય તુ પુનઃ જન્મ ન વિદ્યતે ।

સહસ્રયુગપર્યન્તમહર્યદ્ બ્રહ્મણો વિદુઃ ।
રાત્રિં યુગસહસ્રાન્તાં તેઽહોરાત્રવિદો જનાઃ ॥ ૮-૧૭॥

સહસ્ર-યુગ-પર્યન્તમ્ અહઃ યત્ બ્રહ્મણઃ વિદુઃ ।
રાત્રિમ્ યુગ-સહસ્ર-અન્તામ્ તે અહોરાત્ર-વિદઃ જનાઃ ॥ ૮-૧૭॥

યત્ તે અહોરાત્ર-વિદઃ જનાઃ સહસ્ર-યુગ-પર્યન્તમ્ બ્રહ્મણઃ
અહઃ યુગ-સહસ્ર-અન્તામ્ રાત્રિમ્ (ચ) વિદુઃ ।

અવ્યક્તાદ્ વ્યક્તયઃ સર્વાઃ પ્રભવન્ત્યહરાગમે ।
રાત્ર્યાગમે પ્રલીયન્તે તત્રૈવાવ્યક્તસંજ્ઞકે ॥ ૮-૧૮॥

અવ્યક્તાત્ વ્યક્તયઃ સર્વાઃ પ્રભવન્તિ અહઃ આગમે ।
રાત્રિ આગમે પ્રલીયન્તે તત્ર એવ અવ્યક્ત-સંજ્ઞકે ॥ ૮-૧૮॥

અહઃ આગમે સર્વાઃ વ્યક્તયઃ અવ્યક્તાત્ પ્રભવન્તિ,
(પુનઃ) રાત્રિ આગમે તત્ર અવ્યક્ત-સંજ્ઞકે એવ પ્રલીયન્તે ।

ભૂતગ્રામઃ સ એવાયં ભૂત્વા ભૂત્વા પ્રલીયતે ।
રાત્ર્યાગમેઽવશઃ પાર્થ પ્રભવત્યહરાગમે ॥ ૮-૧૯॥

ભૂત-ગ્રામઃ સઃ એવ અયમ્ ભૂત્વા ભૂત્વા પ્રલીયતે ।
રાત્રિ આગમે અવશઃ પાર્થ પ્રભવતિ અહઃ આગમે ॥ ૮-૧૯॥

હે પાર્થ! સઃ એવ અયમ્ ભૂત-ગ્રામઃ અવશઃ (સન્),
ભૂત્વા ભૂત્વા રાત્રિ આગમે પ્રલીયતે (પુનઃ) અહઃ આગમે પ્રભવતિ ।

પરસ્તસ્માત્તુ ભાવોઽન્યોઽવ્યક્તોઽવ્યક્તાત્સનાતનઃ ।
યઃ સ સર્વેષુ ભૂતેષુ નશ્યત્સુ ન વિનશ્યતિ ॥ ૮-૨૦॥

પરઃ તસ્માત્ તુ ભાવઃ અન્યઃ અવ્યક્તઃ અવ્યક્તાત્ સનાતનઃ ।
યઃ સઃ સર્વેષુ ભૂતેષુ નશ્યત્સુ ન વિનશ્યતિ ॥ ૮-૨૦॥

યઃ તુ સર્વેષુ ભૂતેષુ નશ્યત્સુ ન વિનશ્યતિ, સઃ, તસ્માત્
અવ્યક્તાત્ અન્યઃ, અવ્યક્તઃ સનાતનઃ પરઃ ભાવઃ (અસ્તિ)

અવ્યક્તોઽક્ષર ઇત્યુક્તસ્તમાહુઃ પરમાં ગતિમ્ ।
યં પ્રાપ્ય ન નિવર્તન્તે તદ્ધામ પરમં મમ ॥ ૮-૨૧॥

અવ્યક્તઃ અક્ષરઃ ઇતિ ઉક્તઃ તમ્ આહુઃ પરમામ્ ગતિમ્ ।
યમ્ પ્રાપ્ય ન નિવર્તન્તે તત્ ધામ પરમમ્ મમ ॥ ૮-૨૧॥

(યઃ) અવ્યક્તઃ (ભાવઃ) અક્ષરઃ ઇતિ ઉક્તઃ, તમ્ પરમામ્
ગતિમ્ આહુઃ, (જ્ઞાનિનઃ) યમ્ પ્રાપ્ય ન નિવર્તન્તે, તત્
મમ પરમમ્ ધામ (અસ્તિ)।

પુરુષઃ સ પરઃ પાર્થ ભક્ત્યા લભ્યસ્ત્વનન્યયા ।

યસ્યાન્તઃસ્થાનિ ભૂતાનિ યેન સર્વમિદં તતમ્ ॥ ૮-૨૨॥

પુરુષઃ સઃ પરઃ પાર્થ ભક્ત્યા લભ્યઃ તુ અનન્યયા ।
યસ્ય અન્તઃ-સ્થાનિ ભૂતાનિ યેન સર્વમ્ ઇદમ્ તતમ્ ॥ ૮-૨૨॥

હે પાર્થ! ભૂતાનિ યસ્ય અન્તઃ-સ્થાનિ (સન્તિ), યેન ઇદમ્
સર્વમ્ તતમ્, સઃ તુ પરઃ પુરુષઃ અનન્યયા ભક્ત્યા લભ્યઃ (અસ્તિ)।

યત્ર કાલે ત્વનાવૃત્તિમાવૃત્તિં ચૈવ યોગિનઃ ।
પ્રયાતા યાન્તિ તં કાલં વક્ષ્યામિ ભરતર્ષભ ॥ ૮-૨૩॥

યત્ર કાલે તુ અનાવૃત્તિમ્ આવૃત્તિમ્ ચ એવ યોગિનઃ ।
પ્રયાતાઃ યાન્તિ તમ્ કાલમ્ વક્ષ્યામિ ભરતર્ષભ ॥ ૮-૨૩॥

હે ભરતર્ષભ! યત્ર કાલે તુ પ્રયાતાઃ યોગિનઃ અનાવૃત્તિમ્
આવૃત્તિમ્ ચ એવ યાન્તિ, તમ્ કાલમ્ વક્ષ્યામિ ।

અગ્નિર્જ્યોતિરહઃ શુક્લઃ ષણ્માસા ઉત્તરાયણમ્ ।
તત્ર પ્રયાતા ગચ્છન્તિ બ્રહ્મ બ્રહ્મવિદો જનાઃ ॥ ૮-૨૪॥

અગ્નિઃ જ્યોતિઃ અહઃ શુક્લઃ ષણ્માસાઃ ઉત્તર-આયણમ્ ।
તત્ર પ્રયાતાઃ ગચ્છન્તિ બ્રહ્મ બ્રહ્મવિદઃ જનાઃ ॥ ૮-૨૪॥

અગ્નિઃ, જ્યોતિઃ, અહઃ, શુક્લઃ (પક્ષઃ), ષણ્માસાઃ ઉત્તર-આયનમ્,
તત્ર (કાલે) પ્રયાતાઃ બ્રહ્મવિદઃ જનાઃ બ્રહ્મ ગચ્છન્તિ ।

ધૂમો રાત્રિસ્તથા કૃષ્ણઃ ષણ્માસા દક્ષિણાયનમ્ ।
તત્ર ચાન્દ્રમસં જ્યોતિર્યોગી પ્રાપ્ય નિવર્તતે ॥ ૮-૨૫॥

ધૂમઃ રાત્રિઃ તથા કૃષ્ણઃ ષણ્માસાઃ દક્ષિણ-આયનમ્ ।
તત્ર ચાન્દ્રમસમ્ જ્યોતિઃ યોગી પ્રાપ્ય નિવર્તતે ॥ ૮-૨૫॥

ધૂમઃ, રાત્રિઃ, તથા કૃષ્ણઃ (પક્ષઃ), ષણ્માસાઃ
દક્ષિણ-આયનમ્, તત્ર (કાલે પ્રયાતાઃ) યોગી ચાન્દ્રમસમ્
જ્યોતિઃ પ્રાપ્ય નિવર્તતે ।

શુક્લકૃષ્ણે ગતી હ્યેતે જગતઃ શાશ્વતે મતે ।
એકયા યાત્યનાવૃત્તિમન્યયાવર્તતે પુનઃ ॥ ૮-૨૬॥

શુક્લ-કૃષ્ણે ગતી હિ એતે જગતઃ શાશ્વતે મતે ।
એકયા યાતિ અનાવૃત્તિમ્ અન્યયા આવર્તતે પુનઃ ॥ ૮-૨૬॥

જગતઃ એતે હિ શુક્લ-કૃષ્ણે ગતી શાશ્વતે મતે ।
એકયા અનાવૃત્તિમ્ યાતિ અન્યયા પુનઃ આવર્તતે ।

નૈતે સૃતી પાર્થ જાનન્યોગી મુહ્યતિ કશ્ચન ।
તસ્માત્સર્વેષુ કાલેષુ યોગયુક્તો ભવાર્જુન ॥ ૮-૨૭॥

ન એતે સૃતી પાર્થ જાનન્ યોગી મુહ્યતિ કશ્ચન ।
તસ્માત્ સર્વેષુ કાલેષુ યોગ-યુક્તઃ ભવ અર્જુન ॥ ૮-૨૭॥

હે પાર્થ! એતે સૃતી જાનન્ કશ્ચન યોગી ન મુહ્યતિ;
તસ્માત્ હે અર્જુન! (ત્વં) સર્વેષુ કાલેષુ યોગ-યુક્તઃ ભવ ।

વેદેષુ યજ્ઞેષુ તપઃસુ ચૈવ
    દાનેષુ યત્પુણ્યફલં પ્રદિષ્ટમ્ ।
અત્યેતિ તત્સર્વમિદં વિદિત્વા
    યોગી પરં સ્થાનમુપૈતિ ચાદ્યમ્ ॥ ૮-૨૮॥

વેદેષુ યજ્ઞેષુ તપઃસુ ચ એવ
    દાનેષુ યત્ પુણ્ય-ફલમ્ પ્રદિષ્ટમ્ ।
અત્યેતિ તત્ સર્વમ્ ઇદમ્ વિદિત્વા
    યોગી પરમ્ સ્થાનમ્ ઉપૈતિ ચ આદ્યમ્ ॥ ૮-૨૮॥

યોગી ઇદમ્ વિદિત્વા, વેદેષુ યજ્ઞેષુ તપઃસુ દાનેષુ ચ એવ
યત્ પુણ્ય-ફલમ્ પ્રદિષ્ટમ્, તત્ સર્વમ્ અત્યેતિ, આદ્યમ્ પરમ્ ચ સ્થાનમ્ ઉપૈતિ ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
અક્ષરબ્રહ્મયોગો નામાષ્ટમોઽધ્યાયઃ ॥ ૮॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદે
અક્ષર-બ્રહ્મ-યોગઃ નામ અષ્ટમઃ અધ્યાયઃ ॥ ૮॥

---

અથ નવમોઽધ્યાયઃ ।   રાજવિદ્યારાજગુહ્યયોગઃ ।
અથ નવમઃ અધ્યાયઃ ।  રાજ-વિદ્યા-રાજ-ગુહ્ય-યોગઃ ।

શ્રીભગવાનુવાચ ।

શ્રીભગવાન્ ઉવાચ ।

ઇદં તુ તે ગુહ્યતમં પ્રવક્ષ્યામ્યનસૂયવે ।
જ્ઞાનં વિજ્ઞાનસહિતં યજ્જ્ઞાત્વા મોક્ષ્યસેઽશુભાત્ ॥ ૯-૧॥

ઇદમ્ તુ તે ગુહ્યતમમ્ પ્રવક્ષ્યામિ અનસૂયવે ।
જ્ઞાનમ્ વિજ્ઞાન-સહિતમ્ યત્ જ્ઞાત્વા મોક્ષ્યસે અશુભાત્ ॥ ૯-૧॥

યત્ જ્ઞાત્વા (ત્વં)અશુભાત્ મોક્ષ્યસે, (તત્) તુ ઇદમ્
ગુહ્યતમમ્ વિજ્ઞાન-સહિતમ્ જ્ઞાનમ્ અનસૂયવે તે પ્રવક્ષ્યામિ ।

રાજવિદ્યા રાજગુહ્યં પવિત્રમિદમુત્તમમ્ ।
પ્રત્યક્ષાવગમં ધર્મ્યં સુસુખં કર્તુમવ્યયમ્ ॥ ૯-૨॥

રાજ-વિદ્યા રાજ-ગુહ્યમ્ પવિત્રમ્ ઇદમ્ ઉત્તમમ્ ।
પ્રત્યક્ષ-અવગમમ્ ધર્મ્યમ્ સુસુખમ્ કર્તુમ્ અવ્યયમ્ ॥ ૯-૨॥

ઇદમ્ (જ્ઞાનં) રાજ-વિદ્યા, રાજ-ગુહ્યમ્, ઉત્તમમ્,
પવિત્રમ્, અવ્યયમ્, પ્રત્યક્ષ-અવગમમ્, કર્તુમ્ સુસુખમ્,
ધર્મ્યમ્ ચ (અસ્તિ)।

અશ્રદ્દધાનાઃ પુરુષા ધર્મસ્યાસ્ય પરન્તપ ।
અપ્રાપ્ય માં નિવર્તન્તે મૃત્યુસંસારવર્ત્મનિ ॥ ૯-૩॥

અશ્રદ્દધાનાઃ પુરુષાઃ ધર્મસ્ય અસ્ય પરન્તપ ।
અપ્રાપ્ય મામ્ નિવર્તન્તે મૃત્યુ-સંસાર-વર્ત્મનિ ॥ ૯-૩॥

હે પરન્તપ! અસ્ય ધર્મસ્ય અશ્રદ્દધાનાઃ પુરુષાઃ મામ્
અપ્રાપ્ય મૃત્યુ-સંસાર-વર્ત્મનિ નિવર્તન્તે ।

મયા તતમિદં સર્વં જગદવ્યક્તમૂર્તિના ।
મત્સ્થાનિ સર્વભૂતાનિ ન ચાહં તેષ્વવસ્થિતઃ ॥ ૯-૪॥

મયા તતમ્ ઇદમ્ સર્વમ્ જગત્ અવ્યક્ત-મૂર્તિના ।
મત્-સ્થાનિ સર્વ-ભૂતાનિ ન ચ અહમ્ તેષુ અવસ્થિતઃ ॥ ૯-૪॥

અવ્યક્ત-મૂર્તિના મયા ઇદમ્ સર્વમ્ જગત્ તતમ્ ।
સર્વ-ભૂતાનિ મત્-સ્થાનિ (સન્તિ), અહમ્ ચ તેષુ ન અવસ્થિતઃ (અસ્મિ)।

ન ચ મત્સ્થાનિ ભૂતાનિ પશ્ય મે યોગમૈશ્વરમ્ ।
ભૂતભૃન્ન ચ ભૂતસ્થો મમાત્મા ભૂતભાવનઃ ॥ ૯-૫॥

ન ચ મત્-સ્થાનિ ભૂતાનિ પશ્ય મે યોગમ્ ઐશ્વરમ્ ।
ભૂત-ભૃત્ ન ચ ભૂત-સ્થઃ મમ આત્મા ભૂત-ભાવનઃ ॥ ૯-૫॥

ભૂતાનિ ચ મત્-સ્થાનિ ન (સન્તિ), મે ઐશ્વરમ્ યોગમ્ પશ્ય ।
(અહં) ભૂત-ભૃત્ (અપિ) ભૂત-સ્થઃ ન । મમ આત્મા ચ
ભૂત-ભાવનઃ (અસ્તિ) ।

યથાકાશસ્થિતો નિત્યં વાયુઃ સર્વત્રગો મહાન્ ।
તથા સર્વાણિ ભૂતાનિ મત્સ્થાનીત્યુપધારય ॥ ૯-૬॥

યથા આકાશ-સ્થિતઃ નિત્યમ્ વાયુઃ સર્વત્રગઃ મહાન્ ।
તથા સર્વાણિ ભૂતાનિ મત્-સ્થાનિ ઇતિ ઉપધારય ॥ ૯-૬॥

યથા સર્વત્રગઃ મહાન્ વાયુઃ નિત્યમ્ આકાશ-સ્થિતઃ (અસ્તિ),
તથા સર્વાણિ ભૂતાનિ મત્-સ્થાનિ (સન્તિ), ઇતિ (ત્વં) ઉપધારય ।

સર્વભૂતાનિ કૌન્તેય પ્રકૃતિં યાન્તિ મામિકામ્ ।
કલ્પક્ષયે પુનસ્તાનિ કલ્પાદૌ વિસૃજામ્યહમ્ ॥ ૯-૭॥

સર્વ-ભૂતાનિ કૌન્તેય પ્રકૃતિમ્ યાન્તિ મામિકામ્ ।
કલ્પ-ક્ષયે પુનઃ તાનિ કલ્પ-આદૌ વિસૃજામિ અહમ્ ॥ ૯-૭॥

હે કૌન્તેય! સર્વ-ભૂતાનિ કલ્પ-ક્ષયે મામિકામ્ પ્રકૃતિમ્
યાન્તિ । પુનઃ કલ્પ-આદૌ તાનિ વિસૃજામિ ।

પ્રકૃતિં સ્વામવષ્ટભ્ય વિસૃજામિ પુનઃ પુનઃ ।
ભૂતગ્રામમિમં કૃત્સ્નમવશં પ્રકૃતેર્વશાત્ ॥ ૯-૮॥

પ્રકૃતિમ્ સ્વામ્ અવષ્ટભ્ય વિસૃજામિ પુનઃ પુનઃ ।
ભૂત-ગ્રામમ્ ઇમમ્ કૃત્સ્નમ્ અવશમ્ પ્રકૃતેઃ વશાત્ ॥ ૯-૮॥

(અહમ્) સ્વામ્ પ્રકૃતિમ્ અવષ્ટભ્ય પ્રકૃતેઃ વશાત્
અવશમ્ ઇમમ્ કૃત્સ્નમ્ ભૂત-ગ્રામમ્ પુનઃ પુનઃ વિસૃજામિ ।

ન ચ માં તાનિ કર્માણિ નિબધ્નન્તિ ધનઞ્જય ।
ઉદાસીનવદાસીનમસક્તં તેષુ કર્મસુ ॥ ૯-૯॥

ન ચ મામ્ તાનિ કર્માણિ નિબધ્નન્તિ ધનઞ્જય ।
ઉદાસીનવત્ આસીનમ્ અસક્તમ્ તેષુ કર્મસુ ॥ ૯-૯॥

હે ધનઞ્જય! તેષુ કર્મસુ અસક્તમ્ ઉદાસીનવત્
આસીનમ્ મામ્ તાનિ કર્માણિ ચ ન નિબધ્નન્તિ ।

મયાધ્યક્ષેણ પ્રકૃતિઃ સૂયતે સચરાચરમ્ ।
હેતુનાનેન કૌન્તેય જગદ્વિપરિવર્તતે ॥ ૯-૧૦॥

મયા અધ્યક્ષેણ પ્રકૃતિઃ સૂયતે સચર-અચરમ્ ।
હેતુના અનેન કૌન્તેય જગત્ વિપરિવર્તતે ॥ ૯-૧૦॥

હે કૌન્તેય! મયા અધ્યક્ષેણ પ્રકૃતિઃ સચર-અચરમ્ સૂયતે,
અનેન હેતુના જગત્ વિપરિવર્તતે ।

અવજાનન્તિ માં મૂઢા માનુષીં તનુમાશ્રિતમ્ ।
પરં ભાવમજાનન્તો મમ ભૂતમહેશ્વરમ્ ॥ ૯-૧૧॥

અવજાનન્તિ મામ્ મૂઢાઃ માનુષીમ્ તનુમ્ આશ્રિતમ્ ।
પરમ્ ભાવમ્ અજાનન્તઃ મમ ભૂત-મહેશ્વરમ્ ॥ ૯-૧૧॥

ભૂત-મહેશ્વરમ્ મમ પરમ્ ભાવમ્ અજાનન્તઃ મૂઢાઃ
માનુષીમ્ તનુમ્ આશ્રિતમ્ મામ્ અવજાનન્તિ ।

મોઘાશા મોઘકર્માણો મોઘજ્ઞાના વિચેતસઃ ।
રાક્ષસીમાસુરીં ચૈવ પ્રકૃતિં મોહિનીં શ્રિતાઃ ॥ ૯-૧૨॥

મોઘ-આશાઃ મોઘ-કર્માણઃ મોઘ-જ્ઞાનાઃ વિચેતસઃ ।
રાક્ષસીમ્ આસુરીમ્ ચ એવ પ્રકૃતિમ્ મોહિનીમ્ શ્રિતાઃ ॥ ૯-૧૨॥

(તે) મોઘ-આશાઃ મોઘ-કર્માણઃ મોઘ-જ્ઞાનાઃ વિચેતસઃ
મોહિનીમ્ રાક્ષસીમ્ આસુરીમ્ પ્રકૃતિમ્ ચ એવ શ્રિતાઃ ।

મહાત્માનસ્તુ માં પાર્થ દૈવીં પ્રકૃતિમાશ્રિતાઃ ।
ભજન્ત્યનન્યમનસો જ્ઞાત્વા ભૂતાદિમવ્યયમ્ ॥ ૯-૧૩॥

મહાત્માનઃ તુ મામ્ પાર્થ દૈવીમ્ પ્રકૃતિમ્ આશ્રિતાઃ ।
ભજન્તિ અનન્ય-મનસઃ જ્ઞાત્વા ભૂતાદિમ્ અવ્યયમ્ ॥ ૯-૧૩॥

હે પાર્થ! દૈવીમ્ પ્રકૃતિમ્ આશ્રિતાઃ મહાત્માનઃ તુ
મામ્ ભૂતાદિમ્ અવ્યયમ્ જ્ઞાત્વા, અનન્ય-મનસઃ (માં) ભજન્તિ ।

સતતં કીર્તયન્તો માં યતન્તશ્ચ દૃઢવ્રતાઃ ।
નમસ્યન્તશ્ચ માં ભક્ત્યા નિત્યયુક્તા ઉપાસતે ॥ ૯-૧૪॥

સતતમ્ કીર્તયન્તઃ મામ્ યતન્તઃ ચ દૃઢ-વ્રતાઃ ।
નમસ્યન્તઃ ચ મામ્ ભક્ત્યા નિત્ય-યુક્તાઃ ઉપાસતે ॥ ૯-૧૪॥

(તે) નિત્ય-યુક્તાઃ ભક્ત્યા મામ્ સતતમ્ કીર્તયન્તઃ યતન્તઃ ચ
દૃઢ-વ્રતાઃ નમસ્યન્તઃ ચ મામ્ ઉપાસતે ।

જ્ઞાનયજ્ઞેન ચાપ્યન્યે યજન્તો મામુપાસતે ।
એકત્વેન પૃથક્ત્વેન બહુધા વિશ્વતોમુખમ્ ॥ ૯-૧૫॥

જ્ઞાન-યજ્ઞેન ચ અપિ અન્યે યજન્તઃ મામ્ ઉપાસતે ।
એકત્વેન પૃથક્ત્વેન બહુધા વિશ્વતોમુખમ્ ॥ ૯-૧૫।

અન્યે ચ અપિ જ્ઞાન-યજ્ઞેન યજન્તઃ એકત્વેન, પૃથક્ત્વેન,
બહુધા વિશ્વતોમુખમ્ મામ્ ઉપાસતે ।

અહં ક્રતુરહં યજ્ઞઃ સ્વધાહમહમૌષધમ્ ।
મન્ત્રોઽહમહમેવાજ્યમહમગ્નિરહં હુતમ્ ॥ ૯-૧૬॥

અહમ્ ક્રતુઃ અહમ્ યજ્ઞઃ સ્વધા અહમ્ અહમ્ ઔષધમ્ ।
મન્ત્રઃ અહમ્ અહમ્ એવ આજ્યમ્ અહમ્ અગ્નિઃ અહમ્ હુતમ્ ॥ ૯-૧૬॥

અહમ્ ક્રતુઃ, અહમ્ યજ્ઞઃ, અહમ્ સ્વધા, અહમ્ ઔષધમ્,
અહમ્ મન્ત્રઃ, અહમ્ એવ આજ્યમ્, અહમ્ અગ્નિઃ, અહમ્ હુતમ્,

પિતાહમસ્ય જગતો માતા ધાતા પિતામહઃ ।
વેદ્યં પવિત્રમોંકાર ઋક્સામ યજુરેવ ચ ॥ ૯-૧૭॥

પિતા અહમ્ અસ્ય જગતઃ માતા ધાતા પિતામહઃ ।
વેદ્યમ્ પવિત્રમ્ ઓંકારઃ ઋક્-સામ યજુઃ એવ ચ ॥ ૯-૧૭॥

અહમ્ અસ્ય જગતઃ માતા, પિતા, ધાતા, પિતામહઃ, વેદ્યમ્ (વસ્તુ),
પવિત્રમ્ (વસ્તુ), ઓઙ્કારઃ, ઋક્, સામ, યજુઃ એવ ચ (અસ્મિ)।

ગતિર્ભર્તા પ્રભુઃ સાક્ષી નિવાસઃ શરણં સુહૃત્ ।
પ્રભવઃ પ્રલયઃ સ્થાનં નિધાનં બીજમવ્યયમ્ ॥ ૯-૧૮॥

ગતિઃ ભર્તા પ્રભુઃ સાક્ષી નિવાસઃ શરણમ્ સુહૃત્ ।
પ્રભવઃ પ્રલયઃ સ્થાનમ્ નિધાનમ્ બીજમ્ અવ્યયમ્ ॥ ૯-૧૮॥

(અહં) ગતિઃ, ભર્તા, પ્રભુઃ, સાક્ષી, નિવાસઃ, શરણમ્,

સુહૃત્, પ્રભવઃ, પ્રલયઃ, સ્થાનમ્, નિધાનમ્,
અવ્યયમ્ બીજમ્ (ચ અસ્મિ) ।

તપામ્યહમહં વર્ષં નિગૃહ્ણામ્યુત્સૃજામિ ચ ।
અમૃતં ચૈવ મૃત્યુશ્ચ સદસચ્ચાહમર્જુન ॥ ૯-૧૯॥

તપામિ અહમ્ અહમ્ વર્ષમ્ નિગૃહ્ણામિ ઉત્સૃજામિ ચ ।
અમૃતમ્ ચ એવ મૃત્યુઃ ચ સત્ અસત્ ચ અહમ્ અર્જુન ॥ ૯-૧૯॥

હે અર્જુન! અહમ્ તપામિ, અહમ્ વર્ષમ્, નિગૃહ્ણામિ
ઉત્સૃજામિ ચ, અહમ્ એવ અમૃતમ્ મૃત્યુઃ ચ, (અહં એવ)
સત્ અસત્ ચ (અસ્મિ) ।

ત્રૈવિદ્યા માં સોમપાઃ પૂતપાપા
યજ્ઞૈરિષ્ટ્વા સ્વર્ગતિં પ્રાર્થયન્તે ।
તે પુણ્યમાસાદ્ય સુરેન્દ્રલોક-
મશ્નન્તિ દિવ્યાન્દિવિ દેવભોગાન્ ॥ ૯-૨૦॥

ત્રૈ-વિદ્યાઃ મામ્ સોમપાઃ પૂત-પાપાઃ
યજ્ઞૈઃ ઇષ્ટ્વા સ્વર્ગતિમ્ પ્રાર્થયન્તે ।
તે પુણ્યમ્ આસાદ્ય સુરેન્દ્ર-લોકં
અશ્નન્તિ દિવ્યાન્ દિવિ દેવ-ભોગાન્ ॥ ૯-૨૦॥

ત્રૈ-વિદ્યાઃ સોમપાઃ પૂત-પાપાઃ મામ્ યજ્ઞૈઃ ઇષ્ટ્વા
સ્વર્ગતિમ્ પ્રાર્થયન્તે । તે પુણ્યમ્ સુરેન્દ્ર-લોકં આસાદ્ય,
દિવિ દિવ્યાન્ દેવ-ભોગાન્ અશ્નન્તિ ।

તે તં ભુક્ત્વા સ્વર્ગલોકં વિશાલં
ક્ષીણે પુણ્યે મર્ત્યલોકં વિશન્તિ ।
એવં ત્રયીધર્મમનુપ્રપન્ના
ગતાગતં કામકામા લભન્તે ॥ ૯-૨૧॥

તે તમ્ ભુક્ત્વા સ્વર્ગ-લોકમ્ વિશાલમ્
ક્ષીણે પુણ્યે મર્ત્ય-લોકમ્ વિશન્તિ ।
એવમ્ ત્રયી-ધર્મમ્ અનુપ્રપન્નાઃ
ગત-આગતમ્ કામ-કામાઃ લભન્તે ॥ ૯-૨૧॥

તે તમ્ વિશાલમ્ સ્વર્ગ-લોકમ્ ભુક્ત્વા, પુણ્યે ક્ષીણે (સતિ)

મર્ત્ય-લોકમ્ વિશન્તિ । એવમ્ ત્રયી-ધર્મમ્ અનુપ્રપન્નાઃ
કામ-કામાઃ ગત-આગતમ્ લભન્તે ।

અનન્યાશ્ચિન્તયન્તો માં યે જનાઃ પર્યુપાસતે ।
તેષાં નિત્યાભિયુક્તાનાં યોગક્ષેમં વહામ્યહમ્ ॥ ૯-૨૨॥

અનન્યાઃ ચિન્તયન્તઃ મામ્ યે જનાઃ પર્યુપાસતે ।
તેષામ્ નિત્ય-અભિયુક્તાનામ્ યોગ-ક્ષેમમ્ વહામિ અહમ્ ॥ ૯-૨૨॥

અનન્યાઃ ચિન્તયન્તઃ યે જનાઃ મામ્ પર્યુપાસતે, તેષામ્
નિત્ય-અભિયુક્તાનામ્ યોગ-ક્ષેમમ્ અહમ્ વહામિ ।

યેઽપ્યન્યદેવતાભક્તા યજન્તે શ્રદ્ધયાન્વિતાઃ ।
તેઽપિ મામેવ કૌન્તેય યજન્ત્યવિધિપૂર્વકમ્ ॥ ૯-૨૩॥

યે અપિ અન્ય-દેવતા-ભક્તાઃ યજન્તે શ્રદ્ધયા અન્વિતાઃ ।
તે અપિ મામ્ એવ કૌન્તેય યજન્તિ અવિધિ-પૂર્વકમ્ ॥ ૯-૨૩॥

અપિ યે અન્ય-દેવતા-ભક્તાઃ શ્રદ્ધયા અન્વિતાઃ
યજન્તે, તે અપિ હે કૌન્તેય! અવિધિ-પૂર્વકમ્ મામ્ એવ યજન્તિ ।

અહં હિ સર્વયજ્ઞાનાં ભોક્તા ચ પ્રભુરેવ ચ ।
ન તુ મામભિજાનન્તિ તત્ત્વેનાતશ્ચ્યવન્તિ તે ॥ ૯-૨૪॥

અહમ્ હિ સર્વ-યજ્ઞાનામ્ ભોક્તા ચ પ્રભુઃ એવ ચ ।
ન તુ મામ્ અભિજાનન્તિ તત્ત્વેન અતઃ ચ્યવન્તિ તે ॥ ૯-૨૪॥

અહમ્ હિ સર્વ-યજ્ઞાનામ્ ભોક્તા ચ પ્રભુઃ એવ ચ (અસ્મિ),
મામ્ તુ તત્ત્વેન ન અભિજાનન્તિ, અતઃ તે ચ્યવન્તિ ।

યાન્તિ દેવવ્રતા દેવાન્પિતૄન્યાન્તિ પિતૃવ્રતાઃ ।
ભૂતાનિ યાન્તિ ભૂતેજ્યા યાન્તિ મદ્યાજિનોઽપિ મામ્ ॥ ૯-૨૫॥

યાન્તિ દેવ-વ્રતાઃ દેવાન્ પિતૄન્ યાન્તિ પિતૃ-વ્રતાઃ ।
ભૂતાનિ યાન્તિ ભૂત-ઇજ્યાઃ યાન્તિ મત્ યાજિનઃ અપિ મામ્ ॥ ૯-૨૫॥

દેવ-વ્રતાઃ દેવાન્ યાન્તિ, પિતૃ-વ્રતાઃ પિતૄન્ યાન્તિ,
ભૂત-ઇજ્યાઃ ભૂતાનિ યાન્તિ, મત્ યાજિનઃ અપિ મામ્ યાન્તિ ।

પત્રં પુષ્પં ફલં તોયં યો મે ભક્ત્યા પ્રયચ્છતિ ।
તદહં ભક્ત્યુપહૃતમશ્નામિ પ્રયતાત્મનઃ ॥ ૯-૨૬॥

પત્રમ્ પુષ્પમ્ ફલમ્ તોયમ્ યઃ મે ભક્ત્યા પ્રયચ્છતિ ।
તત્ અહમ્ ભક્તિ-ઉપહૃતમ્ અશ્નામિ પ્રયત આત્મનઃ ॥ ૯-૨૬॥

યઃ પત્રમ્ પુષ્પમ્ ફલમ્ તોયમ્ ભક્ત્યા મે પ્રયચ્છતિ,
(તસ્ય) પ્રયત-આત્મનઃ ભક્તિ-ઉપહૃતમ્ તત્ અહમ્ અશ્નામિ ।

યત્કરોષિ યદશ્નાસિ યજ્જુહોષિ દદાસિ યત્ ।
યત્તપસ્યસિ કૌન્તેય તત્કુરુષ્વ મદર્પણમ્ ॥ ૯-૨૭॥

યત્ કરોષિ યત્ અશ્નાસિ યત્ જુહોષિ દદાસિ યત્ ।
યત્ તપસ્યસિ કૌન્તેય તત્ કુરુષ્વ મત્ અર્પણમ્ ॥ ૯-૨૭॥

હે કૌન્તેય! યત્ કરોષિ, યત્ અશ્નાસિ, યત્ જુહોષિ,
યત્ દદાસિ, યત્ તપસ્યસિ, તત્ મત્ અર્પણમ્ કુરુષ્વ ।

શુભાશુભફલૈરેવં મોક્ષ્યસે કર્મબન્ધનૈઃ ।
સંન્યાસયોગયુક્તાત્મા વિમુક્તો મામુપૈષ્યસિ ॥ ૯-૨૮॥

શુભ-અશુભ-ફલૈઃ એવમ્ મોક્ષ્યસે કર્મ-બન્ધનૈઃ ।
સંન્યાસ-યોગ-યુક્ત-આત્મા વિમુક્તઃ મામ્ ઉપૈષ્યસિ ॥ ૯-૨૮॥

એવમ્ (કૃતે સતિ) શુભ-અશુભ-ફલૈઃ કર્મ-બન્ધનૈઃ
સંન્યાસ-યોગ-યુક્ત-આત્મા વિમુક્તઃ (ભૂત્વા) મોક્ષ્યસે
મામ્ ઉપ-એષ્યસિ ।

સમોઽહં સર્વભૂતેષુ ન મે દ્વેષ્યોઽસ્તિ ન પ્રિયઃ ।
યે ભજન્તિ તુ માં ભક્ત્યા મયિ તે તેષુ ચાપ્યહમ્ ॥ ૯-૨૯॥

સમઃ અહમ્ સર્વ-ભૂતેષુ ન મે દ્વેષ્યઃ અસ્તિ ન પ્રિયઃ ।
યે ભજન્તિ તુ મામ્ ભક્ત્યા મયિ તે તેષુ ચ અપિ અહમ્ ॥ ૯-૨૯॥

અહમ્ સર્વ-ભૂતેષુ સમઃ, મે દ્વેષ્યઃ પ્રિયઃ ચ ન અસ્તિ,
(પરં)તુ યે મામ્ ભક્ત્યા ભજન્તિ, તે મયિ, (ચ) અહમ્ અપિ તેષુ (ચ)।

અપિ ચેત્સુદુરાચારો ભજતે મામનન્યભાક્ ।
સાધુરેવ સ મન્તવ્યઃ સમ્યગ્વ્યવસિતો હિ સઃ ॥ ૯-૩૦॥

અપિ ચેત્ સુ-દુઃ-આચારઃ ભજતે મામ્ અનન્ય-ભાક્ ।
સાધુઃ એવ સઃ મન્તવ્યઃ સમ્યક્ વ્યવસિતઃ હિ સઃ ॥ ૯-૩૦॥

સુ-દુઃ-આચારઃ અપિ મામ્ અનન્ય-ભાક્ ભજતે ચેત્,
સઃ સાધુઃ એવ મન્તવ્યઃ, સઃ હિ સમ્યક્ વ્યવસિતઃ (અસ્તિ)।

ક્ષિપ્રં ભવતિ ધર્માત્મા શશ્વચ્છાન્તિં નિગચ્છતિ ।
કૌન્તેય પ્રતિજાનીહિ ન મે ભક્તઃ પ્રણશ્યતિ ॥ ૯-૩૧॥

ક્ષિપ્રમ્ ભવતિ ધર્મ-આત્મા શશ્વત્ શાન્તિમ્ નિગચ્છતિ ।
કૌન્તેય પ્રતિજાનીહિ ન મે ભક્તઃ પ્રણશ્યતિ ॥ ૯-૩૧॥

હે કૌન્તેય! (સઃ) ક્ષિપ્રમ્ ધર્મ-આત્મા ભવતિ, શશ્વત્
શાન્તિમ્ નિગચ્છતિ, મે ભક્તઃ ન પ્રણશ્યતિ, (ઇતિ ત્વં) પ્રતિજાનીહિ ।

માં હિ પાર્થ વ્યપાશ્રિત્ય યેઽપિ સ્યુઃ પાપયોનયઃ ।
સ્ત્રિયો વૈશ્યાસ્તથા શૂદ્રાસ્તેઽપિ યાન્તિ પરાં ગતિમ્ ॥ ૯-૩૨॥

મામ્ હિ પાર્થ વ્યપાશ્રિત્ય યે અપિ સ્યુઃ પાપ-યોનયઃ ।
સ્ત્રિયઃ વૈશ્યાઃ તથા શૂદ્રાઃ તે અપિ યાન્તિ પરામ્ ગતિમ્ ॥ ૯-૩૨॥

હે પાર્થ! યે અપિ હિ પાપ-યોનયઃ સ્ત્રિયઃ વૈશ્યાઃ તથા
શૂદ્રાઃ સ્યુઃ તે અપિ મામ્ વ્યપાશ્રિત્ય, પરામ્ ગતિમ્ યાન્તિ ।

કિં પુનર્બ્રાહ્મણાઃ પુણ્યા ભક્તા રાજર્ષયસ્તથા ।
અનિત્યમસુખં લોકમિમં પ્રાપ્ય ભજસ્વ મામ્ ॥ ૯-૩૩॥

કિમ્ પુનઃ બ્રાહ્મણાઃ પુણ્યાઃ ભક્તાઃ રાજર્ષયઃ તથા ।
અનિત્યમ્ અસુખમ્ લોકમ્ ઇમમ્ પ્રાપ્ય ભજસ્વ મામ્ ॥ ૯-૩૩॥

કિમ્ પુનઃ પુણ્યાઃ ભક્તાઃ બ્રાહ્મણાઃ તથા રાજર્ષયઃ?
(તસ્માત્ ત્વં) અનિત્યમ્ અસુખમ્ ઇમમ્ લોકમ્ પ્રાપ્ય, મામ્ ભજસ્વ ।

મન્મના ભવ મદ્ભક્તો મદ્યાજી માં નમસ્કુરુ ।
મામેવૈષ્યસિ યુક્ત્વૈવમાત્માનં મત્પરાયણઃ ॥ ૯-૩૪॥

મત્-મનાઃ ભવ મત્-ભક્તઃ મત્-યાજી મામ્ નમસ્કુરુ ।
મામ્ એવ એષ્યસિ યુક્ત્વા એવમ્ આત્માનમ્ મત્-પરાયણઃ ॥ ૯-૩૪॥

(ત્વં) મત્-મનાઃ મત્-ભક્તઃ મત્-યાજી (ચ) ભવ,
મામ્ મત્-પરાયણઃ (સન્) નમસ્કુરુ એવમ્ આત્માનમ્
યુક્ત્વા મામ્ એવ એષ્યસિ ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ

બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
રાજવિદ્યારાજગુહ્યયોગો નામ નવમોઽધ્યાયઃ ॥ ૯॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદે
રાજવિદ્યા-રાજગુહ્ય-યોગઃ નામ નવમઃ અધ્યાયઃ ॥ ૯॥

---

અથ દશમોઽધ્યાયઃ । વિભૂતિયોગઃ ।
અથ દશમઃ અધ્યાયઃ । વિભૂતિ-યોગઃ ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

ભૂય એવ મહાબાહો શ‍ૃણુ મે પરમં વચઃ ।
યત્તેઽહં પ્રીયમાણાય વક્ષ્યામિ હિતકામ્યયા ॥ ૧૦-૧॥

ભૂયઃ એવ મહાબાહો શ‍ૃણુ મે પરમમ્ વચઃ ।
યત્ તે અહમ્ પ્રીયમાણાય વક્ષ્યામિ હિત-કામ્યયા ॥ ૧૦-૧॥

હે મહાબાહો! ભૂયઃ એવ મે પરમમ્ વચઃ શ‍ૃણુ ।
પ્રીયમાણાય તે યત્ અહમ્ હિત-કામ્યયા વક્ષ્યામિ ।

ન મે વિદુઃ સુરગણાઃ પ્રભવં ન મહર્ષયઃ ।
અહમાદિર્હિ દેવાનાં મહર્ષીણાં ચ સર્વશઃ ॥ ૧૦-૨॥

ન મે વિદુઃ સુર-ગણાઃ પ્રભવમ્ ન મહર્ષયઃ ।
અહમ્ આદિઃ હિ દેવાનામ્ મહર્ષીણામ્ ચ સર્વશઃ ॥ ૧૦-૨॥

સુર-ગણાઃ મહર્ષયઃ ચ મે પ્રભવમ્ ન વિદુઃ, અહમ્ હિ
દેવાનામ્ મહર્ષીણામ્ (ચ) સર્વશઃ આદિઃ (અસ્મિ)।

યો મામજમનાદિં ચ વેત્તિ લોકમહેશ્વરમ્ ।
અસમ્મૂઢઃ સ મર્ત્યેષુ સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૧૦-૩॥

યઃ મામ્ અજમ્ અનાદિમ્ ચ વેત્તિ લોક-મહેશ્વરમ્ ।
અસમ્મૂઢઃ સઃ મર્ત્યેષુ સર્વ-પાપૈઃ પ્રમુચ્યતે ॥ ૧૦-૩॥

યઃ મામ્ અજમ્ અનાદિમ્ લોક-મહેશ્વરમ્ ચ વેત્તિ,
સઃ મર્ત્યેષુ અસમ્મૂઢઃ (ભૂત્વા) સર્વ-પાપૈઃ પ્રમુચ્યતે ।

બુદ્ધિર્જ્ઞાનમસમ્મોહઃ ક્ષમા સત્યં દમઃ શમઃ ।
સુખં દુઃખં ભવોઽભાવો ભયં ચાભયમેવ ચ ॥ ૧૦-૪॥

બુદ્ધિઃ જ્ઞાનમ્ અસમ્મોહઃ ક્ષમા સત્યમ્ દમઃ શમઃ ।
સુખમ્ દુઃખમ્ ભવઃ અભાવઃ ભયમ્ ચ અભયમ્ એવ ચ ॥ ૧૦-૪॥

બુદ્ધિઃ, જ્ઞાનમ્, અસમ્મોહઃ, ક્ષમા, સત્યમ્, દમઃ,
શમઃ, સુખમ્, દુઃખમ્, ભવઃ, અભાવઃ, ભયમ્ ચ
એવ અભયમ્ ચ

અહિંસા સમતા તુષ્ટિસ્તપો દાનં યશોઽયશઃ ।
ભવન્તિ ભાવા ભૂતાનાં મત્ત એવ પૃથગ્વિધાઃ ॥ ૧૦-૫॥

અહિંસા સમતા તુષ્ટિઃ તપઃ દાનમ્ યશઃ અયશઃ ।
ભવન્તિ ભાવાઃ ભૂતાનામ્ મત્તઃ એવ પૃથક્-વિધાઃ ॥ ૧૦-૫॥

અહિંસા, સમતા, તુષ્ટિઃ, તપઃ, દાનમ્, યશઃ, અયશઃ,
(ઇમે) ભૂતાનામ્ પૃથક્-વિધાઃ ભાવાઃ મત્તઃ એવ ભવન્તિ ।

મહર્ષયઃ સપ્ત પૂર્વે ચત્વારો મનવસ્તથા ।
મદ્ભાવા માનસા જાતા યેષાં લોક ઇમાઃ પ્રજાઃ ॥ ૧૦-૬॥

મહર્ષયઃ સપ્ત પૂર્વે ચત્વારઃ મનવઃ તથા ।
મત્ ભાવાઃ માનસાઃ જાતાઃ યેષામ્ લોકે ઇમાઃ પ્રજાઃ ॥ ૧૦-૬॥

પૂર્વે સપ્ત મહર્ષયઃ તથા ચત્વારઃ મનવઃ મત્ ભાવાઃ,
માનસાઃ જાતાઃ યેષામ્ લોકે ઇમાઃ પ્રજાઃ ।

એતાં વિભૂતિં યોગં ચ મમ યો વેત્તિ તત્ત્વતઃ ।
સોઽવિકમ્પેન યોગેન યુજ્યતે નાત્ર સંશયઃ ॥ ૧૦-૭॥

એતામ્ વિભૂતિમ્ યોગમ્ ચ મમ યઃ વેત્તિ તત્ત્વતઃ ।
સઃ અવિકમ્પેન યોગેન યુજ્યતે ન અત્ર સંશયઃ ॥ ૧૦-૭॥

યઃ મમ એતામ્ વિભૂતિમ્ યોગમ્ ચ તત્ત્વતઃ વેત્તિ,
સઃ અવિકમ્પેન યોગેન યુજ્યતે અત્ર સંશયઃ ન ।

અહં સર્વસ્ય પ્રભવો મત્તઃ સર્વં પ્રવર્તતે ।
ઇતિ મત્વા ભજન્તે માં બુધા ભાવસમન્વિતાઃ ॥ ૧૦-૮॥

અહમ્ સર્વસ્ય પ્રભવઃ મત્તઃ સર્વમ્ પ્રવર્તતે ।

ઇતિ મત્વા ભજન્તે મામ્ બુધાઃ ભાવ-સમન્વિતાઃ ॥ ૧૦-૮॥

અહમ્ સર્વસ્ય પ્રભવઃ (અસ્મિ), મત્તઃ સર્વમ્ પ્રવર્તતે,
ઇતિ મત્વા બુધાઃ ભાવ-સમન્વિતાઃ મામ્ ભજન્તે ।

મચ્ચિત્તા મદ્ગતપ્રાણા બોધયન્તઃ પરસ્પરમ્ ।
કથયન્તશ્ચ માં નિત્યં તુષ્યન્તિ ચ રમન્તિ ચ ॥ ૧૦-૯॥

મત્ ચિત્તાઃ મત્ ગત-પ્રાણાઃ બોધયન્તઃ પરસ્પરમ્ ।
કથયન્તઃ ચ મામ્ નિત્યમ્ તુષ્યન્તિ ચ રમન્તિ ચ ॥ ૧૦-૯॥

મત્ ચિત્તાઃ મત્ ગત-પ્રાણાઃ પરસ્પરમ્ મામ્ બોધયન્તઃ
કથયન્તઃ ચ નિત્યમ્ તુષ્યન્તિ ચ ।

તેષાં સતતયુક્તાનાં ભજતાં પ્રીતિપૂર્વકમ્ ।
દદામિ બુદ્ધિયોગં તં યેન મામુપયાન્તિ તે ॥ ૧૦-૧૦॥

તેષામ્ સતત-યુક્તાનામ્ ભજતામ્ પ્રીતિ-પૂર્વકમ્ ।
દદામિ બુદ્ધિ-યોગમ્ તમ્ યેન મામ્ ઉપયાન્તિ તે ॥ ૧૦-૧૦॥

(એવં) સતત-યુક્તાનામ્ પ્રીતિ-પૂર્વકમ્ ભજતામ્ તેષામ્
તમ્ બુદ્ધિ-યોગમ્ દદામિ યેન તે મામ્ ઉપયાન્તિ ।

તેષામેવાનુકમ્પાર્થમહમજ્ઞાનજં તમઃ ।
નાશયામ્યાત્મભાવસ્થો જ્ઞાનદીપેન ભાસ્વતા ॥ ૧૦-૧૧॥

તેષામ્ એવ અનુકમ્પાર્થમ્ અહમ્ અજ્ઞાનજમ્ તમઃ ।
નાશયામિ આત્મ-ભાવસ્થઃ જ્ઞાન-દીપેન ભાસ્વતા ॥ ૧૦-૧૧॥

તેષામ્ એવ અનુકમ્પાર્થમ્ અહમ્ આત્મ-ભાવસ્થઃ (સન્)
ભાસ્વતા જ્ઞાન-દીપેન અજ્ઞાનજમ્ તમઃ નાશયામિ ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

પરં બ્રહ્મ પરં ધામ પવિત્રં પરમં ભવાન્ ।
પુરુષં શાશ્વતં દિવ્યમાદિદેવમજં વિભુમ્ ॥ ૧૦-૧૨॥

આહુસ્ત્વામૃષયઃ સર્વે દેવર્ષિર્નારદસ્તથા ।
અસિતો દેવલો વ્યાસઃ સ્વયં ચૈવ બ્રવીષિ મે ॥ ૧૦-૧૩॥

પરમ્ બ્રહ્મ પરમ્ ધામ પવિત્રમ્ પરમમ્ ભવાન્ ।
પુરુષમ્ શાશ્વતમ્ દિવ્યમ્ આદિદેવમ્ અજમ્ વિભુમ્ ॥ ૧૦-૧૨॥

આહુઃ ત્વામ્ ઋષયઃ સર્વે દેવર્ષિઃ નારદઃ તથા ।
અસિતઃ દેવલઃ વ્યાસઃ સ્વયમ્ ચ એવ બ્રવીષિ મે ॥ ૧૦-૧૩॥

ભવાન્ પરમ્ બ્રહ્મ, પરમ્ ધામ, પરમમ્ પવિત્રમ્ (અસ્તિ) ।
સર્વે ઋષયઃ ત્વામ્ શાશ્વતમ્ દિવ્યમ્ આદિદેવમ્ અજમ્
વિભુમ્ પુરુષમ્ આહુઃ । તથા દેવર્ષિઃ નારદઃ અસિતઃ દેવલઃ
વ્યાસઃ (કથયતિ) (ત્વં) ચ સ્વયમ્ એવ મે બ્રવીષિ ।

સર્વમેતદૃતં મન્યે યન્માં વદસિ કેશવ ।
ન હિ તે ભગવન્વ્યક્તિં વિદુર્દેવા ન દાનવાઃ ॥ ૧૦-૧૪॥

સર્વમ્ એતત્ ઋતમ્ મન્યે યત્ મામ્ વદસિ કેશવ ।
ન હિ તે ભગવન્ વ્યક્તિમ્ વિદુઃ દેવાઃ ન દાનવાઃ ॥ ૧૦-૧૪॥

હે કેશવ! યત્ મામ્ (ત્વં) વદસિ, (તત્) એતત્ સર્વમ્
(અહં) ઋતમ્ મન્યે । હે ભગવન્! ન દેવાઃ ન દાનવાઃ
(વા) તે વ્યક્તિમ્ હિ વિદુઃ ।

સ્વયમેવાત્મનાત્માનં વેત્થ ત્વં પુરુષોત્તમ ।
ભૂતભાવન ભૂતેશ દેવદેવ જગત્પતે ॥ ૧૦-૧૫॥

સ્વયમ્ એવ આત્મના આત્માનમ્ વેત્થ ત્વમ્ પુરુષોત્તમ ।
ભૂત-ભાવન ભૂત-ઈશ દેવ-દેવ જગત્-પતે ॥ ૧૦-૧૫॥

હે પુરુષોત્તમ! ભૂત-ભાવન, ભૂત-ઈશ, દેવ-દેવ,
હે જગત્-પતે! ત્વમ્ સ્વયમ્ એવ આત્મના આત્માનમ્ વેત્થ ।

વક્તુમર્હસ્યશેષેણ દિવ્યા હ્યાત્મવિભૂતયઃ ।
યાભિર્વિભૂતિભિર્લોકાનિમાંસ્ત્વં વ્યાપ્ય તિષ્ઠસિ ॥ ૧૦-૧૬॥

વક્તુમ્ અર્હસિ અશેષેણ દિવ્યાઃ હિ આત્મ-વિભૂતયઃ ।
યાભિઃ વિભૂતિભિઃ લોકાન્ ઇમાન્ ત્વમ્ વ્યાપ્ય તિષ્ઠસિ ॥ ૧૦-૧૬॥

(અતઃ) યાભિઃ વિભૂતિભિઃ ત્વમ્ ઇમાન્ લોકાન્ વ્યાપ્ય તિષ્ઠસિ,
(તાઃ) દિવ્યાઃ આત્મ-વિભૂતયઃ હિ અશેષેણ વક્તુમ્ અર્હસિ ।

કથં વિદ્યામહં યોગિંસ્ત્વાં સદા પરિચિન્તયન્ ।

કેષુ કેષુ ચ ભાવેષુ ચિન્ત્યોઽસિ ભગવન્મયા ॥ ૧૦-૧૭ ॥

કથમ્ વિદ્યામ્ અહમ્ યોગિન્ ત્વામ્ સદા પરિચિન્તયન્ ।
કેષુ કેષુ ચ ભાવેષુ ચિન્ત્યઃ અસિ ભગવન્ મયા ॥ ૧૦-૧૭ ॥

હે યોગિન્! સદા પરિચિન્તયન્ અહમ્ ત્વામ્ કથમ્ વિદ્યામ્ ?
હે ભગવન્! કેષુ કેષુ ચ ભાવેષુ (ત્વં) મયા ચિન્ત્યઃ અસિ ?

વિસ્તરેણાત્મનો યોગં વિભૂતિં ચ જનાર્દન ।
ભૂયઃ કથય તૃપ્તિર્હિ શ‍ૃણ્વતો નાસ્તિ મેઽમૃતમ્ ॥ ૧૦-૧૮ ॥

વિસ્તરેણ આત્મનઃ યોગમ્ વિભૂતિમ્ ચ જનાર્દન ।
ભૂયઃ કથય તૃપ્તિઃ હિ શ‍ૃણ્વતઃ ન અસ્તિ મે અમૃતમ્ ॥ ૧૦-૧૮ ॥

હે જનાર્દન! આત્મનઃ યોગમ્ વિભૂતિમ્ ચ ભૂયઃ વિસ્તરેણ
કથય । (એતત્) અમૃતમ્ શ‍ૃણ્વતઃ હિ મે તૃપ્તિઃ ન અસ્તિ ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

હન્ત તે કથયિષ્યામિ દિવ્યા હ્યાત્મવિભૂતયઃ ।
પ્રાધાન્યતઃ કુરુશ્રેષ્ઠ નાસ્ત્યન્તો વિસ્તરસ્ય મે ॥ ૧૦-૧૯ ॥

હન્ત તે કથયિષ્યામિ દિવ્યાઃ હિ આત્મ-વિભૂતયઃ ।
પ્રાધાન્યતઃ કુરુ-શ્રેષ્ઠ ન અસ્તિ અન્તઃ વિસ્તરસ્ય મે ॥ ૧૦-૧૯ ॥

હે કુરુ-શ્રેષ્ઠ! હન્ત, દિવ્યાઃ આત્મ-વિભૂતયઃ પ્રાધાન્યતઃ
તે કથયિષ્યામિ, મે વિસ્તરસ્ય હિ અન્તઃ ન અસ્તિ ।

અહમાત્મા ગુડાકેશ સર્વભૂતાશયસ્થિતઃ ।
અહમાદિશ્ચ મધ્યં ચ ભૂતાનામન્ત એવ ચ ॥ ૧૦-૨૦ ॥

અહમ્ આત્મા ગુડાકા-ઈશ સર્વ-ભૂત-આશય-સ્થિતઃ ।
અહમ્ આદિઃ ચ મધ્યમ્ ચ ભૂતાનામ્ અન્તઃ એવ ચ ॥ ૧૦-૨૦ ॥

હે ગુડાકા-ઈશ! અહમ્, સર્વ-ભૂત-આશય-સ્થિતઃ આત્મા,
ભૂતાનામ્ આદિઃ ચ મધ્યમ્ ચ અન્તઃ ચ અહમ્ એવ ।

આદિત્યાનામહં વિષ્ણુર્જ્યોતિષાં રવિરંશુમાન્ ।
મરીચિર્મરુતામસ્મિ નક્ષત્રાણામહં શશી ॥ ૧૦-૨૧ ॥

આદિત્યાનામ્ અહમ્ વિષ્ણુઃ જ્યોતિષામ્ રવિઃ અંશુમાન્ ।
મરીચિઃ મરુતામ્ અસ્મિ નક્ષત્રાણામ્ અહમ્ શશી ॥ ૧૦-૨૧॥

આદિત્યાનામ્ વિષ્ણુઃ અહમ્, જ્યોતિષામ્ અંશુમાન્ રવિઃ,
મરુતામ્ મરીચિઃ, નક્ષત્રાણામ્ શશી (ચ) અહમ્ અસ્મિ ।

વેદાનાં સામવેદોઽસ્મિ દેવાનામસ્મિ વાસવઃ ।
ઇન્દ્રિયાણાં મનશ્ચાસ્મિ ભૂતાનામસ્મિ ચેતના ॥ ૧૦-૨૨॥

વેદાનામ્ સામવેદઃ અસ્મિ દેવાનામ્ અસ્મિ વાસવઃ ।
ઇન્દ્રિયાણામ્ મનઃ ચ અસ્મિ ભૂતાનામ્ અસ્મિ ચેતના ॥ ૧૦-૨૨॥

વેદાનામ્ સામવેદઃ (અહં), અસ્મિ દેવાનામ્ વાસવઃ અસ્મિ,
ઇન્દ્રિયાણામ્ મનઃ અસ્મિ, ભૂતાનામ્ ચેતના ચ અસ્મિ ।

રુદ્રાણાં શઙ્કરશ્ચાસ્મિ વિત્તેશો યક્ષરક્ષસામ્ ।
વસૂનાં પાવકશ્ચાસ્મિ મેરુઃ શિખરિણામહમ્ ॥ ૧૦-૨૩॥

રુદ્રાણામ્ શઙ્કરઃ ચ અસ્મિ વિત્ત-ઈશઃ યક્ષ-રક્ષસામ્ ।
વસૂનામ્ પાવકઃ ચ અસ્મિ મેરુઃ શિખરિણામ્ અહમ્ ॥ ૧૦-૨૩॥

રુદ્રાણામ્ શઙ્કરઃ, યક્ષ-રક્ષસામ્ ચ વિત્ત-ઈશઃ અસ્મિ,
વસૂનામ્ પાવકઃ, શિખરિણામ્ મેરુઃ ચ અહમ્ અસ્મિ ।

પુરોધસાં ચ મુખ્યં માં વિદ્ધિ પાર્થ બૃહસ્પતિમ્ ।
સેનાનીનામહં સ્કન્દઃ સરસામસ્મિ સાગરઃ ॥ ૧૦-૨૪॥

પુરોધસામ્ ચ મુખ્યમ્ મામ્ વિદ્ધિ પાર્થ બૃહસ્પતિમ્ ।
સેનાનીનામ્ અહમ્ સ્કન્દઃ સરસામ્ અસ્મિ સાગરઃ ॥ ૧૦-૨૪॥

હે પાર્થ! પુરોધસામ્ ચ મુખ્યમ્ બૃહસ્પતિમ્ મામ્ વિદ્ધિ,
સેનાનીનામ્ સ્કન્દઃ, સરસામ્ સાગરઃ અહમ્ અસ્મિ ।

મહર્ષીણાં ભૃગુરહં ગિરામસ્મ્યેકમક્ષરમ્ ।
યજ્ઞાનાં જપયજ્ઞોઽસ્મિ સ્થાવરાણાં હિમાલયઃ ॥ ૧૦-૨૫॥

મહર્ષીણામ્ ભૃગુઃ અહમ્ ગિરામ્ અસ્મિ એકમ્ અક્ષરમ્ ।
યજ્ઞાનામ્ જપ-યજ્ઞઃ અસ્મિ સ્થાવરાણામ્ હિમાલયઃ ॥ ૧૦-૨૫॥

મહર્ષીણામ્ ભૃગુઃ, ગિરામ્ એકમ્ અક્ષરમ્ અહમ્ અસ્મિ,
યજ્ઞાનામ્ જપ-યજ્ઞઃ, સ્થાવરાણામ્ હિમાલયઃ (ચ) અસ્મિ ।

અશ્વત્થઃ સર્વવૃક્ષાણાં દેવર્ષીણાં ચ નારદઃ ।
ગન્ધર્વાણાં ચિત્રરથઃ સિદ્ધાનાં કપિલો મુનિઃ ॥ ૧૦-૨૬॥

અશ્વત્થઃ સર્વ-વૃક્ષાણામ્ દેવર્ષીણામ્ ચ નારદઃ ।
ગન્ધર્વાણામ્ ચિત્રરથઃ સિદ્ધાનામ્ કપિલઃ મુનિઃ ॥ ૧૦-૨૬॥

સર્વ-વૃક્ષાણામ્ અશ્વત્થઃ, દેવર્ષીણામ્ ચ નારદઃ,
ગન્ધર્વાણામ્ ચિત્રરથઃ, સિદ્ધાનામ્ કપિલઃ મુનિઃ (અહં અસ્મિ) ।

ઉચ્ચૈઃશ્રવસમશ્વાનાં વિદ્ધિ મામમૃતોદ્ભવમ્ ।
ઐરાવતં ગજેન્દ્રાણાં નરાણાં ચ નરાધિપમ્ ॥ ૧૦-૨૭॥

ઉચ્ચૈઃશ્રવસમ્ અશ્વાનામ્ વિદ્ધિ મામ્ અમૃત-ઉદ્ભવમ્ ।
ઐરાવતમ્ ગજેન્દ્રાણામ્ નરાણામ્ ચ નરાધિપમ્ ॥ ૧૦-૨૭॥

અશ્વાનામ્ અમૃત-ઉદ્ભવમ્ ઉચ્ચૈઃશ્રવસમ્, ગજેન્દ્રાણામ્
ઐરાવતમ્, નરાણામ્ નરાધિપમ્ ચ મામ્ વિદ્ધિ ।

આયુધાનામહં વજ્રં ધેનૂનામસ્મિ કામધુક્ ।
પ્રજનશ્ચાસ્મિ કન્દર્પઃ સર્પાણામસ્મિ વાસુકિઃ ॥ ૧૦-૨૮॥

આયુધાનામ્ અહમ્ વજ્રમ્ ધેનૂનામ્ અસ્મિ કામધુક્ ।
પ્રજનઃ ચ અસ્મિ કન્દર્પઃ સર્પાણામ્ અસ્મિ વાસુકિઃ ॥ ૧૦-૨૮॥

આયુધાનામ્ વજ્રમ્ અહમ્, ધેનૂનામ્ કામધુક્
(અહં) અસ્મિ, પ્રજનઃ કન્દર્પઃ અસ્મિ, સર્પાણામ્ વાસુકિઃ ચ અસ્મિ ।

અનન્તશ્ચાસ્મિ નાગાનાં વરુણો યાદસામહમ્ ।
પિતૄણામર્યમા ચાસ્મિ યમઃ સંયમતામહમ્ ॥ ૧૦-૨૯॥

અનન્તઃ ચ અસ્મિ નાગાનામ્ વરુણઃ યાદસામ્ અહમ્ ।
પિતૄણામ્ અર્યમા ચ અસ્મિ યમઃ સંયમતામ્ અહમ્ ॥ ૧૦-૨૯॥

નાગાનામ્ અનન્તઃ, યાદસામ્ વરુણઃ ચ અહમ્ અસ્મિ,
પિતૄણામ્ અર્યમા ચ, સંયમતામ્ યમઃ (ચ) અહમ્ અસ્મિ ।

પ્રહ્લાદશ્ચાસ્મિ દૈત્યાનાં કાલઃ કલયતામહમ્ ।
મૃગાણાં ચ મૃગેન્દ્રોઽહં વૈનતેયશ્ચ પક્ષિણામ્ ॥ ૧૦-૩૦॥

પ્રહ્લાદઃ ચ અસ્મિ દૈત્યાનામ્ કાલઃ કલયતામ્ અહમ્ ।

મૃગાણામ્ ચ મૃગેન્દ્રઃ અહમ્ વૈનતેયઃ ચ પક્ષિણામ્ ॥ ૧૦-૩૦ ॥

દૈત્યાનામ્ પ્રહ્લાદઃ, કલયતામ્ કાલઃ ચ અહમ્ અસ્મિ,
મૃગાણામ્ મૃગેન્દ્રઃ ચ , પક્ષિણામ્ વૈનતેયઃ ચ અહમ્ (અસ્મિ) ।

પવનઃ પવતામસ્મિ રામઃ શસ્ત્રભૃતામહમ્ ।
ઝષાણાં મકરશ્ચાસ્મિ સ્રોતસામસ્મિ જાહ્નવી ॥ ૧૦-૩૧ ॥

પવનઃ પવતામ્ અસ્મિ રામઃ શસ્ત્ર-ભૃતામ્ અહમ્ ।
ઝષાણામ્ મકરઃ ચ અસ્મિ સ્રોતસામ્ અસ્મિ જાહ્નવી ॥ ૧૦-૩૧ ॥

પવતામ્ પવનઃ અસ્મિ, શસ્ત્ર-ભૃતામ્ ચ રામઃ અહમ્ (અસ્મિ),
ઝષાણામ્ મકરઃ અસ્મિ, સ્રોતસામ્ જાહ્નવી ચ (અહં) અસ્મિ ।

સર્ગાણામાદિરન્તશ્ચ મધ્યં ચૈવાહમર્જુન ।
અધ્યાત્મવિદ્યા વિદ્યાનાં વાદઃ પ્રવદતામહમ્ ॥ ૧૦-૩૨ ॥

સર્ગાણામ્ આદિઃ અન્તઃ ચ મધ્યમ્ ચ એવ અહમ્ અર્જુન ।
અધ્યાત્મ-વિદ્યા વિદ્યાનામ્ વાદઃ પ્રવદતામ્ અહમ્ ॥ ૧૦-૩૨ ॥

હે અર્જુન! સર્ગાણામ્ આદિઃ મધ્યમ્ ચ અન્તઃ ચ એવ અહમ્
(અસ્મિ), વિદ્યાનામ્ અધ્યાત્મ-વિદ્યા, પ્રવદતામ્ વાદઃ અહમ્ (અસ્મિ)।

અક્ષરાણામકારોઽસ્મિ દ્વન્દ્વઃ સામાસિકસ્ય ચ ।
અહમેવાક્ષયઃ કાલો ધાતાહં વિશ્વતોમુખઃ ॥ ૧૦-૩૩ ॥

અક્ષરાણામ્ અકારઃ અસ્મિ દ્વન્દ્વઃ સામાસિકસ્ય ચ ।
અહમ્ એવ અક્ષયઃ કાલઃ ધાતા અહં વિશ્વતોમુખઃ ॥ ૧૦-૩૩ ॥

અક્ષરાણામ્ અકારઃ, સામાસિકસ્ય ચ દ્વન્દ્વઃ,
અક્ષયઃ કાલઃ અહમ્ એવ , વિશ્વતોમુખઃ ધાતા (ચ) અહં અસ્મિ ।

મૃત્યુઃ સર્વહરશ્ચાહમુદ્ભવશ્ચ ભવિષ્યતામ્ ।
કીર્તિઃ શ્રીર્વાક્ચ નારીણાં સ્મૃતિર્મેધા ધૃતિઃ ક્ષમા ॥ ૧૦-૩૪ ॥

મૃત્યુઃ સર્વ-હરઃ ચ અહમ્ ઉદ્ભવઃ ચ ભવિષ્યતામ્ ।
કીર્તિઃ શ્રીઃ વાક્ ચ નારીણામ્ સ્મૃતિઃ મેધા ધૃતિઃ ક્ષમા ॥ ૧૦-૩૪ ॥

સર્વ-હરઃ મૃત્યુઃ, ભવિષ્યતામ્ ઉદ્ભવઃ ચ અહમ્
નારીણામ્ ચ કીર્તિઃ શ્રીઃ વાક્ સ્મૃતિઃ મેધા ધૃતિઃ
ક્ષમા ચ (અહં અસ્મિ)।

બૃહત્સામ તથા સામ્નાં ગાયત્રી છન્દસામહમ્ ।
માસાનાં માર્ગશીર્ષોઽહમૃતૂનાં કુસુમાકરઃ ॥ ૧૦-૩૫॥

બૃહત્-સામ તથા સામ્નામ્ ગાયત્રી છન્દસામ્ અહમ્ ।
માસાનામ્ માર્ગશીર્ષઃ અહમ્ ઋતૂનામ્ કુસુમાકરઃ ॥ ૧૦-૩૫॥

સામ્નામ્ બૃહત્-સામ, તથા છન્દસામ્ ગાયત્રી અહમ્,
માસાનામ્ માર્ગશીર્ષઃ, ઋતૂનામ્ કુસુમાકરઃ અહમ્ (અસ્મિ) ।

દ્યૂતં છલયતામસ્મિ તેજસ્તેજસ્વિનામહમ્ ।
જયોઽસ્મિ વ્યવસાયોઽસ્મિ સત્ત્વં સત્ત્વવતામહમ્ ॥ ૧૦-૩૬॥

દ્યૂતમ્ છલયતામ્ અસ્મિ તેજઃ તેજસ્વિનામ્ અહમ્ ।
જયઃ અસ્મિ વ્યવસાયઃ અસ્મિ સત્ત્વમ્ સત્ત્વવતામ્ અહમ્ ॥ ૧૦-૩૬॥

છલયતામ્ દ્યૂતમ્, તેજસ્વિનામ્ તેજઃ અહમ્ અસ્મિ,
જયઃ અહમ્ અસ્મિ, વ્યવસાયઃ (અહમ્) અસ્મિ, સત્ત્વવતામ્
સત્ત્વમ્ (અહમ્ અસ્મિ)।

વૃષ્ણીનાં વાસુદેવોઽસ્મિ પાણ્ડવાનાં ધનઞ્જયઃ ।
મુનીનામપ્યહં વ્યાસઃ કવીનામુશના કવિઃ ॥ ૧૦-૩૭॥

વૃષ્ણીનામ્ વાસુદેવઃ અસ્મિ પાણ્ડવાનામ્ ધનઞ્જયઃ ।
મુનીનામ્ અપિ અહં વ્યાસઃ કવીનામ્ ઉશના કવિઃ ॥ ૧૦-૩૭॥

વૃષ્ણીનામ્ વાસુદેવઃ, પાણ્ડવાનામ્ ધનઞ્જયઃ અસ્મિ,
મુનીનામ્ અપિ વ્યાસઃ (અહં), કવીનામ્ ઉશના કવિઃ (અહં અસ્મિ)।

દણ્ડો દમયતામસ્મિ નીતિરસ્મિ જિગીષતામ્ ।
મૌનં ચૈવાસ્મિ ગુહ્યાનાં જ્ઞાનં જ્ઞાનવતામહમ્ ॥ ૧૦-૩૮॥

દણ્ડઃ દમયતામ્ અસ્મિ નીતિઃ અસ્મિ જિગીષતામ્ ।
મૌનમ્ ચ એવ અસ્મિ ગુહ્યાનામ્ જ્ઞાનમ્ જ્ઞાનવતામ્ અહમ્ ॥ ૧૦-૩૮॥

દમયતામ્ દણ્ડઃ અસ્મિ, જિગીષતામ્ નીતિઃ અસ્મિ । ગુહ્યાનામ્
મૌનમ્, જ્ઞાનવતામ્ જ્ઞાનમ્ ચ એવ અહમ્ અસ્મિ ।

યચ્ચાપિ સર્વભૂતાનાં બીજં તદહમર્જુન ।
ન તદસ્તિ વિના યત્સ્યાન્મયા ભૂતં ચરાચરમ્ ॥ ૧૦-૩૯॥

યત્ ચ અપિ સર્વ-ભૂતાનામ્ બીજમ્ તત્ અહમ્ અર્જુન ।
ન તત્ અસ્તિ વિના યત્ સ્યાત્ મયા ભૂતમ્ ચર-અચરમ્ ॥ ૧૦-૩૯॥

હે અર્જુન! ચ સર્વ-ભૂતાનામ્ યત્ બીજમ્ તત્ અપિ અહમ્ (અસ્મિ),
યત્ ચર-અચરમ્ ભૂતમ્ સ્યાત્ તત્ મયા વિના ન અસ્તિ ।

નાન્તોઽસ્તિ મમ દિવ્યાનાં વિભૂતીનાં પરન્તપ ।
એષ તૂદ્દેશતઃ પ્રોક્તો વિભૂતેર્વિસ્તરો મયા ॥ ૧૦-૪૦॥

ન અન્તઃ અસ્તિ મમ દિવ્યાનામ્ વિભૂતીનામ્ પરન્તપ ।
એષઃ તુ ઉદ્દેશતઃ પ્રોક્તઃ વિભૂતેઃ વિસ્તરઃ મયા ॥ ૧૦-૪૦॥

હે પરન્તપ! મમ દિવ્યાનામ્ વિભૂતીનામ્ અન્તઃ ન અસ્તિ,
એષઃ તુ વિભૂતેઃ વિસ્તરઃ મયા ઉદ્દેશતઃ પ્રોક્તઃ ।

યદ્યદ્વિભૂતિમત્સત્ત્વં શ્રીમદૂર્જિતમેવ વા ।
તત્તદેવાવગચ્છ ત્વં મમ તેજોંઽશસમ્ભવમ્ ॥ ૧૦-૪૧॥

યત્ યત્ વિભૂતિમત્ સત્ત્વમ્ શ્રીમત્ ઊર્જિતમ્ એવ વા ।
તત્ તત્ અવગચ્છ ત્વમ્ મમ તેજઃ અંશ-સમ્ભવમ્ ॥ ૧૦-૪૧॥

યત્ યત્ સત્ત્વમ્ વિભૂતિમત્, શ્રીમત્ ઊર્જિતમ્ એવ વા
(અસ્તિ), તત્ તત્ મમ તેજઃ અંશ-સમ્ભવમ્ (અસ્તિ ઇતિ)
ત્વમ્ અવગચ્છ ।

અથવા બહુનૈતેન કિં જ્ઞાતેન તવાર્જુન ।
વિષ્ટભ્યાહમિદં કૃત્સ્નમેકાંશેન સ્થિતો જગત્ ॥ ૧૦-૪૨॥

અથવા બહુના એતેન કિમ્ જ્ઞાતેન તવ અર્જુન ।
વિષ્ટભ્ય અહમ્ ઇદમ્ કૃત્સ્નમ્ એક-અંશેન સ્થિતઃ જગત્ ॥ ૧૦-૪૨॥

હે અર્જુન! અથવા એતેન બહુના જ્ઞાતેન તવ કિમ્? અહમ્
ઇદમ્ કૃત્સ્નમ્ જગત્ એક-અંશેન વિષ્ટભ્ય સ્થિતઃ (અસ્મિ ઇતિ ત્વં વિદ્ધિ) ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
વિભૂતિયોગો નામ દશમોઽધ્યાયઃ ॥ ૧૦॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદે

વિભૂતિ-યોગઃ નામ દશમઃ અધ્યાયઃ ॥ ૧૦॥

---

અથૈકાદશોઽધ્યાયઃ । વિશ્વરૂપદર્શનયોગઃ ।

અથ એકાદશઃ અધ્યાયઃ । વિશ્વ-રૂપ-દર્શન-યોગઃ ।

અર્જુન ઉવાચ ।

અર્જુન ઉવાચ ।

મદનુગ્રહાય પરમં ગુહ્યમધ્યાત્મસંજ્ઞિતમ્ ।
યત્ત્વયોક્તં વચસ્તેન મોહોઽયં વિગતો મમ ॥ ૧૧-૧॥

મત્ અનુગ્રહાય પરમમ્ ગુહ્યમ્ અધ્યાત્મ-સંજ્ઞિતમ્ ।
યત્ ત્વયા ઉક્તમ્ વચઃ તેન મોહઃ અયમ્ વિગતઃ મમ ॥ ૧૧-૧॥

ત્વયા મત્ અનુગ્રહાય અધ્યાત્મ-સંજ્ઞિતમ્ યત્ પરમમ્
ગુહ્યમ્ વચઃ ઉક્તમ્, તેન મમ અયમ્ મોહઃ વિગતઃ ।

ભવાપ્યયૌ હિ ભૂતાનાં શ્રુતૌ વિસ્તરશો મયા ।
ત્વત્તઃ કમલપત્રાક્ષ માહાત્મ્યમપિ ચાવ્યયમ્ ॥ ૧૧-૨॥

ભવ અપિ અયૌ હિ ભૂતાનામ્ શ્રુતૌ વિસ્તરશઃ મયા ।
ત્વત્તઃ કમલ-પત્ર-અક્ષ માહાત્મ્યમ્ અપિ ચ અવ્યયમ્ ॥ ૧૧-૨॥

હે કમલ-પત્ર-અક્ષ! ભૂતાનામ્ ભવ અપિ અયૌ મયા ત્વત્તઃ
વિસ્તરશઃ શ્રુતૌ હિ; અવ્યયમ્ માહાત્મ્યમ્ અપિ ચ (શ્રુતં) ।

એવમેતદ્યથાત્થ ત્વમાત્માનં પરમેશ્વર ।
દ્રષ્ટુમિચ્છામિ તે રૂપમૈશ્વરં પુરુષોત્તમ ॥ ૧૧-૩॥

એવમ્ એતત્ યથા આત્થ ત્વમ્ આત્માનં પરમેશ્વર ।
દ્રષ્ટુમ્ ઇચ્છામિ તે રૂપમ્ ઐશ્વરમ્ પુરુષોત્તમ ॥ ૧૧-૩॥

હે પરમેશ્વર! યથા એવમ્ ત્વમ્ આત્માનં આત્થ, એતત્
હે પુરુષોત્તમ! તે ઐશ્વરમ્ રૂપમ્ દ્રષ્ટુમ્ ઇચ્છામિ ।

મન્યસે યદિ તચ્છક્યં મયા દ્રષ્ટુમિતિ પ્રભો ।
યોગેશ્વર તતો મે ત્વં દર્શયાત્માનમવ્યયમ્ ॥ ૧૧-૪॥

મન્યસે યદિ તત્ શક્યમ્ મયા દ્રષ્ટુમ્ ઇતિ પ્રભો ।
યોગેશ્વર તતઃ મે ત્વમ્ દર્શય આત્માનમ્ અવ્યયમ્ ॥ ૧૧-૪॥

હે યોગેશ્વર પ્રભો! મયા તત્ દ્રષ્ટુમ્ શક્યમ્ ઇતિ ત્વમ્
યદિ મન્યસે, તતઃ મે અવ્યયમ્ આત્માનમ્ દર્શય ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

પશ્ય મે પાર્થ રૂપાણિ શતશોઽથ સહસ્રશઃ ।
નાનાવિધાનિ દિવ્યાનિ નાનાવર્ણાકૃતીનિ ચ ॥ ૧૧-૫॥

પશ્ય મે પાર્થ રૂપાણિ શતશઃ અથ સહસ્રશઃ ।
નાના-વિધાનિ દિવ્યાનિ નાના-વર્ણ-આકૃતીનિ ચ ॥ ૧૧-૫॥

હે પાર્થ! મે નાના-વિધાનિ, નાના-વર્ણ-આકૃતીનિ, દિવ્યાનિ ચ
શતશઃ અથ સહસ્રશઃ રૂપાણિ પશ્ય ।

પશ્યાદિત્યાન્વસૂન્ રુદ્રાનશ્વિનૌ મરુતસ્તથા ।
બહૂન્યદૃષ્ટપૂર્વાણિ પશ્યાશ્ચર્યાણિ ભારત ॥ ૧૧-૬॥

પશ્ય આદિત્યાન્ વસૂન્ રુદ્રાન્ અશ્વિનૌ મરુતાઃ તથા ।
બહૂનિ અદૃષ્ટ-પૂર્વાણિ પશ્ય આશ્ચર્યાણિ ભારત ॥ ૧૧-૬॥

હે ભારત! આદિત્યાન્, વસૂન્, રુદ્રાન્, અશ્વિનૌ તથા
મરુતાઃ પશ્ય, અદૃષ્ટ-પૂર્વાણિ બહૂનિ આશ્ચર્યાણિ (ચ) પશ્ય ।

ઇહૈકસ્થં જગત્કૃત્સ્નં પશ્યાદ્ય સચરાચરમ્ ।
મમ દેહે ગુડાકેશ યચ્ચાન્યદ્ દ્રષ્ટુમિચ્છસિ ॥ ૧૧-૭॥

ઇહ એકસ્થમ્ જગત્ કૃત્સ્નમ્ પશ્ય અદ્ય સચર-અચરમ્ ।
મમ દેહે ગુડાકેશ યત્ ચ અન્યત્ દ્રષ્ટુમ્ ઇચ્છસિ ॥ ૧૧-૭॥

હે ગુડાકેશ! કૃત્સ્નમ્ સચર-અચરમ્ જગત્, યત્ અન્યત્
ચ દ્રષ્ટુમ્ ઇચ્છસિ, (તત્ અપિ) ઇહ મમ દેહે એકસ્થમ્ અદ્ય પશ્ય ।

ન તુ માં શક્યસે દ્રષ્ટુમનેનૈવ સ્વચક્ષુષા ।
દિવ્યં દદામિ તે ચક્ષુઃ પશ્ય મે યોગમૈશ્વરમ્ ॥ ૧૧-૮॥

ન તુ મામ્ શક્યસે દ્રષ્ટુમ્ અનેન એવ સ્વ-ચક્ષુષા ।
દિવ્યમ્ દદામિ તે ચક્ષુઃ પશ્ય મે યોગમ્ ઐશ્વરમ્ ॥ ૧૧-૮॥

અનેન એવ સ્વ-ચક્ષુષા તુ મામ્ દ્રષ્ટુમ્ ન શક્યસે, (અત એવ)

દિવ્યમ્ ચક્ષુઃ તે દદામિ, મે ઐશ્વરમ્ યોગમ્ પશ્ય ।

સઞ્જય ઉવાચ ।

સઞ્જયઃ ઉવાચ ।

એવમુક્ત્વા તતો રાજન્મહાયોગેશ્વરો હરિઃ ।
દર્શયામાસ પાર્થાય પરમં રૂપમૈશ્વરમ્ ॥ ૧૧-૯॥

એવમ્ ઉક્ત્વા તતઃ રાજન્ મહા-યોગ-ઈશ્વરઃ હરિઃ ।
દર્શયામાસ પાર્થાય પરમમ્ રૂપમ્ ઐશ્વરમ્ ॥ ૧૧-૯॥

હે રાજન્! એવમ્ ઉક્ત્વા, તતઃ મહા-યોગ-ઈશ્વરઃ હરિઃ પાર્થાય
પરમમ્ ઐશ્વરમ્ રૂપમ્ દર્શયામાસ ।

અનેકવક્ત્રનયનમનેકાદ્ભુતદર્શનમ્ ।
અનેકદિવ્યાભરણં દિવ્યાનેકોદ્યતાયુધમ્ ॥ ૧૧-૧૦॥

અનેક-વક્ત્ર-નયનમ્ અનેક-અદ્ભુત-દર્શનમ્ ।
અનેક-દિવ્ય-આભરણમ્ દિવ્ય-અનેક-ઉદ્યત-આયુધમ્ ॥ ૧૧-૧૦॥

અનેક-વક્ત્ર-નયનમ્, અનેક-અદ્ભુત-દર્શનમ્,
અનેક-દિવ્ય-આભરણમ્, દિવ્ય-અનેક-ઉદ્યત-આયુધમ્,

દિવ્યમાલ્યામ્બરધરં દિવ્યગન્ધાનુલેપનમ્ ।
સર્વાશ્ચર્યમયં દેવમનન્તં વિશ્વતોમુખમ્ ॥ ૧૧-૧૧॥

દિવ્ય-માલ્ય-અમ્બર-ધરમ્ દિવ્ય-ગન્ધ-અનુલેપનમ્ ।
સર્વ-આશ્ચર્યમયમ્ દેવમ્ અનન્તમ્ વિશ્વતોમુખમ્ ॥ ૧૧-૧૧॥

દિવ્ય-માલ્ય-અમ્બર-ધરમ્, દિવ્ય-ગન્ધ-અનુલેપનમ્,
સર્વ-આશ્ચર્યમયમ્, અનન્તમ્, વિશ્વતોમુખમ્
દેવમ્ (અર્જુનઃ અપશ્યત્) ।

દિવિ સૂર્યસહસ્રસ્ય ભવેદ્યુગપદુત્થિતા ।
યદિ ભાઃ સદૃશી સા સ્યાદ્ભાસસ્તસ્ય મહાત્મનઃ ॥ ૧૧-૧૨॥

દિવિ સૂર્ય-સહસ્રસ્ય ભવેત્ યુગપત્ ઉત્થિતા ।
યદિ ભાઃ સદૃશી સા સ્યાત્ ભાસઃ તસ્ય મહાત્મનઃ ॥ ૧૧-૧૨॥

યદિ દિવિ સૂર્ય-સહસ્રસ્ય ભાઃ યુગપત્ ઉત્થિતા ભવેત્,
(તર્હિ) સા તસ્ય મહાત્મનઃ ભાસઃ સદૃશી સ્યાત્ ।

તત્રૈકસ્થં જગત્કૃત્સ્નં પ્રવિભક્તમનેકધા ।
અપશ્યદ્દેવદેવસ્ય શરીરે પાણ્ડવસ્તદા ॥ ૧૧-૧૩ ॥

તત્ર એકસ્થમ્ જગત્ કૃત્સ્નમ્ પ્રવિભક્તમ્ અનેકધા ।
અપશ્યત્ દેવ-દેવસ્ય શરીરે પાણ્ડવઃ તદા ॥ ૧૧-૧૩ ॥

પાણ્ડવઃ તદા અનેકધા પ્રવિભક્તમ્ કૃત્સ્નમ્ જગત્,
તત્ર દેવ-દેવસ્ય શરીરે એકસ્થમ્ અપશ્યત્ ।

તતઃ સ વિસ્મયાવિષ્ટો હૃષ્ટરોમા ધનઞ્જયઃ ।
પ્રણમ્ય શિરસા દેવં કૃતાઞ્જલિરભાષત ॥ ૧૧-૧૪ ॥

તતઃ સઃ વિસ્મય-આવિષ્ટઃ હૃષ્ટ-રોમા ધનઞ્જયઃ ।
પ્રણમ્ય શિરસા દેવમ્ કૃત-અઞ્જલિઃ અભાષત ॥ ૧૧-૧૪ ॥

તતઃ વિસ્મય-આવિષ્ટઃ હૃષ્ટ-રોમા સઃ ધનઞ્જયઃ, દેવમ્
શિરસા પ્રણમ્ય, કૃત-અઞ્જલિઃ અભાષત ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

પશ્યામિ દેવાંસ્તવ દેવ દેહે
 સર્વાંસ્તથા ભૂતવિશેષસઙ્ઘાન્ ।
બ્રહ્માણમીશં કમલાસનસ્થ-
 મૃષીંશ્ચ સર્વાનુરગાંશ્ચ દિવ્યાન્ ॥ ૧૧-૧૫ ॥

પશ્યામિ દેવાન્ તવ દેવ દેહે
 સર્વાન્ તથા ભૂત-વિશેષ-સઙ્ઘાન્ ।
બ્રહ્માણમ્ ઈશમ્ કમલ-આસનસ્થં
 ઋષીન્ ચ સર્વાન્ ઉરગાન્ ચ દિવ્યાન્ ॥ ૧૧-૧૫ ॥

હે દેવ! (અહં) તવ દેહે સર્વાન્ દેવાન્, તથા
ભૂત-વિશેષ-સઙ્ઘાન્, કમલ-આસનસ્થં ઈશમ્
બ્રહ્માણમ્ ચ, સર્વાન્ ઋષીન્, દિવ્યાન્ ઉરગાન્ ચ પશ્યામિ ।

અનેકબાહૂદરવક્ત્રનેત્રં
 પશ્યામિ ત્વાં સર્વતોઽનન્તરૂપમ્ ।
નાન્તં ન મધ્યં ન પુનસ્તવાદિં

પશ્યામિ વિશ્વેશ્વર  વિશ્વરૂપ ॥ ૧૧-૧૬॥

અનેક-બાહુ-ઉદર-વક્ત્ર-નેત્રમ્
પશ્યામિ ત્વામ્ સર્વતઃ અનન્ત-રૂપમ્ ।
ન અન્તમ્ ન મધ્યમ્ ન પુનઃ તવ આદિમ્
પશ્યામિ વિશ્વેશ્વર વિશ્વરૂપ ॥ ૧૧-૧૬॥

(અહં) ત્વામ્ અનેક-બાહુ-ઉદર-વક્ત્ર-નેત્રમ્ સર્વતઃ
અનન્ત-રૂપમ્ પશ્યામિ । હે વિશ્વરૂપ વિશ્વેશ્વર!
પુનઃ તવ અન્તમ્ મધ્યમ્ આદિમ્ ન પશ્યામિ ।

કિરીટિનં ગદિનં ચક્રિણં ચ
તેજોરાશિં સર્વતો દીપ્તિમન્તમ્ ।
પશ્યામિ ત્વાં દુર્નિરીક્ષ્યં સમન્તાદ્
દીપ્તાનલાર્કદ્યુતિમપ્રમેયમ્ ॥ ૧૧-૧૭॥

કિરીટિનમ્ ગદિનમ્ ચક્રિણમ્ ચ
તેજો-રાશિમ્ સર્વતઃ દીપ્તિમન્તમ્ ।
પશ્યામિ ત્વામ્ દુર્નિરીક્ષ્યમ્ સમન્તાત્
દીપ્ત-અનલ-અર્ક-દ્યુતિમ્ અપ્રમેયમ્ ॥ ૧૧-૧૭॥

ત્વામ્ કિરીટિનમ્, ગદિનમ્, ચક્રિણમ્, તેજો-રાશિમ્
સર્વતઃ દીપ્તિમન્તમ્, સમન્તાત્ દીપ્ત-અનલ-અર્ક-દ્યુતિમ્
અપ્રમેયમ્ દુર્નિરીક્ષ્યમ્ ચ પશ્યામિ ।

ત્વમક્ષરં પરમં વેદિતવ્યં
ત્વમસ્ય વિશ્વસ્ય પરં નિધાનમ્ ।
ત્વમવ્યયઃ શાશ્વતધર્મગોપ્તા
સનાતનસ્ત્વં પુરુષો મતો મે ॥ ૧૧-૧૮॥

ત્વમ્ અક્ષરમ્ પરમમ્ વેદિતવ્યમ્
ત્વમ્ અસ્ય વિશ્વસ્ય પરમ્ નિધાનમ્ ।
ત્વમ્ અવ્યયઃ શાશ્વત-ધર્મ-ગોપ્તા
સનાતનઃ ત્વમ્ પુરુષઃ મતઃ મે ॥ ૧૧-૧૮॥

ત્વમ્ વેદિતવ્યમ્ પરમમ્ અક્ષરમ્, ત્વમ્ અસ્ય વિશ્વસ્ય
પરમ્ નિધાનમ્, ત્વમ્ અવ્યયઃ શાશ્વત-ધર્મ-ગોપ્તા,

ત્વમ્ સનાતનઃ પુરુષઃ મે મતઃ ।

અનાદિમધ્યાન્તમનન્તવીર્ય-
        મનન્તબાહું શશિસૂર્યનેત્રમ્ ।
પશ્યામિ ત્વાં દીપ્તહુતાશવક્ત્રં
        સ્વતેજસા વિશ્વમિદં તપન્તમ્ ॥ ૧૧-૧૯ ॥

અનાદિ-મધ્ય-અન્તમ્ અનન્ત-વીર્યમ્
        અનન્ત-બાહુમ્ શશિ-સૂર્ય-નેત્રમ્ ।
પશ્યામિ ત્વામ્ દીપ્ત-હુતાશ-વક્ત્રમ્
        સ્વ-તેજસા વિશ્વમ્ ઇદમ્ તપન્તમ્ ॥ ૧૧-૧૯ ॥

અનાદિ-મધ્ય-અન્તમ્, અનન્ત-વીર્યમ્, અનન્ત-બાહુમ્,
શશિ-સૂર્ય-નેત્રમ્, દીપ્ત-હુતાશ-વક્ત્રમ્, સ્વ-તેજસા
ઇદમ્ વિશ્વમ્ તપન્તમ્, ત્વામ્ પશ્યામિ ।

દ્યાવાપૃથિવ્યોરિદમન્તરં હિ
        વ્યાપ્તં ત્વયૈકેન દિશશ્ચ સર્વાઃ ।
દૃષ્ટ્વાદ્ભુતં રૂપમુગ્રં તવેદં
        લોકત્રયં પ્રવ્યથિતં મહાત્મન્ ॥ ૧૧-૨૦ ॥

દ્યાવા-પૃથિવ્યોઃ ઇદમ્ અન્તરમ્ હિ
        વ્યાપ્તમ્ ત્વયા એકેન દિશઃ ચ સર્વાઃ ।
દૃષ્ટ્વા અદ્ભુતમ્ રૂપમ્ ઉગ્રમ્ તવ ઇદમ્
        લોક-ત્રયમ્ પ્રવ્યથિતમ્ મહાત્મન્ ॥ ૧૧-૨૦ ॥

હે મહાત્મન્! ત્વયા એકેન દ્યાવા-પૃથિવ્યોઃ ઇદમ્
અન્તરમ્ વ્યાપ્તમ્, સર્વાઃ દિશઃ ચ (વ્યાપ્તાઃ), ઇદમ્ તવ
અદ્ભુતમ્ ઉગ્રમ્ રૂપમ્ દૃષ્ટ્વા લોક-ત્રયમ્ પ્રવ્યથિતમ્ હિ ।

અમી હિ ત્વાં સુરસઙ્ઘા વિશન્તિ
        કેચિદ્ભીતાઃ પ્રાઞ્જલયો ગૃણન્તિ ।
સ્વસ્તીત્યુક્ત્વા મહર્ષિસિદ્ધસઙ્ઘાઃ
        સ્તુવન્તિ ત્વાં સ્તુતિભિઃ પુષ્કલાભિઃ ॥ ૧૧-૨૧ ॥

અમી હિ ત્વામ્ સુર-સઙ્ઘાઃ વિશન્તિ
        કેચિત્ ભીતાઃ પ્રાઞ્જલયઃ ગૃણન્તિ ।

સ્વસ્તિ ઇતિ ઉક્ત્વા મહર્ષિ-સિદ્ધ-સઙ્ઘાઃ
       સ્તુવન્તિ ત્વામ્ સ્તુતિભિઃ પુષ્કલાભિઃ ॥ ૧૧-૨૧॥

અમી હિ સુર-સઙ્ઘાઃ ત્વામ્ વિશન્તિ, કેચિત્ ભીતાઃ પ્રાઞ્જલયઃ
ગૃણન્તિ; મહર્ષિ-સિદ્ધ-સઙ્ઘાઃ સ્વસ્તિ ઇતિ ઉક્ત્વા પુષ્કલાભિઃ
સ્તુતિભિઃ ત્વામ્ સ્તુવન્તિ ।

રુદ્રાદિત્યા વસવો યે ચ સાધ્યા
       વિશ્વેઽશ્વિનૌ મરુતશ્ચોષ્મપાશ્ચ ।
ગન્ધર્વયક્ષાસુરસિદ્ધસઙ્ઘા
       વીક્ષન્તે ત્વાં વિસ્મિતાશ્ચૈવ સર્વે ॥ ૧૧-૨૨॥

રુદ્ર-આદિત્યાઃ વસવઃ યે ચ સાધ્યાઃ
       વિશ્વે અશ્વિનૌ મરુતઃ ચ ઉષ્મપાઃ ચ ।
ગન્ધર્વ-યક્ષ-અસુર-સિદ્ધ-સઙ્ઘાઃ
       વીક્ષન્તે ત્વામ્ વિસ્મિતાઃ ચ એવ સર્વે ॥ ૧૧-૨૨॥

રુદ્ર-આદિત્યાઃ, વસવઃ, યે ચ સાધ્યાઃ, વિશ્વે અશ્વિનૌ ચ,
મરુતઃ, ઉષ્મપાઃ ચ, ગન્ધર્વ-યક્ષ-અસુર-સિદ્ધ-સઙ્ઘાઃ
ચ સર્વે વિસ્મિતાઃ એવ ત્વામ્ વીક્ષન્તે ।

રૂપં મહત્તે બહુવક્ત્રનેત્રં
       મહાબાહો બહુબાહૂરુપાદમ્ ।
બહૂદરં બહુદંષ્ટ્રાકરાલં
       દૃષ્ટ્વા લોકાઃ પ્રવ્યથિતાસ્તથાહમ્ ॥ ૧૧-૨૩॥

રૂપમ્ મહત્ તે બહુ-વક્ત્ર-નેત્રમ્
       મહા-બાહો બહુ-બાહુ-ઊરુ-પાદમ્ ।
બહુ-ઉદરમ્ બહુ-દંષ્ટ્રા-કરાલમ્
       દૃષ્ટ્વા લોકાઃ પ્રવ્યથિતાઃ તથા અહમ્ ॥ ૧૧-૨૩॥

હે મહા-બાહો! બહુ-વક્ત્ર-નેત્રમ્, બહુ-બાહુ-ઊરુ-પાદમ્,
બહુ-ઉદરમ્, બહુ-દંષ્ટ્રા-કરાલમ્ તે મહત્ રૂપમ્ દૃષ્ટ્વા
લોકાઃ પ્રવ્યથિતાઃ, તથા અહમ્ (અપિ વ્યથિતઃ અસ્મિ)।

નભઃસ્પૃશં દીપ્તમનેકવર્ણં
       વ્યાત્તાનનં દીપ્તવિશાલનેત્રમ્ ।

દૃષ્ટ્વા હિ ત્વાં પ્રવ્યથિતાન્તરાત્મા
ધૃતિં ન વિન્દામિ શમં ચ વિષ્ણો ॥ ૧૧-૨૪॥

નભઃ-સ્પૃશમ્ દીપ્તમ્ અનેક-વર્ણમ્
વ્યાત્ત-આનનમ્ દીપ્ત-વિશાલ-નેત્રમ્ ।
દૃષ્ટ્વા હિ ત્વામ્ પ્રવ્યથિત-અન્તર-આત્મા
ધૃતિમ્ ન વિન્દામિ શમમ્ ચ વિષ્ણો ॥ ૧૧-૨૪॥

હે વિષ્ણો! ત્વામ્ નભઃ-સ્પૃશમ્, દીપ્તમ્, અનેક-વર્ણમ્,
વ્યાત્ત-આનનમ્, દીપ્ત-વિશાલ-નેત્રમ્, દૃષ્ટ્વા હિ (અહં)
પ્રવ્યથિત-અન્તર-આત્મા (ભૂત્વા) ધૃતિમ્ શમમ્ ચ ન વિન્દામિ ।

દંષ્ટ્રાકરાલાનિ ચ તે મુખાનિ
દૃષ્ટ્વૈવ કાલાનલસન્નિભાનિ ।
દિશો ન જાને ન લભે ચ શર્મ
પ્રસીદ દેવેશ જગન્નિવાસ ॥ ૧૧-૨૫॥

દંષ્ટ્રા-કરાલાનિ ચ તે મુખાનિ
દૃષ્ટ્વા એવ કાલ-અનલ-સન્નિભાનિ ।
દિશઃ ન જાને ન લભે ચ શર્મ
પ્રસીદ દેવેશ જગત્-નિવાસ ॥ ૧૧-૨૫॥

હે દેવેશ! હે જગત્-નિવાસ! કાલ-અનલ-સન્નિભાનિ
દંષ્ટ્રા-કરાલાનિ ચ તે મુખાનિ દૃષ્ટ્વા એવ (અહં) દિશઃ
ન જાને, શર્મ ચ ન લભે, (અતઃ ત્વં) પ્રસીદ ।

અમી ચ ત્વાં ધૃતરાષ્ટ્રસ્ય પુત્રાઃ
સર્વે સહૈવાવનિપાલસઙ્ઘૈઃ ।
ભીષ્મો દ્રોણઃ સૂતપુત્રસ્તથાસૌ
સહાસ્મદીયૈરપિ યોધમુખ્યૈઃ ॥ ૧૧-૨૬॥

વક્ત્રાણિ તે ત્વરમાણા વિશન્તિ
દંષ્ટ્રાકરાલાનિ ભયાનકાનિ ।
કેચિદ્વિલગ્ના દશનાન્તરેષુ
સન્દૃશ્યન્તે ચૂર્ણિતૈરુત્તમાઙ્ગૈઃ ॥ ૧૧-૨૭॥

અમી ચ ત્વામ્ ધૃતરાષ્ટ્રસ્ય પુત્રાઃ

સર્વે સહ એવ અવનિપાલ-સઙ્ઘૈઃ ।
ભીષ્મઃ દ્રોણઃ સૂત-પુત્રઃ તથા અસૌ
સહ અસ્મદીયૈઃ અપિ યોધ-મુખ્યૈઃ ॥ ૧૧-૨૬॥

વક્ત્રાણિ તે ત્વરમાણાઃ વિશન્તિ
દંષ્ટ્રા-કરાલાનિ ભયાનકાનિ ।
કેચિત્ વિલગ્નાઃ દશન-અન્તરેષુ
સન્દૃશ્યન્તે ચૂર્ણિતૈઃ ઉત્તમ-અઙ્ગૈઃ ॥ ૧૧-૨૭॥

અમી ચ સર્વે ધૃતરાષ્ટ્રસ્ય પુત્રાઃ અવનિપાલ-સઙ્ઘૈઃ સહ એવ,
તથા ભીષ્મઃ દ્રોણઃ અસૌ સૂત-પુત્રઃ અસ્મદીયૈઃ અપિ યોધ-મુખ્યૈઃ
સહ ત્વામ્ વિશન્તિ । તે દંષ્ટ્રા-કરાલાનિ ભયાનકાનિ વક્ત્રાણિ
ત્વરમાણાઃ (વિશન્તિ), કેચિત્ દશન-અન્તરેષુ વિલગ્નાઃ ચૂર્ણિતૈઃ
ઉત્તમ-અઙ્ગૈઃ (યુક્તાઃ) સન્દૃશ્યન્તે ।

યથા નદીનાં બહવોઽમ્બુવેગાઃ
સમુદ્રમેવાભિમુખા દ્રવન્તિ ।
તથા તવામી નરલોકવીરા
વિશન્તિ વક્ત્રાણ્યભિવિજ્વલન્તિ ॥ ૧૧-૨૮॥

યથા નદીનામ્ બહવઃ અમ્બુ-વેગાઃ
સમુદ્રમ્ એવ અભિમુખાઃ દ્રવન્તિ ।
તથા તવ અમી નર-લોક-વીરાઃ
વિશન્તિ વક્ત્રાણિ અભિવિજ્વલન્તિ ॥ ૧૧-૨૮॥

યથા નદીનામ્ બહવઃ અમ્બુ-વેગાઃ અભિમુખાઃ સમુદ્રમ્
એવ દ્રવન્તિ, તથા અમી નર-લોક-વીરાઃ તવ અભિવિજ્વલન્તિ વક્ત્રાણિ વિશન્તિ ।

યથા પ્રદીપ્તં જ્વલનં પતઙ્ગા
વિશન્તિ નાશાય સમૃદ્ધવેગાઃ ।
તથૈવ નાશાય વિશન્તિ લોકાસ્-
તવાપિ વક્ત્રાણિ સમૃદ્ધવેગાઃ ॥ ૧૧-૨૯॥

યથા પ્રદીપ્તમ્ જ્વલનમ્ પતઙ્ગાઃ
વિશન્તિ નાશાય સમૃદ્ધ-વેગાઃ ।
તથા એવ નાશાય વિશન્તિ લોકાઃ
તવ અપિ વક્ત્રાણિ સમૃદ્ધ-વેગાઃ ॥ ૧૧-૨૯॥

યથા પતઙ્ગાઃ સમૃદ્ધ-વેગાઃ નાશાય પ્રદીપ્તમ્ જ્વલનમ્
વિશન્તિ, તથા એવ લોકાઃ સમૃદ્ધ-વેગાઃ નાશાય તવ અપિ વક્ત્રાણિ વિશન્તિ ।

લેલિહ્યસે ગ્રસમાનઃ સમન્તાલ્-
 લોકાન્સમગ્રાન્વદનૈર્જ્વલદ્ભિઃ ।
તેજોભિરાપૂર્ય જગત્સમગ્રં
 ભાસસ્તવોગ્રાઃ પ્રતપન્તિ વિષ્ણો ॥ ૧૧-૩૦॥

લેલિહ્યસે ગ્રસમાનઃ સમન્તાત્
 લોકાન્ સમગ્રાન્ વદનૈઃ જ્વલદ્ભિઃ ।
તેજોભિઃ આપૂર્ય જગત્ સમગ્રમ્
 ભાસઃ તવ ઉગ્રાઃ પ્રતપન્તિ વિષ્ણો ॥ ૧૧-૩૦॥

હે વિષ્ણો! સમન્તાત્ જ્વલદ્ભિઃ વદનૈઃ સમગ્રાન્ લોકાન્
ગ્રસમાનઃ (ત્વં) લેલિહ્યસે, તવ ઉગ્રાઃ ભાસઃ તેજોભિઃ
સમગ્રમ્ જગત્ આપૂર્ય પ્રતપન્તિ ।

આખ્યાહિ મે કો ભવાનુગ્રરૂપો
 નમોઽસ્તુ તે દેવવર પ્રસીદ ।
વિજ્ઞાતુમિચ્છામિ ભવન્તમાદ્યં
 ન હિ પ્રજાનામિ તવ પ્રવૃત્તિમ્ ॥ ૧૧-૩૧॥

આખ્યાહિ મે કો ભવાનુગ્રરૂપો
 નમઃ અસ્તુ તે દેવવર પ્રસીદ ।
વિજ્ઞાતુમ્ ઇચ્છામિ ભવન્તમ્ આદ્યમ્
 ન હિ પ્રજાનામિ તવ પ્રવૃત્તિમ્ ॥ ૧૧-૩૧॥

હે દેવવર! તે નમઃ અસ્તુ, (ત્વં) પ્રસીદ, ભવાન્
ઉગ્ર-રૂપઃ કઃ (અસ્તિ)? (તત્) મે આખ્યાહિ । (અહં) આદ્યમ્
ભવન્તમ્ વિજ્ઞાતુમ્ ઇચ્છામિ ।
તવ પ્રવૃત્તિમ્ હિ (અહં)ન પ્રજાનામિ ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

કાલોઽસ્મિ લોકક્ષયકૃત્પ્રવૃદ્ધો

લોકાન્સમાહર્તુમિહ પ્રવૃત્તઃ ।
ઋતેઽપિ ત્વાં ન ભવિષ્યન્તિ સર્વે
યેઽવસ્થિતાઃ પ્રત્યનીકેષુ યોધાઃ ॥ ૧૧-૩૨॥

કાલઃ અસ્મિ લોક-ક્ષય-કૃત્ પ્રવૃદ્ધઃ
લોકાન્ સમાહર્તુમ્ ઇહ પ્રવૃત્તઃ ।
ઋતે અપિ ત્વામ્ ન ભવિષ્યન્તિ સર્વે
યે અવસ્થિતાઃ પ્રત્યનીકેષુ યોધાઃ ॥ ૧૧-૩૨॥

(અહં) લોક-ક્ષય-કૃત્ પ્રવૃદ્ધઃ કાલઃ અસ્મિ, ઇહ લોકાન્ સમાહર્તુમ્ પ્રવૃત્તઃ (અસ્મિ), ત્વામ્ ઋતે અપિ પ્રત્યનીકેષુ યે યોધાઃ અવસ્થિતાઃ, (તે) સર્વે ન ભવિષ્યન્તિ ।

તસ્માત્ત્વમુત્તિષ્ઠ યશો લભસ્વ
જિત્વા શત્રૂન્ ભુઙ્ક્ષ્વ રાજ્યં સમૃદ્ધમ્ ।
મયૈવૈતે નિહતાઃ પૂર્વમેવ
નિમિત્તમાત્રં ભવ સવ્યસાચિન્ ॥ ૧૧-૩૩॥

તસ્માત્ ત્વમ્ ઉત્તિષ્ઠ યશઃ લભસ્વ
જિત્વા શત્રૂન્ ભુઙ્ક્ષ્વ રાજ્યમ્ સમૃદ્ધમ્ ।
મયા એવ એતે નિહતાઃ પૂર્વમ્ એવ
નિમિત્ત-માત્રમ્ ભવ સવ્ય-સાચિન્ ॥ ૧૧-૩૩॥

તસ્માત્ હે સવ્ય-સાચિન્! ત્વમ્ ઉત્તિષ્ઠ, યશઃ લભસ્વ, શત્રૂન્ જિત્વા સમૃદ્ધમ્ રાજ્યમ્ ભુઙ્ક્ષ્વ । મયા એવ એતે પૂર્વમ્ એવ નિહતાઃ, (ત્વં) નિમિત્ત-માત્રમ્ ભવ ।

દ્રોણં ચ ભીષ્મં ચ જયદ્રથં ચ
કર્ણં તથાન્યાનપિ યોધવીરાન્ ।
મયા હતાંસ્ત્વં જહિ મા વ્યથિષ્ઠા
યુધ્યસ્વ જેતાસિ રણે સપત્નાન્ ॥ ૧૧-૩૪॥

દ્રોણમ્ ચ ભીષ્મમ્ ચ જયદ્રથમ્ ચ
કર્ણમ્ તથા અન્યાન્ અપિ યોધ-વીરાન્ ।
મયા હતાન્ ત્વમ્ જહિ મા વ્યથિષ્ઠાઃ
યુધ્યસ્વ જેતા અસિ રણે સપત્નાન્ ॥ ૧૧-૩૪॥

ત્વમ્ દ્રોણમ્ ચ ભીષ્મમ્ ચ જયદ્રથમ્ ચ કર્ણમ્ તથા
મયા હતાન્ અન્યાન્ અપિ યોધ-વીરાન્ જહિ, મા વ્યથિષ્ઠાઃ,
યુધ્યસ્વ, રણે સપત્નાન્ જેતા અસિ ।

સઞ્જય ઉવાચ ।
સઞ્જયઃ ઉવાચ ।

એતચ્છ્રુત્વા વચનં કેશવસ્ય
      કૃતાઞ્જલિર્વેપમાનઃ કિરીટી ।
નમસ્કૃત્વા ભૂય એવાહ કૃષ્ણં
      સગદ્ગદં ભીતભીતઃ પ્રણમ્ય ॥ ૧૧-૩૫॥

એતત્ શ્રુત્વા વચનમ્ કેશવસ્ય
      કૃત-અઞ્જલિઃ વેપમાનઃ કિરીટી ।
નમસ્કૃત્વા ભૂયઃ એવ આહ કૃષ્ણમ્
      સગદ્ગદમ્ ભીત-ભીતઃ પ્રણમ્ય ॥ ૧૧-૩૫॥

કેશવસ્ય એતત્ વચનમ્ શ્રુત્વા, વેપમાનઃ કિરીટી
કૃત-અઞ્જલિઃ કૃષ્ણમ્ નમઃ કૃત્વા, ભીત-ભીતઃ પ્રણમ્ય
(ચ) ભૂયઃ એવ સગદ્ગદમ્ આહ ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

સ્થાને હૃષીકેશ તવ પ્રકીર્ત્યા
      જગત્પ્રહૃષ્યત્યનુરજ્યતે ચ ।
રક્ષાંસિ ભીતાનિ દિશો દ્રવન્તિ
      સર્વે નમસ્યન્તિ ચ સિદ્ધસઙ્ઘાઃ ॥ ૧૧-૩૬॥

સ્થાને હૃષીકેશ તવ પ્રકીર્ત્યા
      જગત્ પ્રહૃષ્યતિ અનુરજ્યતે ચ ।
રક્ષાંસિ ભીતાનિ દિશઃ દ્રવન્તિ
      સર્વે નમસ્યન્તિ ચ સિદ્ધ-સઙ્ઘાઃ ॥ ૧૧-૩૬॥

હે હૃષીકેશ! સ્થાને, તવ પ્રકીર્ત્યા જગત્ પ્રહૃષ્યતિ,
અનુરજ્યતે ચ, ભીતાનિ રક્ષાંસિ દિશઃ દ્રવન્તિ, સર્વે ચ
સિદ્ધ-સઙ્ઘાઃ નમસ્યન્તિ ।

કસ્માચ્ચ તે ન નમેરન્મહાત્મન્
    ગરીયસે બ્રહ્મણોઽપ્યાદિકર્ત્રે ।
અનન્ત દેવેશ જગન્નિવાસ
    ત્વમક્ષરં સદસત્તત્પરં યત્ ॥ ૧૧-૩૭॥

કસ્માત્ ચ તે ન નમેરન્ મહાત્મન્
    ગરીયસે બ્રહ્મણઃ અપિ આદિ-કર્ત્રે ।
અનન્ત દેવેશ જગત્ નિવાસ
    ત્વમ્ અક્ષરમ્ સત્ અસત્ તત્ પરં યત્ ॥ ૧૧-૩૭॥

હે મહાત્મન્! અનન્ત, દેવેશ! બ્રહ્મણઃ અપિ
ગરીયસે આદિ-કર્ત્રે(તુભ્યં) તે કસ્માત્ ચ ન નમેરન્,
હે જગત્-નિવાસ! યત્ સત્ અસત્ (અસ્તિ) તત્ પરં અક્ષરમ્ ત્વમ્

ત્વમાદિદેવઃ પુરુષઃ પુરાણસ્-
    ત્વમસ્ય વિશ્વસ્ય પરં નિધાનમ્ ।
વેત્તાસિ વેદ્યં ચ પરં ચ ધામ
    ત્વયા તતં વિશ્વમનન્તરૂપ ॥ ૧૧-૩૮॥

ત્વમ્ આદિદેવઃ પુરુષઃ પુરાણઃ
    ત્વમ્ અસ્ય વિશ્વસ્ય પરમ્ નિધાનમ્ ।
વેત્તા અસિ વેદ્યમ્ ચ પરમ્ ચ ધામ
    ત્વયા તતમ્ વિશ્વમ્ અનન્ત-રૂપ ॥ ૧૧-૩૮॥

ત્વમ્ આદિદેવઃ, પુરાણઃ પુરુષઃ, ત્વમ્ અસ્ય વિશ્વસ્ય પરમ્
નિધાનમ્, (ત્વમ્) વેત્તા ચ વેદ્યમ્। પરમ્ ધામ હ્ ચાસિ ।
હે અનન્ત-રૂપ! ત્વયા વિશ્વમ્ તતમ્ ।

વાયુર્યમોઽગ્નિર્વરુણઃ શશાઙ્કઃ
    પ્રજાપતિસ્ત્વં પ્રપિતામહશ્ચ ।
નમો નમસ્તેઽસ્તુ સહસ્રકૃત્વઃ
    પુનશ્ચ ભૂયોઽપિ નમો નમસ્તે ॥ ૧૧-૩૯॥

વાયુઃ યમઃ અગ્નિઃ વરુણઃ શશાઙ્કઃ
    પ્રજાપતિઃ ત્વમ્ પ્રપિતામહઃ ચ ।
નમઃ નમઃ તે અસ્તુ સહસ્ર-કૃત્વઃ
    પુનઃ ચ ભૂયઃ અપિ નમઃ નમઃ તે ॥ ૧૧-૩૯॥

ત્વમ્ વાયુઃ યમઃ અગ્નિઃ વરુણઃ શશાङ्कઃ પ્રજાપતિઃ ચ
પ્રપિતામહઃ (અસિ) તે સહસ્ર-કૃત્વઃ, નમઃ નમઃ,
પુનઃ ચ ભૂયઃ અપિ તે નમઃ નમઃ અસ્તુ ।

નમઃ પુરસ્તાદથ પૃષ્ઠતસ્તે
	નમોઽસ્તુ તે સર્વત એવ સર્વ ।
અનન્તવીર્યામિતવિક્રમસ્ત્વં
	સર્વં સમાપ્નોષિ તતોઽસિ સર્વઃ ॥ ૧૧-૪૦॥

નમઃ પુરસ્તાત્ અથ પૃષ્ઠતઃ તે
	નમઃ અસ્તુ તે સર્વતઃ એવ સર્વ ।
અનન્ત-વીર્ય-અમિત-વિક્રમઃ ત્વમ્
	સર્વમ્ સમાપ્નોષિ તતઃ અસિ સર્વઃ ॥ ૧૧-૪૦॥

હે સર્વ! તે પુરસ્તાત્ નમઃ, અથ તે પૃષ્ઠતઃ નમઃ,
(તે) સર્વતઃ એવ (નમઃ અસ્તુ), હે અનન્ત-વીર્ય! ત્વમ્-અમિત-વિક્રમઃ
સર્વમ્ સમાપ્નોષિ તતઃ સર્વઃ અસિ ।

સખેતિ મત્વા પ્રસભં યદુક્તં
	હે કૃષ્ણ હે યાદવ હે સખેતિ ।
અજાનતા મહિમાનં તવેદં
	મયા પ્રમાદાત્પ્રણયેન વાપિ ॥ ૧૧-૪૧॥

યચ્ચાવહાસાર્થમસત્કૃતોઽસિ
	વિહારશય્યાસનભોજનેષુ ।
એકોઽથવાપ્યચ્યુત તત્સમક્ષં
	તત્ક્ષામયે ત્વામહમપ્રમેયમ્ ॥ ૧૧-૪૨॥

સખા ઇતિ મત્વા પ્રસભમ્ યત્ ઉક્તમ્
	હે કૃષ્ણ હે યાદવ હે સખા ઇતિ ।
અજાનતા મહિમાનમ્ તવ ઇદમ્
	મયા પ્રમાદાત્ પ્રણયેન વા અપિ ॥ ૧૧-૪૧॥

યત્ ચ અવહાસાર્થમ્ અસત્ કૃતઃ અસિ
	વિહાર-શય્યા-આસન-ભોજનેષુ ।
એકઃ અથવા અપિ અચ્યુત તત્ સમક્ષમ્

તત્ ક્ષામયે ત્વામ્ અહમ્ અપ્રમેયમ્ ॥ ૧૧-૪૨॥

તવ ઇદમ્ મહિમાનમ્ અજાનતા મયા સખા ઇતિ મત્વા, ' હે કૃષ્ણ!
હે યાદવ, હે સખા! ' ઇતિ પ્રમાદાત્ પ્રણયેન વા અપિ પ્રસભમ્
યત્ ઉક્તમ્; હે અચ્યુત! યત્ ચ વિહાર-શય્યા-આસન-ભોજનેષુ,
અવહાસાર્થમ્ એકઃ અથવા તત્ સમક્ષમ્ અપિ, અસત્ કૃતઃ
અસિ તત્ અહમ્ અપ્રમેયમ્ ત્વામ્ ક્ષામયે ।

પિતાસિ લોકસ્ય ચરાચરસ્ય
ત્વમસ્ય પૂજ્યશ્ચ ગુરુર્ગરીયાન્ ।
ન ત્વત્સમોઽસ્ત્યભ્યધિકઃ કુતોઽન્યો
લોકત્રયેઽપ્યપ્રતિમપ્રભાવ ॥ ૧૧-૪૩॥

પિતા અસિ લોકસ્ય ચર-અચરસ્ય
ત્વમ્ અસ્ય પૂજ્યઃ ચ ગુરુઃ ગરીયાન્ ।
ન ત્વત્ સમઃ અસ્તિ અભ્યધિકઃ કુતઃ અન્યઃ
લોક-ત્રયે અપિ અપ્રતિમ-પ્રભાવ ॥ ૧૧-૪૩॥

હે અપ્રતિમ-પ્રભાવ! ત્વમ્ અસ્ય ચર-અચરસ્ય લોકસ્ય પિતા,
ગરીયાન્ પૂજ્યઃ ગુરુઃ ચ અસિ, લોક-ત્રયે અપિ ત્વત્ સમઃ ન અસ્તિ,
કુતઃ અભ્યધિકઃ અન્યઃ?

તસ્માત્પ્રણમ્ય પ્રણિધાય કાયં
પ્રસાદયે ત્વામહમીશમીડ્યમ્ ।
પિતેવ પુત્રસ્ય સખેવ સખ્યુઃ
પ્રિયઃ પ્રિયાયાર્હસિ દેવ સોઢુમ્ ॥ ૧૧-૪૪॥

તસ્માત્ પ્રણમ્ય પ્રણિધાય કાયમ્
પ્રસાદયે ત્વામ્ અહમ્ ઈશમ્ ઈડ્યમ્ ।
પિતા ઇવ પુત્રસ્ય સખા ઇવ સખ્યુઃ
પ્રિયઃ પ્રિયાયાઃ અર્હસિ દેવ સોઢુમ્ ॥ ૧૧-૪૪॥

હે દેવ! તસ્માત્ કાયમ્ પ્રણિધાય, પ્રણમ્ય, અહમ્ ઈડ્યમ્
ઈશમ્ ત્વામ્ પ્રસાદયે, પુત્રસ્ય (અપરાધં) પિતા ઇવ,
સખ્યુઃ (અપરાધં) સખા , પ્રિયાયાઃ (અપરાધં) પ્રિયઃ (ઇવ)
(મમ અપરાધાન્) સોઢુમ્ અર્હસિ ।

અદૃષ્ટપૂર્વં હૃષિતોઽસ્મિ દૃષ્ટ્વા
    ભયેન ચ પ્રવ્યથિતં મનો મે ।
તદેવ મે દર્શય દેવ રૂપં
    પ્રસીદ દેવેશ જગન્નિવાસ ॥ ૧૧-૪૫ ॥

અદૃષ્ટ-પૂર્વમ્ હૃષિતઃ અસ્મિ દૃષ્ટ્વા
    ભયેન ચ પ્રવ્યથિતમ્ મનઃ મે ।
તત્ એવ મે દર્શય દેવ રૂપમ્
    પ્રસીદ દેવેશ જગત્-નિવાસ ॥ ૧૧-૪૫ ॥

હે દેવેશ! હે જગત્-નિવાસ! અદૃષ્ટ-પૂર્વમ્ (વિશ્વરૂપં ત્વાં)
દૃષ્ટ્વા (અહં) હૃષિતઃ અસ્મિ, મે મનઃ ભયેન પ્રવ્યથિતમ્ (અસ્તિ, અતઃ)
હે દેવ! (ત્વં) પ્રસીદ ચ તત્ એવ (પૂર્વં) રૂપમ્ મે દર્શય ।

કિરીટિનં ગદિનં ચક્રહસ્તં
    ઇચ્છામિ ત્વાં દ્રષ્ટુમહં તથૈવ ।
તેનૈવ રૂપેણ ચતુર્ભુજેન
    સહસ્રબાહો ભવ વિશ્વમૂર્તે ॥ ૧૧-૪૬ ॥

કિરીટિનમ્ ગદિનમ્ ચક્ર-હસ્તમ્
    ઇચ્છામિ ત્વામ્ દ્રષ્ટુમ્ અહમ્ તથા એવ ।
તેન એવ રૂપેણ ચતુઃ-ભુજેન
    સહસ્ર-બાહો ભવ વિશ્વ-મૂર્તે ॥ ૧૧-૪૬ ॥

હે સહસ્ર-બાહો! હે વિશ્વ-મૂર્તે! અહમ્ ત્વામ્ કિરીટિનમ્
ગદિનમ્ (ચ) તથા એવ ચક્ર-હસ્તમ્ દ્રષ્ટુમ્ ઇચ્છામિ,
(તસ્માત્) તેન એવ ચતુઃ-ભુજેન રૂપેણ (યુક્તઃ) ભવ ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

મયા પ્રસન્નેન તવાર્જુનેદં
    રૂપં પરં દર્શિતમાત્મયોગાત્ ।
તેજોમયં વિશ્વમનન્તમાદ્યં
    યન્મે ત્વદન્યેન ન દૃષ્ટપૂર્વમ્ ॥ ૧૧-૪૭ ॥

મયા પ્રસન્નેન તવ અર્જુન ઇદમ્

રૂપમ્ પરમ્ દર્શિતમ્ આત્મ-યોગાત્ ।
તેજોમયમ્ વિશ્વમ્ અનન્તમ્ આદ્યમ્
યત્ મે ત્વત્ અન્યેન ન દૃષ્ટ-પૂર્વમ્ ॥ ૧૧-૪૭॥

હે અર્જુન! યત્ ત્વત્ અન્યેન દૃષ્ટ-પૂર્વમ્ ન, (તત્) ઇદમ્ મે
તેજોમયમ્ વિશ્વમ્ અનન્તમ્ આદ્યમ્ પરમ્ રૂપમ્ પ્રસન્નેન
મયા આત્મ-યોગાત્ તવ દર્શિતમ્ ।

ન વેદયજ્ઞાધ્યયનૈર્ન દાનૈર્-
ન ચ ક્રિયાભિર્ન તપોભિરુગ્રૈઃ ।
એવં રૂપઃ શક્ય અહં નૃલોકે
દ્રષ્ટું ત્વદન્યેન કુરુપ્રવીર ॥ ૧૧-૪૮॥

ન વેદ-યજ્ઞ-અધ્યયનૈઃ ન દાનૈઃ
ન ચ ક્રિયાભિઃ ન તપોભિઃ ઉગ્રૈઃ ।
એવમ્ રૂપઃ શક્યઃ અહમ્ નૃ-લોકે
દ્રષ્ટુમ્ ત્વત્ અન્યેન કુરુ-પ્રવીર ॥ ૧૧-૪૮॥

હે કુરુ-પ્રવીર! અહમ્ એવમ્ રૂપઃ નૃ-લોકે ન વેદ-યજ્ઞ-અધ્યયનૈઃ
ન, દાનૈઃ ન, ક્રિયાભિઃ ન, ઉગ્રૈઃ તપોભિઃ ચન ત્વત્ અન્યેન દ્રષ્ટુમ્ શક્યઃ ।

મા તે વ્યથા મા ચ વિમૂઢભાવો
દૃષ્ટ્વા રૂપં ઘોરમીદૃઙ્મમેદમ્ ।
વ્યપેતભીઃ પ્રીતમનાઃ પુનસ્ત્વં
તદેવ મે રૂપમિદં પ્રપશ્ય ॥ ૧૧-૪૯॥

મા તે વ્યથા મા ચ વિમૂઢ-ભાવઃ
દૃષ્ટ્વા રૂપમ્ ઘોરમ્ ઈદૃક્ મમ ઇદમ્ ।
વ્યપેત-ભીઃ પ્રીત-મનાઃ પુનઃ ત્વમ્
તત્ એવ મે રૂપમ્ ઇદમ્ પ્રપશ્ય ॥ ૧૧-૪૯॥

મમ ઇદમ્ ઈદૃક્ ઘોરમ્ રૂપમ્ દૃષ્ટ્વા તે વ્યથા મા
(અસ્તુ) , વિમૂઢ-ભાવઃ ચ મા (અસ્તુ) । ત્વમ્ વ્યપેત-ભીઃ
પ્રીત-મનાઃ (ભૂત્વા) પુનઃ તત્ એવ ઇદમ્ મે રૂપમ્ પ્રપશ્ય ।

સઞ્જય ઉવાચ ।
સઞ્જયઃ ઉવાચ ।

ઇત્યર્જુનં વાસુદેવસ્તથોક્ત્વા
        સ્વકં રૂપં દર્શયામાસ ભૂયઃ ।
આશ્વાસયામાસ ચ ભીતમેનં
        ભૂત્વા પુનઃ સૌમ્યવપુર્મહાત્મા ॥ ૧૧-૫૦॥

ઇતિ અર્જુનમ્ વાસુદેવઃ તથા ઉક્ત્વા
        સ્વકમ્ રૂપમ્ દર્શયામાસ ભૂયઃ ।
આશ્વાસયામાસ ચ ભીતમ્ એનમ્
        ભૂત્વા પુનઃ સૌમ્ય-વપુઃ મહાત્મા ॥ ૧૧-૫૦॥

મહાત્મા વાસુદેવઃ ઇતિ તથા અર્જુનમ્ ઉક્ત્વા ભૂયઃ સ્વકમ્
રૂપમ્ દર્શયામાસ । પુનઃ ચ સૌમ્ય-વપુઃ ભૂત્વા, ભીતમ્
એનમ્ આશ્વાસયામાસ ।

અર્જુન ઉવાચ
અર્જુનઃ ઉવાચ ।

દૃષ્ટ્વેદં માનુષં રૂપં તવ સૌમ્યં જનાર્દન ।
ઇદાનીમસ્મિ સંવૃત્તઃ સચેતાઃ પ્રકૃતિં ગતઃ ॥ ૧૧-૫૧॥

દૃષ્ટ્વા ઇદમ્ માનુષમ્ રૂપમ્ તવ સૌમ્યમ્ જનાર્દન ।
ઇદાનીમ્ અસ્મિ સંવૃત્તઃ સચેતાઃ પ્રકૃતિમ્ ગતઃ ॥ ૧૧-૫૧॥

હે જનાર્દન! તવ ઇદમ્ માનુષમ્ સૌમ્યમ્ રૂપમ્ દૃષ્ટ્વા
(અહં) ઇદાનીમ્ સચેતાઃ સંવૃત્તઃ અસ્મિ પ્રકૃતિમ્ ગતઃ (અસ્મિ) ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

સુદુર્દર્શમિદં રૂપં દૃષ્ટવાનસિ યન્મમ ।
દેવા અપ્યસ્ય રૂપસ્ય નિત્યં દર્શનકાઙ્ક્ષિણઃ ॥ ૧૧-૫૨॥

સુદુર્દર્શમ્ ઇદમ્ રૂપમ્ દૃષ્ટવાન્ અસિ યત્ મમ ।
દેવાઃ અપિ અસ્ય રૂપસ્ય નિત્યમ્ દર્શન-કાઙ્ક્ષિણઃ ॥ ૧૧-૫૨॥

યત્ મમ સુદુર્દર્શમ્ ઇદમ્ રૂપમ્ દૃષ્ટવાન્ અસિ, અસ્ય
રૂપસ્ય દેવાઃ અપિ નિત્યમ્ દર્શન-કાઙ્ક્ષિણઃ (સન્તિ)।

નાહં વેદૈર્ન તપસા ન દાનેન ન ચેજ્યયા ।

શક્ય એવંવિધો દ્રષ્ટું દૃષ્ટવાનસિ માં યથા ॥ ૧૧-૫૩॥

ન અહમ્ વેદૈઃ ન તપસા ન દાનેન ન ચ ઇજ્યયા ।
શક્યઃ એવમ્-વિધઃ દ્રષ્ટુમ્ દૃષ્ટવાન્ અસિ મામ્ યથા ॥ ૧૧-૫૩॥

(ત્વં) યથા મામ્ દૃષ્ટવાન્ અસિ, એવમ્-વિધઃ અહમ્ ન વેદૈઃ,
ન તપસા, ન દાનેન, ન ચ ઇજ્યયા દ્રષ્ટુમ્ શક્યઃ (અસ્મિ)।

ભક્ત્યા ત્વનન્યયા શક્ય અહમેવંવિધોઽર્જુન ।
જ્ઞાતું દ્રષ્ટું ચ તત્ત્વેન પ્રવેષ્ટું ચ પરન્તપ ॥ ૧૧-૫૪॥

ભક્ત્યા તુ અનન્યયા શક્યઃ અહમ્ એવમ્-વિધઃ અર્જુન ।
જ્ઞાતુમ્ દ્રષ્ટુમ્ ચ તત્ત્વેન પ્રવેષ્ટુમ્ ચ પરન્તપ ॥ ૧૧-૫૪॥

હે પરન્તપ અર્જુન! અહમ્ એવમ્-વિધઃ તત્ત્વેન જ્ઞાતુમ્ ચ
દ્રષ્ટુમ્ પ્રવેષ્ટુમ્ ચ અનન્યયા ભક્ત્યા તુ શક્યઃ ।

મત્કર્મકૃન્મત્પરમો મદ્ભક્તઃ સઙ્ગવર્જિતઃ ।
નિર્વૈરઃ સર્વભૂતેષુ યઃ સ મામેતિ પાણ્ડવ ॥ ૧૧-૫૫॥

મત્-કર્મ-કૃત્ મત્-પરમઃ મત્-ભક્તઃ સઙ્ગ-વર્જિતઃ ।
નિર્વૈરઃ સર્વ-ભૂતેષુ યઃ સઃ મામ્ એતિ પાણ્ડવ ॥ ૧૧-૫૫॥

હે પાણ્ડવ! યઃ મત્-કર્મ-કૃત્, મત્-પરમઃ,
સઙ્ગ-વર્જિતઃ સર્વ-ભૂતેષુ નિર્વૈરઃ મત્-ભક્તઃ (અસ્તિ),
સઃ મામ્ એતિ ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
વિશ્વરૂપદર્શનયોગો નામૈકાદશોઽધ્યાયઃ ॥ ૧૧॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદે
વિશ્વ-રૂપ-દર્શન-યોગઃ નામ એકાદશઃ અધ્યાયઃ ॥ ૧૧॥

---

અથ દ્વાદશોઽધ્યાયઃ । ભક્તિયોગઃ ।

અથ દ્વાદશઃ અધ્યાયઃ । ભક્તિ-યોગઃ ।

અર્જુન ઉવાચ ।

અર્જુનઃ ઉવાચ ।

એવં સતતયુક્તા યે ભક્તાસ્ત્વાં પર્યુપાસતે ।
યે ચાપ્યક્ષરમવ્યક્તં તેષાં કે યોગવિત્તમાઃ ॥ ૧૨-૧॥

એવમ્ સતત-યુક્તાઃ યે ભક્તાઃ ત્વામ્ પર્યુપાસતે ।
યે ચ અપિ અક્ષરમ્ અવ્યક્તમ્ તેષામ્ કે યોગ-વિત્તમાઃ ॥ ૧૨-૧॥

(હે ભગવન્) એવમ્ સતત-યુક્તાઃ યે ભક્તાઃ ત્વામ્ પર્યુપાસતે,
યે ચ અપિ અવ્યક્તમ્ અક્ષરમ્ (પર્યુપાસતે) તેષામ્ (મધ્યે)
કે યોગ-વિત્તમાઃ (સન્તિ) ?

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

મય્યાવેશ્ય મનો યે માં નિત્યયુક્તા ઉપાસતે ।
શ્રદ્ધયા પરયોપેતાઃ તે મે યુક્તતમા મતાઃ ॥ ૧૨-૨॥

મયિ આવેશ્ય મનઃ યે મામ્ નિત્ય-યુક્તાઃ ઉપાસતે ।
શ્રદ્ધયા પરયા ઉપેતાઃ તે મે યુક્તતમાઃ મતાઃ ॥ ૧૨-૨॥

(હે અર્જુન!) મયિ મનઃ આવેશ્ય નિત્ય-યુક્તાઃ (સન્તઃ) યે પરયા
શ્રદ્ધયા ઉપેતાઃ મામ્ ઉપાસતે, તે યુક્તતમાઃ મે મતાઃ ।

યે ત્વક્ષરમનિર્દેશ્યમવ્યક્તં પર્યુપાસતે ।
સર્વત્રગમચિન્ત્યં ચ કૂટસ્થમચલં ધ્રુવમ્ ॥ ૧૨-૩॥

સન્નિયમ્યેન્દ્રિયગ્રામં સર્વત્ર સમબુદ્ધયઃ ।
તે પ્રાપ્નુવન્તિ મામેવ સર્વભૂતહિતે રતાઃ ॥ ૧૨-૪॥

યે તુ અક્ષરમ્ અનિર્દેશ્યમ્ અવ્યક્તમ્ પર્યુપાસતે ।
સર્વત્રગમ્ અચિન્ત્યમ્ ચ કૂટસ્થમ્ અચલમ્ ધ્રુવમ્ ॥ ૧૨-૩॥

સન્નિયમ્ય ઇન્દ્રિય-ગ્રામમ્ સર્વત્ર સમ-બુદ્ધયઃ ।
તે પ્રાપ્નુવન્તિ મામ્ એવ સર્વ-ભૂત-હિતે રતાઃ ॥ ૧૨-૪॥

યે તુ સર્વ-ભૂત-હિતે રતાઃ સર્વત્ર સમ-બુદ્ધયઃ (સન્તઃ)
ઇન્દ્રિય-ગ્રામમ્ સંનિયમ્ય, અવ્યક્તમ્, અચિન્ત્યમ્, અનિર્દેશ્યમ્,
સર્વત્રગમ્, કૂટસ્થમ્, અચલમ્, ધ્રુવમ્ અક્ષરમ્ ચ
પર્યુપાસતે તે મામ્ એવ પ્રાપ્નુવન્તિ ।

ક્લેશોઽધિકતરસ્તેષામવ્યક્તાસક્તચેતસામ્ ॥
અવ્યક્તા હિ ગતિર્દુઃખં દેહવદ્ભિરવાપ્યતે ॥ ૧૨-૫॥

ક્લેશઃ અધિકતરઃ તેષામ્ અવ્યક્ત-આસક્ત-ચેતસામ્ ॥
અવ્યક્તા હિ ગતિઃ દુઃખમ્ દેહવદ્ભિઃ અવાપ્યતે ॥ ૧૨-૫॥

અવ્યક્ત-આસક્ત-ચેતસામ્ તેષામ્ અધિકતરઃ ક્લેશઃ (અસ્તિ તૈઃ)
દેહવદ્ભિઃ અવ્યક્તા ગતિઃ દુઃખમ્ અવાપ્યતે હિ ।

યે તુ સર્વાણિ કર્માણિ મયિ સંન્યસ્ય મત્પરઃ ।
અનન્યેનૈવ યોગેન માં ધ્યાયન્ત ઉપાસતે ॥ ૧૨-૬॥

યે તુ સર્વાણિ કર્માણિ મયિ સંન્યસ્ય મત્-પરાઃ ।
અનન્યેન એવ યોગેન મામ્ ધ્યાયન્તઃ ઉપાસતે ॥ ૧૨-૬॥

યે તુ મત્-પરાઃ (સન્તઃ), સર્વાણિ કર્માણિ મયિ સંન્યસ્ય,
મામ્ ધ્યાયન્તઃ અનન્યેન યોગેન એવ ઉપાસતે,

તેષામહં સમુદ્ધર્તા મૃત્યુસંસારસાગરાત્ ।
ભવામિ ન ચિરાત્પાર્થ મય્યાવેશિતચેતસામ્ ॥ ૧૨-૭॥

તેષામ્ અહમ્ સમુદ્ધર્તા મૃત્યુ-સંસાર-સાગરાત્ ।
ભવામિ ન ચિરાત્ પાર્થ મયિ આવેશિત-ચેતસામ્ ॥ ૧૨-૭॥

હે પાર્થ! મયિ આવેશિત-ચેતસામ્ તેષામ્ મૃત્યુ-સંસાર-સાગરાત્
ન ચિરાત્ અહમ્ સમુદ્ધર્તા ભવામિ ।

મય્યેવ મન આધત્સ્વ મયિ બુદ્ધિં નિવેશય ।
નિવસિષ્યસિ મય્યેવ અત ઊર્ધ્વં ન સંશયઃ ॥ ૧૨-૮॥

મયિ એવ મનઃ આધત્સ્વ મયિ બુદ્ધિમ્ નિવેશય ।
નિવસિષ્યસિ મયિ એવ અતઃ ઊર્ધ્વમ્ ન સંશયઃ ॥ ૧૨-૮॥

મયિ એવ મનઃ આધત્સ્વ, મયિ બુદ્ધિમ્ નિવેશય, અતઃ ઊર્ધ્વમ્
મયિ એવ નિવસિષ્યસિ, (અત્ર) સંશયઃ ન ।

અથ ચિત્તં સમાધાતું ન શક્નોષિ મયિ સ્થિરમ્ ।
અભ્યાસયોગેન તતો મામિચ્છાપ્તું ધનઞ્જય ॥ ૧૨-૯॥

અથ ચિત્તમ્ સમાધાતુમ્ ન શક્નોષિ મયિ સ્થિરમ્ ।

અભ્યાસ-યોગેન તતઃ મામ્ ઇચ્છ આપ્તુમ્ ધનઞ્જય ॥ ૧૨-૯॥

હે ધનઞ્જય! અથ મયિ સ્થિરમ્ ચિત્તમ્ સમાધાતુમ્ ન શક્નોષિ,
તતઃ અભ્યાસ-યોગેન મામ્ આપ્તુમ્ ઇચ્છ ।

અભ્યાસેઽપ્યસમર્થોઽસિ મત્કર્મપરમો ભવ ।
મદર્થમપિ કર્માણિ કુર્વન્સિદ્ધિમવાપ્સ્યસિ ॥ ૧૨-૧૦॥

અભ્યાસે અપિ અસમર્થઃ અસિ મત્-કર્મ-પરમઃ ભવ ।
મત્-અર્થમ્ અપિ કર્માણિ કુર્વન્ સિદ્ધિમ્ અવાપ્સ્યસિ ॥ ૧૨-૧૦॥

(ત્વં) અભ્યાસે અપિ અસમર્થઃ અસિ (ચેત્), મત્-કર્મ-પરમઃ ભવ,
મત્-અર્થમ્ કર્માણિ કુર્વન્ અપિ સિદ્ધિમ્ અવાપ્સ્યસિ ।

અથૈતદપ્યશક્તોઽસિ કર્તું મદ્યોગમાશ્રિતઃ ।
સર્વકર્મફલત્યાગં તતઃ કુરુ યતાત્મવાન્ ॥ ૧૨-૧૧॥

અથ એતત્ અપિ અશક્તઃ અસિ કર્તુમ્ મત્-યોગમ્ આશ્રિતઃ ।
સર્વ-કર્મ-ફલ-ત્યાગમ્ તતઃ કુરુ યત-આત્મવાન્ ॥ ૧૨-૧૧॥

અથ એતત્ અપિ કર્તુમ્ અશક્તઃ અસિ (ચેત્), તતઃ
યત-આત્મવાન્ મત્-યોગમ્ આશ્રિતઃ (સન્)
સર્વ-કર્મ-ફલ-ત્યાગમ્ કુરુ ।

શ્રેયો હિ જ્ઞાનમભ્યાસાજ્જ્ઞાનાદ્ધ્યાનં વિશિષ્યતે ।
ધ્યાનાત્કર્મફલત્યાગસ્ત્યાગાચ્છાન્તિરનન્તરમ્ ॥ ૧૨-૧૨॥

શ્રેયઃ હિ જ્ઞાનમ્ અભ્યાસાત્ જ્ઞાનાત્ ધ્યાનમ્ વિશિષ્યતે ।
ધ્યાનાત્ કર્મ-ફલ-ત્યાગઃ ત્યાગાત્ શાન્તિઃ અનન્તરમ્ ॥ ૧૨-૧૨॥

અભ્યાસાત્ જ્ઞાનમ્ હિ શ્રેયઃ (અસ્તિ) જ્ઞાનાત્ ધ્યાનમ્ વિશિષ્યતે;
ધ્યાનાત્ કર્મ-ફલ-ત્યાગઃ (વિશિષ્યતે); અનન્તરમ્ ત્યાગાત્
શાન્તિઃ (ભવતિ) હિ ।

અદ્વેષ્ટા સર્વભૂતાનાં મૈત્રઃ કરુણ એવ ચ ।
નિર્મમો નિરહઙ્કારઃ સમદુઃખસુખઃ ક્ષમી ॥ ૧૨-૧૩॥

સન્તુષ્ટઃ સતતં યોગી યતાત્મા દૃઢનિશ્ચયઃ ।
મય્યર્પિતમનોબુદ્ધિર્યો મદ્ભક્તઃ સ મે પ્રિયઃ ॥ ૧૨-૧૪॥

અદ્વેષ્ટા સર્વ-ભૂતાનાં મૈત્રઃ કરુણઃ એવ ચ ।

નિર્મમઃ નિરહઙ્કારઃ સમ-દુઃખ-સુખઃ ક્ષમી ॥ ૧૨-૧૩॥

સન્તુષ્ટઃ સતતમ્ યોગી યત-આત્મા દૃઢ-નિશ્ચયઃ ।
મયિ અર્પિત-મનઃ-બુદ્ધિઃ યઃ મત્-ભક્તઃ સઃ મે પ્રિયઃ ॥ ૧૨-૧૪॥

યઃ સર્વ-ભૂતાનાં અદ્વેષ્ટા, મૈત્રઃ, કરુણઃ ચ એવ, નિર્મમઃ,
નિરહઙ્કારઃ, સમ-દુઃખ-સુખઃ ક્ષમી, સતતમ્ સન્તુષ્ટઃ,
યોગી, યત-આત્મા, દૃઢ-નિશ્ચયઃ,મયિ અર્પિત-મનઃ-બુદ્ધિઃ,
સઃ મત્-ભક્તઃ મે પ્રિયઃ (અસ્તિ)।

યસ્માન્નોદ્વિજતે લોકો લોકાન્નોદ્વિજતે ચ યઃ ।
હર્ષામર્ષભયોદ્વેગૈર્મુક્તો યઃ સ ચ મે પ્રિયઃ ॥ ૧૨-૧૫॥

યસ્માત્ ન ઉદ્વિજતે લોકઃ લોકાત્ ન ઉદ્વિજતે ચ યઃ ।
હર્ષ-આમર્ષ-ભય-ઉદ્વેગૈઃ મુક્તઃ યઃ સઃ ચ મે પ્રિયઃ ॥ ૧૨-૧૫॥

લોકઃ યસ્માત્ ન ઉદ્વિજતે, યઃ ચ લોકાત્ ન ઉદ્વિજતે, યઃ ચ
હર્ષ-આમર્ષ-ભય-ઉદ્વેગૈઃ મુક્તઃ, સઃ મે પ્રિયઃ (અસ્તિ)।

અનપેક્ષઃ શુચિર્દક્ષ ઉદાસીનો ગતવ્યથઃ ।
સર્વારમ્ભપરિત્યાગી યો મદ્ભક્તઃ સ મે પ્રિયઃ ॥ ૧૨-૧૬॥

અનપેક્ષઃ શુચિઃ દક્ષઃ ઉદાસીનઃ ગત-વ્યથઃ ।
સર્વ-આરમ્ભ-પરિત્યાગી યઃ મત્-ભક્તઃ સઃ મે પ્રિયઃ ॥ ૧૨-૧૬॥

યઃ મત્-ભક્તઃ અનપેક્ષઃ, શુચિઃ, દક્ષઃ, ઉદાસીનઃ,
ગત-વ્યથઃ, સર્વ-આરમ્ભ-પરિત્યાગી, સઃ મે પ્રિયઃ ।

યો ન હૃષ્યતિ ન દ્વેષ્ટિ ન શોચતિ ન કાઙ્ક્ષતિ ।
શુભાશુભપરિત્યાગી ભક્તિમાન્યઃ સ મે પ્રિયઃ ॥ ૧૨-૧૭॥

યઃ ન હૃષ્યતિ ન દ્વેષ્ટિ ન શોચતિ ન કાઙ્ક્ષતિ ।
શુભ-અશુભ-પરિત્યાગી ભક્તિમાન્ યઃ સઃ મે પ્રિયઃ ॥ ૧૨-૧૭॥

યઃ ન હૃષ્યતિ, ન દ્વેષ્ટિ, ન શોચતિ, ન કાઙ્ક્ષતિ,
યઃ શુભ-અશુભ-પરિત્યાગી, ભક્તિમાન્ (અસ્તિ), સઃ મે પ્રિયઃ (ભવતિ) ।

સમઃ શત્રૌ ચ મિત્રે ચ તથા માનાપમાનયોઃ ।
શીતોષ્ણસુખદુઃખેષુ સમઃ સઙ્ગવિવર્જિતઃ ॥ ૧૨-૧૮॥

તુલ્યનિન્દાસ્તુતિર્મૌની સન્તુષ્ટો યેન કેનચિત્ ।

અનિકેતઃ સ્થિરમતિર્ભક્તિમાન્મે પ્રિયો નરઃ ॥ ૧૨-૧૯॥

સમઃ શત્રૌ ચ મિત્રે ચ તથા માન-અપમાનયોઃ ।
શીત-ઉષ્ણ-સુખ-દુઃખેષુ સમઃ સઙ્ગ-વિવર્જિતઃ ॥ ૧૨-૧૮॥

તુલ્ય-નિન્દા-સ્તુતિઃ મૌની સન્તુષ્ટઃ યેન કેનચિત્ ।
અનિકેતઃ સ્થિર-મતિઃ ભક્તિમાન્ મે પ્રિયઃ નરઃ ॥ ૧૨-૧૯॥

(યઃ) શત્રૌ મિત્રે ચ તથા માન-અપમાનયોઃ સમઃ,
શીત-ઉષ્ણ-સુખ-દુઃખેષુ સમઃ, સઙ્ગ-વિવર્જિતઃ ચ (અસ્તિ)
તુલ્ય-નિન્દા-સ્તુતિઃ, મૌની, (યઃ) યેન કેનચિત્ સન્તુષ્ટઃ,
(ભવતિ) અનિકેતઃ, સ્થિર-મતિઃ, ભક્તિમાન્ (સઃ) નરઃ મે પ્રિયઃ ।

યે તુ ધર્મ્યામૃતમિદં યથોક્તં પર્યુપાસતે ।
શ્રદ્દધાના મત્પરમા ભક્તાસ્તેઽતીવ મે પ્રિયાઃ ॥ ૧૨-૨૦॥

યે તુ ધર્મ્ય-અમૃતમ્ ઇદમ્ યથા ઉક્તમ્ પર્યુપાસતે ।
શ્રદ્દધાનાઃ મત્-પરમાઃ ભક્તાઃ તે અતીવ મે પ્રિયાઃ ॥ ૧૨-૨૦॥

યે તુ શ્રદ્દધાનાઃ મત્-પરમાઃ ભક્તાઃ ઇદમ્ યથા ઉક્તમ્
ધર્મ્ય-અમૃતમ્ પર્યુપાસતે, તે મે અતીવ પ્રિયાઃ (સન્તિ)।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
ભક્તિયોગો નામ દ્વાદશોઽધ્યાયઃ ॥ ૧૨॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદે
ભક્તિ-યોગઃ નામ દ્વાદશઃ અધ્યાયઃ ॥ ૧૨॥

---

અથ ત્રયોદશોઽધ્યાયઃ ।  ક્ષેત્રક્ષેત્રજ્ઞવિભાગયોગઃ ।
અથ ત્રયોદશઃ અધ્યાયઃ ।  ક્ષેત્ર-ક્ષેત્રજ્ઞ-વિભાગ-યોગઃ ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

પ્રકૃતિં પુરુષં ચૈવ ક્ષેત્રં ક્ષેત્રજ્ઞમેવ ચ ।
એતદ્વેદિતુમિચ્છામિ જ્ઞાનં જ્ઞેયં ચ કેશવ ॥ ૧૩-૦॥

પ્રકૃતિમ્ પુરુષમ્ ચ એવ ક્ષેત્રમ્ ક્ષેત્રજ્ઞમ્ એવ ચ ।
એતત્ વેદિતુમ્ ઇચ્છામિ જ્ઞાનમ્ જ્ઞેયમ્ ચ કેશવ ॥ ૧૩-૦॥

હે કેશવ! પ્રકૃતિમ્ પુરુષમ્ ચ એવ ક્ષેત્રમ્ ક્ષેત્રજ્ઞમ્ ચ
એવ જ્ઞાનમ્ જ્ઞેયમ્ ચ એતત્ વેદિતુમ્ ઇચ્છામિ ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

ઇદં શરીરં કૌન્તેય ક્ષેત્રમિત્યભિધીયતે ।
એતદ્યો વેત્તિ તં પ્રાહુઃ ક્ષેત્રજ્ઞ ઇતિ તદ્વિદઃ ॥ ૧૩-૧॥

ઇદમ્ શરીરમ્ કૌન્તેય ક્ષેત્રમ્ ઇતિ અભિધીયતે ।
એતત્ યઃ વેત્તિ તમ્ પ્રાહુઃ ક્ષેત્રજ્ઞઃ ઇતિ તત્-વિદઃ ॥ ૧૩-૧॥

હે કૌન્તેય! ઇદમ્ શરીરમ્ ક્ષેત્રમ્ ઇતિ અભિધીયતે । યઃ એતત્
વેત્તિ, તમ્ ક્ષેત્રજ્ઞઃ ઇતિ તત્-વિદઃ પ્રાહુઃ ।

ક્ષેત્રજ્ઞં ચાપિ માં વિદ્ધિ સર્વક્ષેત્રેષુ ભારત ।
ક્ષેત્રક્ષેત્રજ્ઞયોર્જ્ઞાનં યત્તજ્જ્ઞાનં મતં મમ ॥ ૧૩-૨॥

ક્ષેત્રજ્ઞમ્ ચ અપિ મામ્ વિદ્ધિ સર્વ-ક્ષેત્રેષુ ભારત ।
ક્ષેત્ર-ક્ષેત્રજ્ઞયોઃ જ્ઞાનમ્ યત્ તત્ જ્ઞાનમ્ મતમ્ મમ ॥ ૧૩-૨॥

હે ભારત! સર્વ-ક્ષેત્રેષુ મામ્ અપિ ચ ક્ષેત્રજ્ઞમ્ વિદ્ધિ । યત્
ક્ષેત્ર-ક્ષેત્રજ્ઞયોઃ જ્ઞાનમ્, તત્ જ્ઞાનમ્ (ઇતિ) મમ મતમ્ (અસ્તિ)।

તત્ક્ષેત્રં યચ્ચ યાદૃક્ચ યદ્વિકારિ યતશ્ચ યત્ ।
સ ચ યો યત્પ્રભાવશ્ચ તત્સમાસેન મે શ‍ૃણુ ॥ ૧૩-૩॥

તત્ ક્ષેત્રમ્ યત્ ચ યાદૃક્ ચ યત્ વિકારિ યતઃ ચ યત્ ।
સઃ ચ યઃ યત્ પ્રભાવઃ ચ તત્ સમાસેન મે શ‍ૃણુ ॥ ૧૩-૩॥

તત્ ક્ષેત્રમ્ યત્ ચ, યાદૃક્ ચ, યત્ વિકારિ (ચ), યતઃ ચ યત્,
સઃ ચ યઃ, યત્ પ્રભાવઃ ચ (અસ્તિ) તત્, (ત્વં) સમાસેન મે શ‍ૃણુ ।

ઋષિભિર્બહુધા ગીતં છન્દોભિર્વિવિધૈઃ પૃથક્ ।
બ્રહ્મસૂત્રપદૈશ્ચૈવ હેતુમદ્ભિર્વિનિશ્ચિતૈઃ ॥ ૧૩-૪॥

ઋષિભિઃ બહુધા ગીતમ્ છન્દોભિઃ વિવિધૈઃ પૃથક્ ।
બ્રહ્મ-સૂત્ર-પદૈઃ ચ એવ હેતુમદ્ભિઃ વિનિશ્ચિતૈઃ ॥ ૧૩-૪॥

(ઇદં જ્ઞાનં) ઋષિભિઃ બહુધા, (તથા) વિવિધૈઃ છન્દોભિઃ
પૃથક્ હેતુમદ્ભિઃ વિનિશ્ચિતૈઃ બ્રહ્મ-સૂત્ર-પદૈઃ ચ ગીતમ્ એવ ।

મહાભૂતાન્યહઙ્કારો બુદ્ધિરવ્યક્તમેવ ચ ।
ઇન્દ્રિયાણિ દશૈકં ચ પઞ્ચ ચેન્દ્રિયગોચરાઃ ॥ ૧૩-૫॥

ઇચ્છા દ્વેષઃ સુખં દુઃખં સંઘાતશ્ચેતના ધૃતિઃ ।
એતત્ક્ષેત્રં સમાસેન સવિકારમુદાહૃતમ્ ॥ ૧૩-૬॥

મહા-ભૂતાનિ અહઙ્કારઃ બુદ્ધિઃ અવ્યક્તમ્ એવ ચ ।
ઇન્દ્રિયાણિ દશ–એકમ્ ચ પઞ્ચ ચ ઇન્દ્રિય-ગોચરાઃ ॥ ૧૩-૫॥

ઇચ્છા દ્વેષઃ સુખમ્ દુઃખમ્ સંઘાતઃ ચેતના ધૃતિઃ ।
એતત્ ક્ષેત્રમ્ સમાસેન સવિકારમ્ ઉદાહૃતમ્ ॥ ૧૩-૬॥

મહા-ભૂતાનિ, અહઙ્કારઃ, બુદ્ધિઃ, અવ્યક્તમ્ એવ ચ ,
દશ ઇન્દ્રિયાણિ ચ, એકમ્ (મનઃ) ઇન્દ્રિય-ગોચરાઃ પઞ્ચ ચ,
ઇચ્છા, દ્વેષઃ, સુખમ્, દુઃખમ્, સંઘાતઃ, ચેતના, ધૃતિઃ,
એતત્ સવિકારમ્ ક્ષેત્રમ્ (મયા) સમાસેન ઉદાહૃતમ્ ।

અમાનિત્વમદમ્ભિત્વમહિંસા ક્ષાન્તિરાર્જવમ્ ।
આચાર્યોપાસનં શૌચં સ્થૈર્યમાત્મવિનિગ્રહઃ ॥ ૧૩-૭॥

અમાનિત્વમ્ અદમ્ભિત્વમ્ અહિંસા ક્ષાન્તિઃ આર્જવમ્ ।
આચાર્ય-ઉપાસનમ્ શૌચમ્ સ્થૈર્યમ્ આત્મ-વિનિગ્રહઃ ॥ ૧૩-૭॥

અમાનિત્વમ્, અદમ્ભિત્વમ્, અહિંસા, ક્ષાન્તિઃ, આર્જવમ્,
આચાર્ય-ઉપાસનમ્, શૌચમ્, સ્થૈર્યમ્, આત્મ-વિનિગ્રહઃ,

ઇન્દ્રિયાર્થેષુ વૈરાગ્યમનહંકાર એવ ચ ।
જન્મમૃત્યુજરાવ્યાધિદુઃખદોષાનુદર્શનમ્ ॥ ૧૩-૮॥

ઇન્દ્રિય-અર્થેષુ વૈરાગ્યમ્ અનહંકારઃ એવ ચ ।
જન્મ-મૃત્યુ-જરા-વ્યાધિ-દુઃખ-દોષ-અનુદર્શનમ્ ॥ ૧૩-૮॥

ઇન્દ્રિય-અર્થેષુ વૈરાગ્યમ્, અનહંકારઃ એવ ચ,
જન્મ-મૃત્યુ-જરા-વ્યાધિ-દુઃખ-દોષ-અનુદર્શનમ્,

અસક્તિરનભિષ્વઙ્ગઃ પુત્રદારગૃહાદિષુ ।

નિત્યં ચ સમચિત્તત્વમિષ્ટાનિષ્ટોપપત્તિષુ ॥ ૧૩-૯॥

અસક્તિઃ અનભિષ્વઙ્ગઃ પુત્ર-દાર-ગૃહ-આદિષુ ।
નિત્યમ્ ચ સમ-ચિત્તત્વમ્ ઇષ્ટ અનિષ્ટ-ઉપપત્તિષુ ॥ ૧૩-૯॥

અસક્તિઃ, પુત્ર-દાર-ગૃહ-આદિષુ અનભિષ્વઙ્ગઃ,
ઇષ્ટ-અનિષ્ટ-ઉપપત્તિષુ નિત્યમ્ સમ-ચિત્તત્વમ્ ચ,

મયિ ચાનન્યયોગેન ભક્તિરવ્યભિચારિણી ।
વિવિક્તદેશસેવિત્વમરતિર્જનસંસદિ ॥ ૧૩-૧૦॥

મયિ ચ અનન્ય-યોગેન ભક્તિઃ અવ્યભિચારિણી ।
વિવિક્ત-દેશ-સેવિત્વમ્ અરતિઃ જન-સંસદિ ॥ ૧૩-૧૦॥

મયિ ચ અનન્ય-યોગેન અવ્યભિચારિણી ભક્તિઃ,
વિવિક્ત-દેશ-સેવિત્વમ્, જન-સંસદિ અરતિઃ,

અધ્યાત્મજ્ઞાનનિત્યત્વં તત્ત્વજ્ઞાનાર્થદર્શનમ્ ।
એતજ્જ્ઞાનમિતિ પ્રોક્તમજ્ઞાનં યદતોઽન્યથા ॥ ૧૩-૧૧॥

અધ્યાત્મ-જ્ઞાન-નિત્યત્વમ્ તત્ત્વ-જ્ઞાન-અર્થ-દર્શનમ્ ।
એતત્ જ્ઞાનમ્ ઇતિ પ્રોક્તમ્ અજ્ઞાનમ્ યત્ અતઃ અન્યથા ॥ ૧૩-૧૧॥

અધ્યાત્મ-જ્ઞાન-નિત્યત્વમ્, તત્ત્વ-જ્ઞાન-અર્થ-દર્શનમ્,
એતત્ જ્ઞાનમ્ ઇતિ પ્રોક્તમ્, યત્ અતઃ અન્યથા (તત્) અજ્ઞાનમ્ ( ઇતિ પ્રોક્તમ્) ।

જ્ઞેયં યત્તત્પ્રવક્ષ્યામિ યજ્જ્ઞાત્વામૃતમશ્નુતે ।
અનાદિમત્પરં બ્રહ્મ ન સત્તન્નાસદુચ્યતે ॥ ૧૩-૧૨॥

જ્ઞેયમ્ યત્ તત્ પ્રવક્ષ્યામિ યત્ જ્ઞાત્વા અમૃતમ્ અશ્નુતે ।
અનાદિમત્ પરમ્ બ્રહ્મ ન સત્ તત્ ન અસત્ ઉચ્યતે ॥ ૧૩-૧૨॥

યત્ જ્ઞેયમ્, યત્ જ્ઞાત્વા (જીવઃ) અમૃતમ્ અશ્નુતે, તત્ પ્રવક્ષ્યામિ ।
તત્ અનાદિમત્ પરમ્ બ્રહ્મ સત્ ન, અસત્ (ચ) ન (ઇતિ) ઉચ્યતે ।

સર્વતઃ પાણિપાદં તત્સર્વતોઽક્ષિશિરોમુખમ્ ।
સર્વતઃ શ્રુતિમલ્લોકે સર્વમાવૃત્ય તિષ્ઠતિ ॥ ૧૩-૧૩॥

સર્વતઃ પાણિ-પાદમ્ તત્ સર્વતઃ અક્ષિ-શિરઃ-મુખમ્ ।
સર્વતઃ શ્રુતિમત્ લોકે સર્વમ્ આવૃત્ય તિષ્ઠતિ ॥ ૧૩-૧૩॥

લોકે તત્ સર્વતઃ પાણિ-પાદમ્, સર્વતઃ અક્ષિ-શિરઃ-મુખમ્, સર્વતઃ
શ્રુતિમત્ (અસ્તિ), સર્વમ્ (ચ) આવૃત્ય તિષ્ઠતિ ।

સર્વેન્દ્રિયગુણાભાસં સર્વેન્દ્રિયવિવર્જિતમ્ ।
અસક્તં સર્વભૃચ્ચૈવ નિર્ગુણં ગુણભોક્તૃ ચ ॥ ૧૩-૧૪॥

સર્વ-ઇન્દ્રિય-ગુણ-આભાસમ્ સર્વ-ઇન્દ્રિય-વિવર્જિતમ્ ।
અસક્તમ્ સર્વ-ભૃત્ ચ એવ નિર્ગુણમ્ ગુણ-ભોક્તૃ ચ ॥ ૧૩-૧૪॥

(તત્) સર્વ-ઇન્દ્રિય-ગુણ-આભાસમ્, સર્વ-ઇન્દ્રિય-વિવર્જિતમ્,
અસક્તમ્, સર્વ-ભૃત્ ચ એવ, નિર્ગુણમ્ ગુણ-ભોક્તૃ ચ (અસ્તિ) ।

બહિરન્તશ્ચ ભૂતાનામચરં ચરમેવ ચ ।
સૂક્ષ્મત્વાત્તદવિજ્ઞેયં દૂરસ્થં ચાન્તિકે ચ તત્ ॥ ૧૩-૧૫॥

બહિઃ-અન્તઃ ચ ભૂતાનામ્ અચરમ્ ચરમ્ એવ ચ ।
સૂક્ષ્મત્વાત્ તત્ અવિજ્ઞેયમ્ દૂરસ્થમ્ ચ અન્તિકે ચ તત્ ॥ ૧૩-૧૫॥

તત્ ભૂતાનામ્ બહિઃ અન્તઃ ચ (અસ્તિ), અચરમ્ ચરમ્ ચ એવ (અસ્તિ),
તત્ સૂક્ષ્મત્વાત્ અવિજ્ઞેયમ્ (અસ્તિ), દૂરસ્થમ્ ચ અન્તિકે ચ (અસ્તિ) ।

અવિભક્તં ચ ભૂતેષુ વિભક્તમિવ ચ સ્થિતમ્ ।
ભૂતભર્તૃ ચ તજ્જ્ઞેયં ગ્રસિષ્ણુ પ્રભવિષ્ણુ ચ ॥ ૧૩-૧૬॥

અવિભક્તમ્ ચ ભૂતેષુ વિભક્તમ્ ઇવ ચ સ્થિતમ્ ।
ભૂત-ભર્તૃ ચ તત્ જ્ઞેયમ્ ગ્રસિષ્ણુ પ્રભવિષ્ણુ ચ ॥ ૧૩-૧૬॥

તત્ જ્ઞેયમ્ અવિભક્તમ્ ચ ભૂતેષુ વિભક્તમ્ ઇવ સ્થિતમ્,
ભૂત-ભર્તૃ ચ ગ્રસિષ્ણુ ચ પ્રભવિષ્ણુ ચ (અસ્તિ) ।

જ્યોતિષામપિ તજ્જ્યોતિસ્તમસઃ પરમુચ્યતે ।
જ્ઞાનં જ્ઞેયં જ્ઞાનગમ્યં હૃદિ સર્વસ્ય ધિષ્ઠિતમ્ ॥ ૧૩-૧૭॥

જ્યોતિષામ્ અપિ તત્ જ્યોતિઃ તમસઃ પરમ્ ઉચ્યતે ।
જ્ઞાનમ્ જ્ઞેયમ્ જ્ઞાનગમ્યમ્ હૃદિ સર્વસ્ય ધિષ્ઠિતમ્ ॥ ૧૩-૧૭॥

તત્ જ્યોતિષામ્ અપિ જ્યોતિઃ (અસ્તિ), તમસઃ પરમ્ ઉચ્યતે, (તત્)
જ્ઞાનમ્, જ્ઞેયમ્, જ્ઞાનગમ્યમ્ (અસ્તિ), સર્વસ્ય હૃદિ ધિષ્ઠિતમ્ (અસ્તિ) ।

ઇતિ ક્ષેત્રં તથા જ્ઞાનં જ્ઞેયં ચોક્તં સમાસતઃ ।
મદ્ભક્ત એતદ્વિજ્ઞાય મદ્ભાવાયોપપદ્યતે ॥ ૧૩-૧૮॥

ઇતિ ક્ષેત્રમ્ તથા જ્ઞાનમ્ જ્ઞેયમ્ ચ ઉક્તમ્ સમાસતઃ ।
મત્-ભક્તઃ એતત્ વિજ્ઞાય મત્-ભાવાય ઉપપદ્યતે ॥ ૧૩-૧૮॥

ઇતિ ક્ષેત્રમ્, તથા જ્ઞાનમ્ જ્ઞેયમ્ ચ સમાસતઃ ઉક્તમ્,
એતત્ વિજ્ઞાય, મત્-ભક્તઃ મત્-ભાવાય ઉપપદ્યતે ।

પ્રકૃતિં પુરુષં ચૈવ વિદ્ધ્યનાદી ઉભાવપિ ।
વિકારાંશ્ચ ગુણાંશ્ચૈવ વિદ્ધિ પ્રકૃતિસમ્ભવાન્ ॥ ૧૩-૧૯॥

પ્રકૃતિમ્ પુરુષમ્ ચ એવ વિદ્ધિ અનાદી ઉભાઉ અપિ ।
વિકારાન્ ચ ગુણાન્ ચ એવ વિદ્ધિ પ્રકૃતિ-સમ્ભવાન્ ॥ ૧૩-૧૯॥

(ત્વં) પ્રકૃતિમ્ પુરુષમ્ ચ ઉભાઉ અપિ અનાદી એવ વિદ્ધિ ।
વિકારાન્ ચ ગુણાન્ ચ પ્રકૃતિ-સમ્ભવાન્ એવ વિદ્ધિ ।

કાર્યકારણકર્તૃત્વે હેતુઃ પ્રકૃતિરુચ્યતે ।
પુરુષઃ સુખદુઃખાનાં ભોક્તૃત્વે હેતુરુચ્યતે ॥ ૧૩-૨૦॥

કાર્ય-કારણ-કર્તૃત્વે હેતુઃ પ્રકૃતિઃ ઉચ્યતે ।
પુરુષઃ સુખ-દુઃખાનામ્ ભોક્તૃત્વે હેતુઃ ઉચ્યતે ॥ ૧૩-૨૦॥

પ્રકૃતિઃ કાર્ય-કારણ-કર્તૃત્વે હેતુઃ ઉચ્યતે । પુરુષઃ
સુખ-દુઃખાનામ્ ભોક્તૃત્વે હેતુઃ ઉચ્યતે ।

પુરુષઃ પ્રકૃતિસ્થો હિ ભુઙ્ક્તે પ્રકૃતિજાન્ગુણાન્ ।
કારણં ગુણસઙ્ગોઽસ્ય સદસદ્યોનિજન્મસુ ॥ ૧૩-૨૧॥

પુરુષઃ પ્રકૃતિસ્થઃ હિ ભુઙ્ક્તે પ્રકૃતિજાન્ ગુણાન્ ।
કારણમ્ ગુણ-સઙ્ગઃ અસ્ય સત્ અસત્ યોનિ-જન્મસુ ॥ ૧૩-૨૧॥

પુરુષઃ પ્રકૃતિસ્થઃ (સન્) પ્રકૃતિજાન્ ગુણાન્ ભુઙ્ક્તે હિ ।
ગુણ-સઙ્ગઃ અસ્ય સત્-અસત્-યોનિ-જન્મસુ કારણમ્ (અસ્તિ) ।

ઉપદ્રષ્ટાનુમન્તા ચ ભર્તા ભોક્તા મહેશ્વરઃ ।
પરમાત્મેતિ ચાપ્યુક્તો દેહેઽસ્મિન્પુરુષઃ પરઃ ॥ ૧૩-૨૨॥

ઉપદ્રષ્ટા અનુમન્તા ચ ભર્તા ભોક્તા મહેશ્વરઃ ।
પરમાત્મા ઇતિ ચ અપિ ઉક્તઃ દેહે અસ્મિન્ પુરુષઃ પરઃ ॥ ૧૩-૨૨॥

ઉપદ્રષ્ટા, અનુમન્તા, ભર્તા, ચ ભોક્તા, મહેશ્વરઃ, અપિ

ચ પરમાત્મા ઇતિ ઉક્તઃ પરઃ પુરુષઃ અસ્મિન્ દેહે (અસ્તિ) ।

ય એવં વેત્તિ પુરુષં પ્રકૃતિં ચ ગુણૈઃ સહ ।
સર્વથા વર્તમાનોઽપિ ન સ ભૂયોઽભિજાયતે ॥ ૧૩-૨૩ ॥

યઃ એવમ્ વેત્તિ પુરુષમ્ પ્રકૃતિમ્ ચ ગુણૈઃ સહ ।
સર્વથા વર્તમાનઃ અપિ ન સઃ ભૂયઃ અભિજાયતે ॥ ૧૩-૨૩ ॥

યઃ એવમ્ પુરુષમ્ ગુણૈઃ સહ પ્રકૃતિમ્ ચ વેત્તિ, સઃ
સર્વથા વર્તમાનઃ અપિ ભૂયઃ ન અભિજાયતે ।

ધ્યાનેનાત્મનિ પશ્યન્તિ કેચિદાત્માનમાત્મના ।
અન્યે સાઙ્ખ્યેન યોગેન કર્મયોગેન ચાપરે ॥ ૧૩ -૨૪ ॥

ધ્યાનેન આત્મનિ પશ્યન્તિ કેચિત્ આત્માનમ્ આત્મના ।
અન્યે સાઙ્ખ્યેન યોગેન કર્મ-યોગેન ચ અપરે ॥ ૧૩-૨૪ ॥

કેચિત્ ધ્યાનેન આત્મના આત્મનિ આત્માનમ્ પશ્યન્તિ ।
અન્યે સાઙ્ખ્યેન યોગેન (આત્માનમ્ પશ્યન્તિ) । અપરે ચ
કર્મ-યોગેન (આત્માનમ્ પશ્યન્તિ)।

અન્યે ત્વેવમજાનન્તઃ શ્રુત્વાન્યેભ્ય ઉપાસતે ।
તેઽપિ ચાતિતરન્ત્યેવ મૃત્યું શ્રુતિપરાયણાઃ ॥ ૧૩-૨૫ ॥

અન્યે તુ એવમ્ અજાનન્તઃ શ્રુત્વા અન્યેભ્યઃ ઉપાસતે ।
તે અપિ ચ અતિતરન્તિ એવ મૃત્યુમ્ શ્રુતિ-પરાયણાઃ ॥ ૧૩-૨૫ ॥

અન્યે તુ એવમ્ અજાનન્તઃ અન્યેભ્યઃ શ્રુત્વા ઉપાસતે, તે
શ્રુતિ-પરાયણાઃ ચ અપિ મૃત્યુમ્ અતિતરન્તિ એવ ।

યાવત્સઞ્જાયતે કિઞ્ચિત્સત્ત્વં સ્થાવરજઙ્ગમમ્ ।
ક્ષેત્રક્ષેત્રજ્ઞસ। ન્યોગાત્તદ્વિદ્ધિ ભરતર્ષભ ॥ ૧૩-૨૬ ॥

યાવત્ સઞ્જાયતે કિઞ્ચિત્ સત્ત્વમ્ સ્થાવર-જઙ્ગમમ્ ।
ક્ષેત્ર-ક્ષેત્રજ્ઞ-સંયોગાત્ તત્ વિદ્ધિ ભરતર્ષભ ॥ ૧૩-૨૬ ॥

હે ભરતર્ષભ! યાવત્ કિઞ્ચિત્ સ્થાવર-જઙ્ગમમ્ સત્ત્વમ્
સઞ્જાયતે, તત્ ક્ષેત્ર-ક્ષેત્રજ્ઞ-સંયોગાત્ (સઞ્જાયતે ઇતિ ત્વં) વિદ્ધિ ।

સમં સર્વેષુ ભૂતેષુ તિષ્ઠન્તં પરમેશ્વરમ્ ।
વિનશ્યત્સ્વવિનશ્યન્તં યઃ પશ્યતિ સ પશ્યતિ ॥ ૧૩-૨૭ ॥

સમમ્ સર્વેષુ ભૂતેષુ તિષ્ઠન્તમ્ પરમેશ્વરમ્ ।
વિનશ્યત્સુ અવિનશ્યન્તમ્ યઃ પશ્યતિ સઃ પશ્યતિ ॥ ૧૩-૨૭ ॥

યઃ વિનશ્યત્સુ સર્વેષુ ભૂતેષુ સમમ્ તિષ્ઠન્તમ્ અવિનશ્યન્તમ્
પરમેશ્વરમ્ પશ્યતિ, સઃ પશ્યતિ ।

સમં પશ્યન્હિ સર્વત્ર સમવસ્થિતમીશ્વરમ્ ।
ન હિનસ્ત્યાત્મનાત્માનં તતો યાતિ પરાં ગતિમ્ ॥ ૧૩-૨૮ ॥

સમં પશ્યન્ હિ સર્વત્ર સમવસ્થિતમ્ ઈશ્વરમ્ ।
ન હિનસ્તિ આત્મના આત્માનમ્ તતઃ યાતિ પરામ્ ગતિમ્ ॥ ૧૩-૨૮ ॥

(યઃ) સર્વત્ર સમવસ્થિતમ્ ઈશ્વરમ્ સમં પશ્યન્ હિ આત્મના
આત્માનમ્ ન હિનસ્તિ,(સઃ) તતઃ પરામ્ ગતિમ્ યાતિ ।

પ્રકૃત્યૈવ ચ કર્માણિ ક્રિયમાણાનિ સર્વશઃ ।
યઃ પશ્યતિ તથાત્માનમકર્તારં સ પશ્યતિ ॥ ૧૩-૨૯ ॥

પ્રકૃત્યા એવ ચ કર્માણિ ક્રિયમાણાનિ સર્વશઃ ।
યઃ પશ્યતિ તથા આત્માનમ્ અકર્તારમ્ સઃ પશ્યતિ ॥ ૧૩-૨૯ ॥

યઃ ચ પ્રકૃત્યા એવ કર્માણિ સર્વશઃ ક્રિયમાણાનિ (સન્તિ ઇતિ પશ્યતિ),
તથા આત્માનમ્ અકર્તારમ્ પશ્યતિ, સઃ પશ્યતિ ।

યદા ભૂતપૃથગ્ભાવમેકસ્થમનુપશ્યતિ ।
તત એવ ચ વિસ્તારં બ્રહ્મ સમ્પદ્યતે તદા ॥ ૧૩-૩૦ ॥

યદા ભૂત-પૃથક્-ભાવમ્ એકસ્થમ્ અનુપશ્યતિ ।
તતઃ એવ ચ વિસ્તારમ્ બ્રહ્મ સમ્પદ્યતે તદા ॥ ૧૩-૩૦ ॥

યદા ભૂત-પૃથક્-ભાવમ્ એકસ્થમ્ ચ તતઃ એવ
વિસ્તારમ્ અનુપશ્યતિ, તદા બ્રહ્મ સમ્પદ્યતે ।

અનાદિત્વાન્નિર્ગુણત્વાત્પરમાત્માયમવ્યયઃ ।
શરીરસ્થોઽપિ કૌન્તેય ન કરોતિ ન લિપ્યતે ॥ ૧૩-૩૧ ॥

અનાદિત્વાત્ નિર્ગુણત્વાત્ પરમાત્મા અયમ્ અવ્યયઃ ।
શરીરસ્થઃ અપિ કૌન્તેય ન કરોતિ ન લિપ્યતે ॥ ૧૩-૩૧ ॥

હે કૌન્તેય! અયમ્ પરમાત્મા અનાદિત્વાત્, નિર્ગુણત્વાત્, અવ્યયઃ

(અસ્તિ, અતઃ સઃ) શરીરસ્થઃ (સન્) અપિ ન કરોતિ, ન (ચ) લિપ્યતે ।

યથા સર્વગતં સૌક્ષ્મ્યાદાકાશં નોપલિપ્યતે ।
સર્વત્રાવસ્થિતો દેહે તથાત્મા નોપલિપ્યતે ॥ ૧૩-૩૨॥

યથા સર્વગતમ્ સૌક્ષ્મ્યાત્ આકાશમ્ ન ઉપલિપ્યતે ।
સર્વત્ર-અવસ્થિતઃ દેહે તથા આત્મા ન ઉપલિપ્યતે ॥ ૧૩-૩૨॥

યથા સર્વગતમ્ આકાશમ્ સૌક્ષ્મ્યાત્ ન ઉપલિપ્યતે, તથા
સર્વત્ર દેહે અવસ્થિતઃ આત્મા ન ઉપલિપ્યતે ।

યથા પ્રકાશયત્યેકઃ કૃત્સ્નં લોકમિમં રવિઃ ।
ક્ષેત્રં ક્ષેત્રી તથા કૃત્સ્નં પ્રકાશયતિ ભારત ॥ ૧૩-૩૩॥

યથા પ્રકાશયતિ એકઃ કૃત્સ્નમ્ લોકમ્ ઇમમ્ રવિઃ ।
ક્ષેત્રમ્ ક્ષેત્રી તથા કૃત્સ્નમ્ પ્રકાશયતિ ભારત ॥ ૧૩-૩૩॥

હે ભારત! યથા એકઃ રવિઃ ઇમમ્ કૃત્સ્નમ્ લોકમ્ પ્રકાશયતિ,
તથા ક્ષેત્રી કૃત્સ્નમ્ ક્ષેત્રમ્ પ્રકાશયતિ ।

ક્ષેત્રક્ષેત્રજ્ઞયોરેવમન્તરં જ્ઞાનચક્ષુષા ।
ભૂતપ્રકૃતિમોક્ષં ચ યે વિદુર્યાન્તિ તે પરમ્ ॥ ૧૩-૩૪॥

ક્ષેત્ર-ક્ષેત્રજ્ઞયોઃ એવમ્ અન્તરમ્  જ્ઞાન-ચક્ષુષા ।
ભૂત-પ્રકૃતિ-મોક્ષમ્ ચ યે વિદુઃ યાન્તિ તે પરમ્ ॥ ૧૩-૩૪॥

એવમ્ યે જ્ઞાન-ચક્ષુષા ક્ષેત્ર-ક્ષેત્રજ્ઞયોઃ અન્તરમ્ (જ્ઞાનં)
ભૂત-પ્રકૃતિ-મોક્ષમ્ ચ વિદુઃ, તે પરમ્ યાન્તિ ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
ક્ષેત્રક્ષેત્રજ્ઞવિભાગયોગો નામ ત્રયોદશોઽધ્યાયઃ ॥ ૧૩॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદે
ક્ષેત્ર-ક્ષેત્રજ્ઞ-વિભાગ-યોગઃ નામ ત્રયોદશઃ અધ્યાયઃ ॥ ૧૩॥

---

અથ ચતુર્દશોઽધ્યાયઃ ।   ગુણત્રયવિભાગયોગઃ ।
અથ ચતુર્દશઃ અધ્યાયઃ ।   ગુણ-ત્રય-વિભાગ-યોગઃ ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

પરં ભૂયઃ પ્રવક્ષ્યામિ જ્ઞાનાનાં જ્ઞાનમુત્તમમ્ ।
યજ્જ્ઞાત્વા મુનયઃ સર્વે પરાં સિદ્ધિમિતો ગતાઃ ॥ ૧૪-૧॥

પરમ્ ભૂયઃ પ્રવક્ષ્યામિ જ્ઞાનાનામ્ જ્ઞાનમ્ ઉત્તમમ્ ।
યત્ જ્ઞાત્વા મુનયઃ સર્વે પરામ્ સિદ્ધિમ્ ઇતઃ ગતાઃ ॥ ૧૪-૧॥

યત્ જ્ઞાત્વા સર્વે મુનયઃ ઇતઃ પરામ્ સિદ્ધિમ્ ગતાઃ, (તત્)
જ્ઞાનાનામ્ ઉત્તમમ્ પરમ્ જ્ઞાનમ્ ભૂયઃ (અહં તે) પ્રવક્ષ્યામિ ।

ઇદં જ્ઞાનમુપાશ્રિત્ય મમ સાધર્મ્યમાગતાઃ ।
સર્ગેઽપિ નોપજાયન્તે પ્રલયે ન વ્યથન્તિ ચ ॥ ૧૪-૨॥

ઇદમ્ જ્ઞાનમ્ ઉપાશ્રિત્ય મમ સાધર્મ્યમ્ આગતાઃ ।
સર્ગે અપિ ન ઉપજાયન્તે પ્રલયે ન વ્યથન્તિ ચ ॥ ૧૪-૨॥

(યે) ઇદમ્ જ્ઞાનમ્ ઉપાશ્રિત્ય મમ સાધર્મ્યમ્ આગતાઃ, (તે)
સર્ગે અપિ ન ઉપજાયન્તે, પ્રલયે ચ ન વ્યથન્તિ ।

મમ યોનિર્મહદ્ બ્રહ્મ તસ્મિન્ગર્ભં દધામ્યહમ્ ।
સમ્ભવઃ સર્વભૂતાનાં તતો ભવતિ ભારત ॥ ૧૪-૩॥

મમ યોનિઃ મહત્ બ્રહ્મ તસ્મિન્ ગર્ભમ્ દધામિ અહમ્ ।
સમ્ભવઃ સર્વ-ભૂતાનામ્ તતઃ ભવતિ ભારત ॥ ૧૪-૩॥

હે ભારત! મહત્ બ્રહ્મ મમ યોનિઃ (અસ્તિ); તસ્મિન્ અહમ્
ગર્ભમ્ દધામિ; તતઃ સર્વ-ભૂતાનામ્ સમ્ભવઃ ભવતિ ।

સર્વયોનિષુ કૌન્તેય મૂર્તયઃ સમ્ભવન્તિ યાઃ ।
તાસાં બ્રહ્મ મહદ્યોનિરહં બીજપ્રદઃ પિતા ॥ ૧૪-૪॥

સર્વ-યોનિષુ કૌન્તેય મૂર્તયઃ સમ્ભવન્તિ યાઃ ।
તાસામ્ બ્રહ્મ મહત્ યોનિઃ અહમ્ બીજ-પ્રદઃ પિતા ॥ ૧૪-૪॥

હે કૌન્તેય! સર્વ-યોનિષુ યાઃ મૂર્તયઃ સમ્ભવન્તિ તાસામ્
યોનિઃ મહત્ બ્રહ્મ (અસ્તિ), અહમ્ બીજ-પ્રદઃ પિતા (ચ અસ્મિ) ।

સત્ત્વં રજસ્તમ ઇતિ ગુણાઃ પ્રકૃતિસમ્ભવાઃ ।
નિબધ્નન્તિ મહાબાહો દેહે દેહિનમવ્યયમ્ ॥ ૧૪-૫॥

સત્ત્વમ્ રજઃ તમઃ ઇતિ ગુણાઃ પ્રકૃતિ-સમ્ભવાઃ ।
નિબધ્નન્તિ મહા-બાહો દેહે દેહિનમ્ અવ્યયમ્ ॥ ૧૪-૫॥

હે મહા-બાહો! સત્ત્વમ્ રજઃ તમઃ ઇતિ ગુણાઃ પ્રકૃતિ-સમ્ભવાઃ
(સન્તિ, તે) દેહે અવ્યયમ્ દેહિનમ્ નિબધ્નન્તિ ।

તત્ર સત્ત્વં નિર્મલત્વાત્પ્રકાશકમનામયમ્ ।
સુખસઙ્ગેન બધ્નાતિ જ્ઞાનસઙ્ગેન ચાનઘ ॥ ૧૪-૬॥

તત્ર સત્ત્વમ્ નિર્મલત્વાત્ પ્રકાશકમ્ અનામયમ્ ।
સુખ-સઙ્ગેન બધ્નાતિ જ્ઞાન-સઙ્ગેન ચ અનઘ ॥ ૧૪-૬॥

હે અનઘ! તત્ર અનામયમ્ પ્રકાશકમ્ સત્ત્વમ્ નિર્મલત્વાત્
(આત્માનં) સુખ-સઙ્ગેન જ્ઞાન-સઙ્ગેન ચ બધ્નાતિ ।

રજો રાગાત્મકં વિદ્ધિ તૃષ્ણાસઙ્ગસમુદ્ભવમ્ ।
તન્નિબધ્નાતિ કૌન્તેય કર્મસઙ્ગેન દેહિનમ્ ॥ ૧૪-૭॥

રજઃ રાગ-આત્મકમ્ વિદ્ધિ તૃષ્ણા-સઙ્ગ-સમુદ્ભવમ્ ।
તત્ નિબધ્નાતિ કૌન્તેય કર્મ-સઙ્ગેન દેહિનમ્ ॥ ૧૪-૭॥

હે કૌન્તેય! રાગ-આત્મકમ્ રજઃ તૃષ્ણા-સઙ્ગ-સમુદ્ભવમ્
વિદ્ધિ । તત્ દેહિનમ્ કર્મ-સઙ્ગેન નિબધ્નાતિ ।

તમસ્ત્વજ્ઞાનજં વિદ્ધિ મોહનં સર્વદેહિનામ્ ।
પ્રમાદાલસ્યનિદ્રાભિસ્તન્નિબધ્નાતિ ભારત ॥ ૧૪-૮॥

તમઃ તુ અજ્ઞાનજમ્ વિદ્ધિ મોહનમ્ સર્વ-દેહિનામ્ ।
પ્રમાદ-આલસ્ય-નિદ્રાભિઃ તત્ નિબધ્નાતિ ભારત ॥ ૧૪-૮॥

હે ભારત! તમઃ તુ સર્વ-દેહિનામ્ મોહનમ્ અજ્ઞાનજમ્ વિદ્ધિ ।
તત્ (દેહિનામ્) પ્રમાદ-આલસ્ય-નિદ્રાભિઃ નિબધ્નાતિ ।

સત્ત્વં સુખે સઞ્જયતિ રજઃ કર્મણિ ભારત ।
જ્ઞાનમાવૃત્ય તુ તમઃ પ્રમાદે સઞ્જયત્યુત ॥ ૧૪-૯॥

સત્ત્વમ્ સુખે સઞ્જયતિ રજઃ કર્મણિ ભારત ।
જ્ઞાનમ્ આવૃત્ય તુ તમઃ પ્રમાદે સઞ્જયતિ ઉત ॥ ૧૪-૯॥

હે ભારત! સત્ત્વમ્ (દેહિનામ્) સુખે સઞ્જયતિ, રજઃ કર્મણિ,

ઉત તમઃ તુ જ્ઞાનમ્ આવૃત્ય પ્રમાદે સઞ્જયતિ ।

રજસ્તમશ્ચાભિભૂય સત્ત્વં ભવતિ ભારત ।
રજઃ સત્ત્વં તમશ્ચૈવ તમઃ સત્ત્વં રજસ્તથા ॥ ૧૪-૧૦॥

રજઃ તમઃ ચ અભિભૂય સત્ત્વમ્ ભવતિ ભારત ।
રજઃ સત્ત્વમ્ તમઃ ચ એવ તમઃ સત્ત્વમ્ રજઃ તથા ॥ ૧૪-૧૦॥

હે ભારત! સત્ત્વમ્, રજઃ તમઃ એવ અભિભૂય (સ્વયં) ભવતિ;
ચ રજઃ, સત્ત્વમ્ તમઃ ચ (અભિભૂય સ્વયં ભવતિ); તથા તમઃ,
સત્ત્વમ્ રજઃ (અભિભૂય સ્વયં ભવતિ)।

સર્વદ્વારેષુ દેહેઽસ્મિન્પ્રકાશ ઉપજાયતે ।
જ્ઞાનં યદા તદા વિદ્યાદ્વિવૃદ્ધં સત્ત્વમિત્યુત ॥ ૧૪-૧૧॥

સર્વ-દ્વારેષુ દેહે અસ્મિન્ પ્રકાશઃ ઉપજાયતે ।
જ્ઞાનમ્ યદા તદા વિદ્યાત્ વિવૃદ્ધમ્ સત્ત્વમ્ ઇતિ ઉત ॥ ૧૪-૧૧॥

ઉત યદા અસ્મિન્ દેહે સર્વ-દ્વારેષુ પ્રકાશઃ જ્ઞાનમ્ (ચ)
ઉપજાયતે, તદા સત્ત્વમ્ વિવૃદ્ધમ્ ઇતિ વિદ્યાત્ ।

લોભઃ પ્રવૃત્તિરારમ્ભઃ કર્મણામશમઃ સ્પૃહા ।
રજસ્યેતાનિ જાયન્તે વિવૃદ્ધે ભરતર્ષભ ॥ ૧૪-૧૨॥

લોભઃ પ્રવૃત્તિઃ આરમ્ભઃ કર્મણામ્ અશમઃ સ્પૃહા ।
રજસિ એતાનિ જાયન્તે વિવૃદ્ધે ભરતર્ષભ ॥ ૧૪-૧૨॥

હે ભરતર્ષભ! લોભઃ, પ્રવૃત્તિઃ, કર્મણામ્ આરમ્ભઃ,
અશમઃ, સ્પૃહા એતાનિ (ચિહ્નાનિ) રજસિ વિવૃદ્ધે (સતિ) જાયન્તે ।

અપ્રકાશોઽપ્રવૃત્તિશ્ચ પ્રમાદો મોહ એવ ચ ।
તમસ્યેતાનિ જાયન્તે વિવૃદ્ધે કુરુનન્દન ॥ ૧૪-૧૩॥

અપ્રકાશઃ અપ્રવૃત્તિઃ ચ પ્રમાદઃ મોહઃ એવ ચ ।
તમસિ એતાનિ જાયન્તે વિવૃદ્ધે કુરુ-નન્દન ॥ ૧૪-૧૩॥

હે કુરુ-નન્દન! અપ્રકાશઃ, અપ્રવૃત્તિઃ ચ, પ્રમાદઃ ચ,
મોહઃ એવ એતાનિ (ચિહ્નાનિ) તમસિ વિવૃદ્ધે (સતિ) જાયન્તે ।

યદા સત્ત્વે પ્રવૃદ્ધે તુ પ્રલયં યાતિ દેહભૃત્ ।
તદોત્તમવિદાં લોકાનમલાન્પ્રતિપદ્યતે ॥ ૧૪-૧૪॥

યદા સત્ત્વે પ્રવૃદ્ધે તુ પ્રલયમ્ યાતિ દેહ-ભૃત્ ।
તદા ઉત્તમ-વિદામ્ લોકાન્ અમલાન્ પ્રતિપદ્યતે ॥ ૧૪-૧૪॥

યદા તુ સત્ત્વે પ્રવૃદ્ધે (સતિ) દેહ-ભૃત્ પ્રલયમ્ યાતિ
તદા ઉત્તમ-વિદામ્ અમલાન્ લોકાન્ પ્રતિપદ્યતે ।

રજસિ પ્રલયં ગત્વા કર્મસઙ્ગિષુ જાયતે ।
તથા પ્રલીનસ્તમસિ મૂઢયોનિષુ જાયતે ॥ ૧૪-૧૫॥

રજસિ પ્રલયમ્ ગત્વા કર્મ-સઙ્ગિષુ જાયતે ।
તથા પ્રલીનઃ તમસિ મૂઢ-યોનિષુ જાયતે ॥ ૧૪-૧૫॥

(દેહ-ભૃત્) રજસિ પ્રલયમ્ ગત્વા કર્મ-સઙ્ગિષુ જાયતે ।
તથા (સઃ) તમસિ પ્રલીનઃ મૂઢ-યોનિષુ જાયતે ।

કર્મણઃ સુકૃતસ્યાહુઃ સાત્ત્વિકં નિર્મલં ફલમ્ ।
રજસસ્તુ ફલં દુઃખમજ્ઞાનં તમસઃ ફલમ્ ॥ ૧૪-૧૬॥

કર્મણઃ સુકૃતસ્ય આહુઃ સાત્ત્વિકમ્ નિર્મલમ્ ફલમ્ ।
રજસઃ તુ ફલમ્ દુઃખમ્ અજ્ઞાનમ્ તમસઃ ફલમ્ ॥ ૧૪-૧૬॥

સુકૃતસ્ય કર્મણઃ સાત્ત્વિકમ્ નિર્મલમ્ ફલમ્, રજસઃ ફલમ્
તુ દુઃખમ્, તમસઃ (ચ) ફલમ્ અજ્ઞાનમ્ (ઇતિ) આહુઃ ।

સત્ત્વાત્સઞ્જાયતે જ્ઞાનં રજસો લોભ એવ ચ ।
પ્રમાદમોહૌ તમસો ભવતોઽજ્ઞાનમેવ ચ ॥ ૧૪-૧૭॥

સત્ત્વાત્ સઞ્જાયતે જ્ઞાનમ્ રજસઃ લોભઃ એવ ચ ।
પ્રમાદ-મોહૌ તમસઃ ભવતઃ અજ્ઞાનમ્ એવ ચ ॥ ૧૪-૧૭॥

સત્ત્વાત્ જ્ઞાનમ્ સઞ્જાયતે, રજસઃ લોભઃ એવ ચ
(સઞ્જાયતે), તમસઃ પ્રમાદ-મોહૌ ભવતઃ, અજ્ઞાનમ્ ચ એવ
(ભવતિ) ।

ઊર્ધ્વં ગચ્છન્તિ સત્ત્વસ્થા મધ્યે તિષ્ઠન્તિ રાજસાઃ ।
જઘન્યગુણવૃત્તિસ્થા અધો ગચ્છન્તિ તામસાઃ ॥ ૧૪-૧૮॥

ઊર્ધ્વમ્ ગચ્છન્તિ સત્ત્વસ્થાઃ મધ્યે તિષ્ઠન્તિ રાજસાઃ ।
જઘન્ય-ગુણ-વૃત્તિસ્થાઃ અધઃ ગચ્છન્તિ તામસાઃ ॥ ૧૪-૧૮॥

સત્ત્વસ્થાઃ ઊર્ધ્વમ્ ગચ્છન્તિ, રાજસાઃ મધ્યે તિષ્ઠન્તિ,
જઘન્ય-ગુણ-વૃત્તિસ્થાઃ તામસાઃ અધઃ ગચ્છન્તિ ।

નાન્યં ગુણેભ્યઃ કર્તારં યદા દ્રષ્ટાનુપશ્યતિ ।
ગુણેભ્યશ્ચ પરં વેત્તિ મદ્ભાવં સોઽધિગચ્છતિ ॥ ૧૪-૧૯॥

ન અન્યમ્ ગુણેભ્યઃ કર્તારમ્ યદા દ્રષ્ટા અનુપશ્યતિ ।
ગુણેભ્યઃ ચ પરમ્ વેત્તિ મત્-ભાવમ્ સઃ અધિગચ્છતિ ॥ ૧૪-૧૯॥

યદા દ્રષ્ટા ગુણેભ્યઃ અન્યમ્ કર્તારમ્ ન અનુપશ્યતિ, ગુણેભ્યઃ
ચ પરમ્ (આત્માનં) વેત્તિ, (તદા) સઃ મત્-ભાવમ્ અધિગચ્છતિ ।

ગુણાનેતાનતીત્ય ત્રીન્દેહી દેહસમુદ્ભવાન્ ।
જન્મમૃત્યુજરાદુઃખૈર્વિમુક્તોઽમૃતમશ્નુતે ॥ ૧૪-૨૦॥

ગુણાન્ એતાન્ અતીત્ય ત્રીન્ દેહી દેહ-સમુદ્ભવાન્ ।
જન્મ-મૃત્યુ-જરા-દુઃખૈઃ વિમુક્તઃ અમૃતમ્ અશ્નુતે ॥ ૧૪-૨૦॥

દેહી એતાન્ દેહ-સમુદ્ભવાન્ ત્રીન્ ગુણાન્ અતીત્ય,
જન્મ-મૃત્યુ-જરા-દુઃખૈઃ વિમુક્તઃ (સન્) અમૃતમ્ અશ્નુતે ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

કૈર્લિઙ્ગૈસ્ત્રીન્ગુણાનેતાનતીતો ભવતિ પ્રભો ।
કિમાચારઃ કથં ચૈતાંસ્ત્રીન્ગુણાનતિવર્તતે ॥ ૧૪-૨૧॥

કૈઃ લિઙ્ગૈઃ ત્રીન્ ગુણાન્ એતાન્ અતીતઃ ભવતિ પ્રભો ।
કિમ્ આચારઃ કથમ્ ચ એતાન્ ત્રીન્ ગુણાન્ અતિવર્તતે ॥ ૧૪-૨૧॥

હે પ્રભો! એતાન્ ત્રીન્ ગુણાન્ અતીતઃ (જીવઃ) કૈઃ લિઙ્ગૈઃ
(જ્ઞાતઃ) ભવતિ? (સઃ) ચ કિમ્ આચારઃ? (સઃ)
ચ એતાન્ ત્રીન્ ગુણાન્ કથમ્ અતિવર્તતે?

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

પ્રકાશં ચ પ્રવૃત્તિં ચ મોહમેવ ચ પાણ્ડવ ।
ન દ્વેષ્ટિ સમ્પ્રવૃત્તાનિ ન નિવૃત્તાનિ કાઙ્ક્ષતિ ॥ ૧૪-૨૨॥

પ્રકાશમ્ ચ પ્રવૃત્તિમ્ ચ મોહમ્ એવ ચ પાણ્ડવ ।

ન દ્વેષ્ટિ સમ્પ્રવૃત્તાનિ ન નિવૃત્તાનિ કાઙ્ક્ષતિ ॥ ૧૪-૨૨॥

હે પાણ્ડવ! પ્રકાશમ્ ચ પ્રવૃત્તિમ્ ચ મોહમ્ એવ ચ
સમ્પ્રવૃત્તાનિ ન દ્વેષ્ટિ, નિવૃત્તાનિ (ચ) ન કાઙ્ક્ષતિ ।

ઉદાસીનવદાસીનો ગુણૈર્યો ન વિચાલ્યતે ।
ગુણા વર્તન્ત ઇત્યેવં યોઽવતિષ્ઠતિ નેઙ્ગતે ॥ ૧૪-૨૩॥

ઉદાસીનવત્ આસીનઃ ગુણૈઃ યઃ ન વિચાલ્યતે ।
ગુણાઃ વર્તન્તે ઇતિ એવમ્ યઃ અવતિષ્ઠતિ ન ઇઙ્ગતે ॥ ૧૪-૨૩॥

યઃ ઉદાસીનવત્ આસીનઃ ગુણૈઃ ન વિચાલ્યતે, યઃ (ચ) ગુણાઃ
વર્તન્તે ઇતિ (મત્વા) એવમ્ અવતિષ્ઠતિ, (ચ) ન ઇઙ્ગતે ।

સમદુઃખસુખઃ સ્વસ્થઃ સમલોષ્ટાશ્મકાઞ્ચનઃ ।
તુલ્યપ્રિયાપ્રિયો ધીરસ્તુલ્યનિન્દાત્મસંસ્તુતિઃ ॥ ૧૪-૨૪॥

સમ-દુઃખ-સુખઃ સ્વસ્થઃ સમ-લોષ્ટ-અશ્મ-કાઞ્ચનઃ ।
તુલ્ય-પ્રિય-અપ્રિયઃ ધીરઃ તુલ્ય-નિન્દા-આત્મ-સંસ્તુતિઃ ॥ ૧૪-૨૪॥

(યઃ) સમ-દુઃખ-સુખઃ, સ્વસ્થઃ, સમ-લોષ્ટ-અશ્મ-કાઞ્ચનઃ,
તુલ્ય-પ્રિય-અપ્રિયઃ, ધીરઃ, તુલ્ય-નિન્દા-આત્મ-સંસ્તુતિઃ,

માનાપમાનયોસ્તુલ્યસ્તુલ્યો મિત્રારિપક્ષયોઃ ।
સર્વારમ્ભપરિત્યાગી ગુણાતીતઃ સ ઉચ્યતે ॥ ૧૪-૨૫॥

માન-અપમાનયોઃ તુલ્યઃ તુલ્યઃ મિત્ર-અરિ-પક્ષયોઃ ।
સર્વ-આરમ્ભ-પરિત્યાગી ગુણાતીતઃ સઃ ઉચ્યતે ॥ ૧૪-૨૫॥

(યઃ) માન-અપમાનયોઃ તુલ્યઃ, મિત્ર-અરિ-પક્ષયોઃ તુલ્યઃ,
સર્વ-આરમ્ભ-પરિત્યાગી (ચ અસ્તિ) સઃ ગુણાતીતઃ ઉચ્યતે ।

માં ચ યોઽવ્યભિચારેણ ભક્તિયોગેન સેવતે ।
સ ગુણાન્સમતીત્યૈતાન્બ્રહ્મભૂયાય કલ્પતે ॥ ૧૪-૨૬॥

મામ્ ચ યઃ અવ્યભિચારેણ ભક્તિ-યોગેન સેવતે ।
સઃ ગુણાન્ સમતીત્ય એતાન્ બ્રહ્મ-ભૂયાય કલ્પતે ॥ ૧૪-૨૬॥

યઃ મામ્ ચ અવ્યભિચારેણ ભક્તિ-યોગેન સેવતે, સઃ એતાન્
ગુણાન્ સમતીત્ય, બ્રહ્મ-ભૂયાય કલ્પતે ।

બ્રહ્મણો હિ પ્રતિષ્ઠાહમમૃતસ્યાવ્યયસ્ય ચ ।
શાશ્વતસ્ય ચ ધર્મસ્ય સુખસ્યૈકાન્તિકસ્ય ચ ॥ ૧૪-૨૭॥

બ્રહ્મણઃ હિ પ્રતિષ્ઠા અહમ્ અમૃતસ્ય અવ્યયસ્ય ચ ।
શાશ્વતસ્ય ચ ધર્મસ્ય સુખસ્ય એકાન્તિકસ્ય ચ ॥ ૧૪-૨૭॥

અમૃતસ્ય અવ્યયસ્ય ચ બ્રહ્મણઃ, શાશ્વતસ્ય ચ ધર્મસ્ય,
એકાન્તિકસ્ય સુખસ્ય ચ હિ અહમ્ પ્રતિષ્ઠા (અસ્મિ) ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
ગુણત્રયવિભાગયોગો નામ ચતુર્દશોઽધ્યાયઃ ॥ ૧૪॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદે
ગુણ-ત્રય-વિભાગ-યોગઃ નામ ચતુર્દશઃ અધ્યાયઃ ॥ ૧૪॥

---

અથ પઞ્ચદશોઽધ્યાયઃ । પુરુષોત્તમયોગઃ ।
અથ પઞ્ચદશઃ અધ્યાયઃ । પુરુષોત્તમ-યોગઃ ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

ઊર્ધ્વમૂલમધઃશાખમશ્વત્થં પ્રાહુરવ્યયમ્ ।
છન્દાંસિ યસ્ય પર્ણાનિ યસ્તં વેદ સ વેદવિત્ ॥ ૧૫-૧॥

ઊર્ધ્વ-મૂલમ્ અધઃ-શાખમ્ અશ્વત્થમ્ પ્રાહુઃ અવ્યયમ્ ।
છન્દાંસિ યસ્ય પર્ણાનિ યઃ તમ્ વેદ સઃ વેદવિત્ ॥ ૧૫-૧॥

છન્દાંસિ યસ્ય પર્ણાનિ (સન્તિ તં) અશ્વત્થમ્ ઊર્ધ્વ-મૂલમ્
અધઃ-શાખમ્ અવ્યયમ્ પ્રાહુઃ । યઃ તમ્ વેદ, સઃ વેદવિત્ (ઇતિ ઉચ્યતે)।

અધશ્ચોર્ધ્વં પ્રસૃતાસ્તસ્ય શાખા
 ગુણપ્રવૃદ્ધા વિષયપ્રવાલાઃ ।
અધશ્ચ મૂલાન્યનુસન્તતાનિ
 કર્માનુબન્ધીનિ મનુષ્યલોકે ॥ ૧૫-૨॥

અધઃ ચ ઊર્ધ્વમ્ પ્રસૃતાઃ તસ્ય શાખાઃ

ગુણ-પ્રવૃદ્ધાઃ વિષય-પ્રવાલાઃ ।
અધઃ ચ મૂલાનિ અનુસન્તતાનિ
કર્મ-અનુબન્ધીનિ મનુષ્ય-લોકે ॥ ૧૫-૨ ॥

તસ્ય ગુણ-પ્રવૃદ્ધાઃ વિષય-પ્રવાલાઃ શાખાઃ અધઃ
ઊર્ધ્વમ્ ચ પ્રસૃતાઃ (સન્તિ) અધઃ ચ મનુષ્ય-લોકે
કર્મ-અનુબન્ધીનિ મૂલાનિ અનુસન્તતાનિ (સન્તિ)।

ન રૂપમસ્યેહ તથોપલભ્યતે
નાન્તો ન ચાદિર્ન ચ સમ્પ્રતિષ્ઠા ।
અશ્વત્થમેનં સુવિરૂઢમૂલં
અસઙ્ગશસ્ત્રેણ દૃઢેન છિત્ત્વા ॥ ૧૫-૩ ॥

ન રૂપમ્ અસ્ય ઇહ તથા ઉપલભ્યતે
ન અન્તઃ ન ચ આદિઃ ન ચ સમ્પ્રતિષ્ઠા ।
અશ્વત્થમ્ એનમ્ સુવિરૂઢ-મૂલમ્
અસઙ્ગ-શસ્ત્રેણ દૃઢેન છિત્ત્વા ॥ ૧૫-૩ ॥

(યથા અયં વર્ણિતઃ) તથા અસ્ય રૂપમ્ ઇહ ન ઉપલભ્યતે ।
(અસ્ય) અન્તઃ ન, આદિઃ ચ ન, સમ્પ્રતિષ્ઠા ચ ન (ઉપલભ્યતે),
સુવિરૂઢ-મૂલમ્ એનમ્ અશ્વત્થમ્ દૃઢેન અસઙ્ગ-શસ્ત્રેણ છિત્ત્વા,

તતઃ પદં તત્પરિમાર્ગિતવ્યં
યસ્મિન્ગતા ન નિવર્તન્તિ ભૂયઃ ।
તમેવ ચાદ્યં પુરુષં પ્રપદ્યે ।
યતઃ પ્રવૃત્તિઃ પ્રસૃતા પુરાણી ॥ ૧૫-૪ ॥

તતઃ પદમ્ તત્ પરિમાર્ગિતવ્યં
યસ્મિન્ ગતાઃ ન નિવર્તન્તિ ભૂયઃ ।
તમ્ એવ ચ આદ્યમ્ પુરુષમ્ પ્રપદ્યે ।
યતઃ પ્રવૃત્તિઃ પ્રસૃતા પુરાણી ॥ ૧૫-૪ ॥

તતઃ યતઃ પુરાણી પ્રવૃત્તિઃ પ્રસૃતા તમ્ એવ ચ આદ્યમ્
પુરુષમ્ પ્રપદ્યે, (ઇતિ) તત્ પદમ્ પરિમાર્ગિતવ્યં, યસ્મિન્
ગતાઃ ભૂયઃ ન નિવર્તન્તિ ।

નિર્માનમોહા જિતસઙ્ગદોષા

અધ્યાત્મનિત્યા વિનિવૃત્તકામાઃ ।
દ્વન્દ્વૈર્વિમુક્તાઃ સુખદુઃખસંજ્ઞૈર્-
ગચ્છન્ત્યમૂઢાઃ પદમવ્યયં તત્ ॥ ૧૫-૫॥

નિર્માન-મોહાઃ જિતસઙ્ગદોષાઃ
અધ્યાત્મ-નિત્યાઃ વિનિવૃત્ત-કામાઃ ।
દ્વન્દ્વૈઃ વિમુક્તાઃ સુખ-દુઃખ-સંજ્ઞૈઃ
ગચ્છન્તિ અમૂઢાઃ પદમ્ અવ્યયં તત્ ॥ ૧૫-૫॥

નિર્માન-મોહાઃ, જિતસઙ્ગદોષાઃ, અધ્યાત્મ-નિત્યાઃ,
વિનિવૃત્ત-કામાઃ, સુખ-દુઃખ-સંજ્ઞૈઃ દ્વન્દ્વૈઃ વિમુક્તાઃ,
અમૂઢાઃ, તત્ અવ્યયં પદમ્ ગચ્છન્તિ ।

ન તદ્ભાસયતે સૂર્યો ન શશાઙ્કો ન પાવકઃ ।
યદ્ગત્વા ન નિવર્તન્તે તદ્ધામ પરમં મમ ॥ ૧૫-૬॥

ન તત્ ભાસયતે સૂર્યઃ ન શશાઙ્કઃ ન પાવકઃ ।
યત્ ગત્વા ન નિવર્તન્તે તત્ ધામ પરમમ્ મમ ॥ ૧૫-૬॥

ન સૂર્યઃ, ન શશાઙ્કઃ, ન પાવકઃ (ચ) તત્ (પદં) ભાસયતે ।
યત્ ગત્વા ન નિવર્તન્તે તત્ મમ પરમમ્ ધામ ।

મમૈવાંશો જીવલોકે જીવભૂતઃ સનાતનઃ ।
મનઃષષ્ઠાનીન્દ્રિયાણિ પ્રકૃતિસ્થાનિ કર્ષતિ ॥ ૧૫-૭॥

મમ એવ અંશઃ જીવ-લોકે જીવ-ભૂતઃ સનાતનઃ ।
મનઃ-ષષ્ઠાનિ-ઇન્દ્રિયાણિ પ્રકૃતિ-સ્થાનિ કર્ષતિ ॥ ૧૫-૭॥

(અસ્મિન્) જીવ-લોકે મમ એવ સનાતનઃ અંશઃ જીવ-ભૂતઃ
(અસ્તિ, સઃ) પ્રકૃતિ-સ્થાનિ મનઃ-ષષ્ઠાનિ-ઇન્દ્રિયાણિ કર્ષતિ ।

શરીરં યદવાપ્નોતિ યચ્ચાપ્યુત્ક્રામતીશ્વરઃ ।
ગૃહીત્વૈતાનિ સંયાતિ વાયુર્ગન્ધાનિવાશયાત્ ॥ ૧૫-૮॥

શરીરમ્ યત્ અવાપ્નોતિ યત્ ચ અપિ ઉત્ક્રામતિ ઈશ્વરઃ ।
ગૃહીત્વા એતાનિ સંયાતિ વાયુઃ ગન્ધાન્ ઇવ આશયાત્ ॥ ૧૫-૮॥

યત્ (એષઃ) ઈશ્વરઃ શરીરમ્ અવાપ્નોતિ, અપિ ચ યત્ ઉત્ક્રામતિ
(તત્) વાયુઃ આશયાત્ ગન્ધાન્ ઇવ, એતાનિ ગૃહીત્વા સંયાતિ ।

શ્રોત્રં ચક્ષુઃ સ્પર્શનં ચ રસનં ઘ્રાણમેવ ચ ।
અધિષ્ઠાય મનશ્ચાયં વિષયાનુપસેવતે ॥ ૧૫-૯॥

શ્રોત્રમ્ ચક્ષુઃ સ્પર્શનમ્ ચ રસનમ્ ઘ્રાણમ્ એવ ચ ।
અધિષ્ઠાય મનઃ ચ અયમ્ વિષયાન્ ઉપસેવતે ॥ ૧૫-૯॥

અયમ્ (જીવઃ) શ્રોત્રમ્ ચક્ષુઃ સ્પર્શનમ્ ચ, રસનમ્
ઘ્રાણમ્ મનઃ ચ એવ અધિષ્ઠાય વિષયાન્ ઉપસેવતે ।

ઉત્ક્રામન્તં સ્થિતં વાપિ ભુઞ્જાનં વા ગુણાન્વિતમ્ ।
વિમૂઢા નાનુપશ્યન્તિ પશ્યન્તિ જ્ઞાનચક્ષુષઃ ॥ ૧૫-૧૦॥

ઉત્ક્રામન્તમ્ સ્થિતમ્ વા અપિ ભુઞ્જાનમ્ વા ગુણ-અન્વિતમ્ ।
વિમૂઢાઃ ન અનુપશ્યન્તિ પશ્યન્તિ જ્ઞાન-ચક્ષુષઃ ॥ ૧૫-૧૦॥

ઉત્ક્રામન્તમ્ સ્થિતમ્ વા, ભુઞ્જાનમ્ ગુણ-અન્વિતમ્ વા અપિ
વિમૂઢાઃ ન અનુપશ્યન્તિ, જ્ઞાન-ચક્ષુષઃ પશ્યન્તિ ।

યતન્તો યોગિનશ્ચૈનં પશ્યન્ત્યાત્મન્યવસ્થિતમ્ ।
યતન્તોઽપ્યકૃતાત્માનો નૈનં પશ્યન્ત્યચેતસઃ ॥ ૧૫-૧૧॥

યતન્તઃ યોગિનઃ ચ એનમ્ પશ્યન્તિ આત્મનિ અવસ્થિતમ્ ।
યતન્તઃ અપિ અકૃત-આત્માનઃ ન એનમ્ પશ્યન્તિ અચેતસઃ ॥ ૧૫-૧૧॥

યતન્તઃ યોગિનઃ આત્મનિ અવસ્થિતમ્ એનમ્ પશ્યન્તિ, અચેતસઃ
અકૃત-આત્માનઃ ચ યતન્તઃ અપિ એનમ્ ન પશ્યન્તિ ।

યદાદિત્યગતં તેજો જગદ્ભાસયતેઽખિલમ્ ।
યચ્ચન્દ્રમસિ યચ્ચાગ્નૌ તત્તેજો વિદ્ધિ મામકમ્ ॥ ૧૫-૧૨॥

યત્ આદિત્ય-ગતં તેજઃ જગત્ ભાસયતે અખિલમ્ ।
યત્ ચન્દ્રમસિ યત્ ચ અગ્નૌ તત્ તેજઃ વિદ્ધિ મામકમ્ ॥ ૧૫-૧૨॥

યત્ આદિત્ય-ગતં તેજઃ અખિલમ્ જગત્ ભાસયતે, યત્ ચ ચન્દ્રમસિ,
યત્ ચ અગ્નૌ (સ્થિતં અસ્તિ), તત્ મામકમ્ તેજઃ (અસ્તિ ઇતિ ત્વં) વિદ્ધિ ।

ગામાવિશ્ય ચ ભૂતાનિ ધારયામ્યહમોજસા ।
પુષ્ણામિ ચૌષધીઃ સર્વાઃ સોમો ભૂત્વા રસાત્મકઃ ॥ ૧૫-૧૩॥

ગામ્ આવિશ્ય ચ ભૂતાનિ ધારયામિ અહમ્ ઓજસા ।
પુષ્ણામિ ચ ઓષધીઃ સર્વાઃ સોમઃ ભૂત્વા રસાત્મકઃ ॥ ૧૫-૧૩॥

અહમ્ ચ ગામ્ આવિશ્ય ભૂતાનિ ઓજસા ધારયામિ । રસાત્મકઃ
સોમઃ ભૂત્વા ચ સર્વાઃ ઓષધીઃ પુષ્ણામિ ।

અહં વૈશ્વાનરો ભૂત્વા પ્રાણિનાં દેહમાશ્રિતઃ ।
પ્રાણાપાનસમાયુક્તઃ પચામ્યન્નં ચતુર્વિધમ્ ॥ ૧૫-૧૪॥

અહમ્ વૈશ્વાનરઃ ભૂત્વા પ્રાણિનામ્ દેહમ્ આશ્રિતઃ ।
પ્રાણ-અપાન-સમ-આયુક્તઃ પચામિ અન્નમ્ ચતુર્વિધમ્ ॥ ૧૫-૧૪॥

અહમ્ પ્રાણિનામ્ દેહમ્ આશ્રિતઃ પ્રાણ-અપાન-સમ-આયુક્તઃ
વૈશ્વાનરઃ ભૂત્વા ચતુર્વિધમ્ અન્નમ્ પચામિ ।

સર્વસ્ય ચાહં હૃદિ સન્નિવિષ્ટો
 મત્તઃ સ્મૃતિર્જ્ઞાનમપોહનઞ્ચ ।
વેદૈશ્ચ સર્વૈરહમેવ વેદ્યો
 વેદાન્તકૃદ્વેદવિદેવ ચાહમ્ ॥ ૧૫-૧૫॥

સર્વસ્ય ચ અહમ્ હૃદિ સન્નિવિષ્ટઃ
 મત્તઃ સ્મૃતિઃ જ્ઞાનમ્ અપોહનમ્ ચ ।
વેદૈઃ ચ સર્વૈઃ અહમ્ એવ વેદ્યઃ
 વેદાન્ત-કૃત્ વેદ-વિત્ એવ ચ અહમ્ ॥ ૧૫-૧૫॥

અહમ્ સર્વસ્ય હૃદિ સન્નિવિષ્ટઃ (અસ્મિ), મત્તઃ (સર્વસ્ય)
સ્મૃતિઃ જ્ઞાનમ્ અપોહનમ્ ચ (ભવતિ) અહમ્ ચ એવ
સર્વૈઃ વેદૈઃ વેદ્યઃ (અસ્મિ), અહમ્ એવ ચ વેદાન્ત-કૃત્
વેદ-વિત્ ચ (અસ્મિ) ।

દ્વાવિમૌ પુરુષૌ લોકે ક્ષરશ્ચાક્ષર એવ ચ ।
ક્ષરઃ સર્વાણિ ભૂતાનિ કૂટસ્થોઽક્ષર ઉચ્યતે ॥ ૧૫-૧૬॥

દ્વૌ ઇમૌ પુરુષૌ લોકે ક્ષરઃ ચ અક્ષરઃ એવ ચ ।
ક્ષરઃ સર્વાણિ ભૂતાનિ કૂટસ્થઃ અક્ષરઃ ઉચ્યતે ॥ ૧૫-૧૬॥

(અસ્મિન્) લોકે ક્ષરઃ અક્ષરઃ ચ એવ ઇમૌ દ્વૌ પુરુષૌ (સ્તઃ),
સર્વાણિ ભૂતાનિ ક્ષરઃ, કૂટસ્થઃ ચ અક્ષરઃ ઉચ્યતે ।

ઉત્તમઃ પુરુષસ્ત્વન્યઃ પરમાત્મેત્યુદાહૃતઃ ।
યો લોકત્રયમાવિશ્ય બિભર્ત્યવ્યય ઈશ્વરઃ ॥ ૧૫-૧૭॥

ઉત્તમઃ પુરુષઃ તુ અન્યઃ પરમ્-આત્મા ઇતિ ઉદાહૃતઃ ।
યઃ લોક-ત્રયમ્ આવિશ્ય બિભર્તિ અવ્યયઃ ઈશ્વરઃ ॥ ૧૫-૧૭॥

ઉત્તમઃ પુરુષઃ તુ અન્યઃ (અસ્તિ), (સઃ) પરમ્-આત્મા ઇતિ
ઉદાહૃતઃ યઃ અવ્યયઃ ઈશ્વરઃ લોક-ત્રયમ્ આવિશ્ય (તત્) બિભર્તિ ।

યસ્માત્ક્ષરમતીતોઽહમક્ષરાદપિ ચોત્તમઃ ।
અતોઽસ્મિ લોકે વેદે ચ પ્રથિતઃ પુરુષોત્તમઃ ॥ ૧૫-૧૮॥

યસ્માત્ ક્ષરમ્ અતીતઃ અહમ્ અક્ષરાત્ અપિ ચ ઉત્તમઃ ।
અતઃ અસ્મિ લોકે વેદે ચ પ્રથિતઃ પુરુષોત્તમઃ ॥ ૧૫-૧૮॥

યસ્માત્ અહમ્ ક્ષરમ્ અતીતઃ, અક્ષરાત્ અપિ ચ ઉત્તમઃ
(અસ્મિ), અતઃ (અહં) લોકે વેદે ચ પુરુષોત્તમઃ ઇતિ પ્રથિતઃ અસ્મિ ।

યો મામેવમસમ્મૂઢો જાનાતિ પુરુષોત્તમમ્ ।
સ સર્વવિદ્ભજતિ માં સર્વભાવેન ભારત॥ ૧૫-૧૯॥

યઃ મામ્ એવમ્ અસમ્મૂઢઃ જાનાતિ પુરુષોત્તમમ્ ।
સઃ સર્વ-વિત્ ભજતિ મામ્ સર્વ-ભાવેન ભારત ॥ ૧૫-૧૯॥

હે ભારત! યઃ અસમ્મૂઢઃ મામ્ પુરુષોત્તમમ્ એવમ્ જાનાતિ,
સઃ સર્વ-વિત્ (ભૂત્વા) મામ્ સર્વ-ભાવેન ભજતિ ।

ઇતિ ગુહ્યતમં શાસ્ત્રમિદમુક્તં મયાનઘ ।
એતદ્બુદ્ધ્વા બુદ્ધિમાન્સ્યાત્કૃતકૃત્યશ્ચ ભારત ॥ ૧૫-૨૦॥

ઇતિ ગુહ્યતમમ્ શાસ્ત્રમ્ ઇદમ્ ઉક્તમ્ મયા અનઘ ।
એતત્ બુદ્ધ્વા બુદ્ધિમાન્ સ્યાત્ કૃતકૃત્યઃ ચ ભારત ॥ ૧૫-૨૦॥

હે અનઘ! ઇતિ ગુહ્યતમમ્ ઇદમ્ શાસ્ત્રમ્ મયા ઉક્તમ્,
હે ભારત! એતત્ બુદ્ધ્વા (જીવઃ) બુદ્ધિમાન્ કૃતકૃત્યઃ ચ સ્યાત્ ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
પુરુષોત્તમયોગો નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૧૫॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદેપુરુષોત્તમ-યોગો

નામ પઞ્ચદશઃ અધ્યાયઃ ॥ ૧૫॥

---

અથ ષોડશોઽધ્યાયઃ । દૈવાસુરસમ્પદ્વિભાગયોગઃ ।
અથ ષોડશઃ અધ્યાયઃ । દૈવ-આસુર-સમ્પત્-વિભાગ-યોગઃ ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

અભયં સત્ત્વસંશુદ્ધિર્જ્ઞાનયોગવ્યવસ્થિતિઃ ।
દાનં દમશ્ચ યજ્ઞશ્ચ સ્વાધ્યાયસ્તપ આર્જવમ્ ॥ ૧૬-૧॥

અભયમ્ સત્ત્વ-સંશુદ્ધિઃ જ્ઞાન-યોગ-વ્યવસ્થિતિઃ ।
દાનમ્ દમઃ ચ યજ્ઞઃ ચ સ્વાધ્યાયઃ તપઃ આર્જવમ્ ॥ ૧૬-૧॥

અભયમ્, સત્ત્વ-સંશુદ્ધિઃ, જ્ઞાન-યોગ-વ્યવસ્થિતિઃ, દાનમ્,
દમઃ ચ યજ્ઞઃ ચ, સ્વાધ્યાયઃ, તપઃ, આર્જવમ્,

અહિંસા સત્યમક્રોધસ્ત્યાગઃ શાન્તિરપૈશુનમ્ ।
દયા ભૂતેષ્વલોલુપ્ત્વં માર્દવં હ્રીરચાપલમ્ ॥ ૧૬-૨॥

અહિંસા સત્યમ્ અક્રોધઃ ત્યાગઃ શાન્તિઃ અપૈશુનમ્ ।
દયા ભૂતેષુ અલોલુપ્ત્વમ્ માર્દવમ્ હ્રીઃ અચાપલમ્ ॥ ૧૬-૨॥

અહિંસા, સત્યમ્, અક્રોધઃ, ત્યાગઃ, શાન્તિઃ, અપૈશુનમ્,
ભૂતેષુ દયા, અલોલુપ્ત્વમ્, માર્દવમ્, હ્રીઃ, અચાપલમ્,

તેજઃ ક્ષમા ધૃતિઃ શૌચમદ્રોહો નાતિમાનિતા ।
ભવન્તિ સમ્પદં દૈવીમભિજાતસ્ય ભારત ॥ ૧૬-૩॥

તેજઃ ક્ષમા ધૃતિઃ શૌચમ્ અદ્રોહઃ ન અતિ-માનિતા ।
ભવન્તિ સમ્પદમ્ દૈવીમ્ અભિજાતસ્ય ભારત ॥ ૧૬-૩॥

હે ભારત! તેજઃ, ક્ષમા, ધૃતિઃ, શૌચમ્, અદ્રોહઃ,
ન અતિ-માનિતા (ઇતિ એતાનિ લક્ષણાનિ) દૈવીમ્ સમ્પદમ્
અભિજાતસ્ય (પુરુષસ્ય) ભવન્તિ ।

દમ્ભો દર્પોઽભિમાનશ્ચ ક્રોધઃ પારુષ્યમેવ ચ ।
અજ્ઞાનં ચાભિજાતસ્ય પાર્થ સમ્પદમાસુરીમ્ ॥ ૧૬-૪॥

દમ્ભઃ દર્પઃ અભિમાનઃ ચ ક્રોધઃ પારુષ્યમ્ એવ ચ ।

અજ્ઞાનમ્ ચ અભિજાતસ્ય પાર્થ સમ્પદમ્ આસુરીમ્ ॥ ૧૬-૪॥

હે પાર્થ! દમ્ભઃ, દર્પઃ, અભિમાનઃ ચ, ક્રોધઃ, પારુષ્યમ્,
એવ ચ અજ્ઞાનમ્ ચ (એતાનિ લક્ષણાનિ) આસુરીમ્ સમ્પદમ્
અભિજાતસ્ય (પુરુષસ્ય ભવન્તિ) ।

દૈવી સમ્પદ્વિમોક્ષાય નિબન્ધાયાસુરી મતા ।
મા શુચઃ સમ્પદં દૈવીમભિજાતોઽસિ પાણ્ડવ ॥ ૧૬-૫॥

દૈવી સમ્પત્ વિમોક્ષાય નિબન્ધાય આસુરી મતા ।
મા શુચઃ સમ્પદમ્ દૈવીમ્ અભિજાતઃ અસિ પાણ્ડવ ॥ ૧૬-૫॥

દૈવી સમ્પત્ વિમોક્ષાય, આસુરી (સમ્પત્ ચ) નિબન્ધાય મતા ।
હે પાણ્ડવ! (ત્વં) દૈવીમ્ સમ્પદમ્ અભિજાતઃ અસિ, મા શુચઃ ।

દ્વૌ ભૂતસર્ગૌ લોકેઽસ્મિન્દૈવ આસુર એવ ચ ।
દૈવો વિસ્તરશઃ પ્રોક્ત આસુરં પાર્થ મે શ‍ૃણુ ॥ ૧૬-૬॥

દ્વૌ ભૂત-સર્ગૌ લોકે અસ્મિન્ દૈવઃ આસુરઃ એવ ચ ।
દૈવઃ વિસ્તરશઃ પ્રોક્તઃ આસુરમ્ પાર્થ મે શ‍ૃણુ ॥ ૧૬-૬॥

હે પાર્થ! અસ્મિન્ લોકે દૈવઃ આસુરઃ ચ એવ દ્વૌ
ભૂત-સર્ગૌ (સ્તઃ તત્ર) દૈવઃ વિસ્તરશઃ પ્રોક્તઃ આસુરમ્ મે શ‍ૃણુ ।

પ્રવૃત્તિં ચ નિવૃત્તિં ચ જના ન વિદુરાસુરાઃ ।
ન શૌચં નાપિ ચાચારો ન સત્યં તેષુ વિદ્યતે ॥ ૧૬-૭॥

પ્રવૃત્તિમ્ ચ નિવૃત્તિમ્ ચ જનાઃ ન વિદુઃ આસુરાઃ ।
ન શૌચમ્ ન અપિ ચ આચારઃ ન સત્યમ્ તેષુ વિદ્યતે ॥ ૧૬-૭॥

આસુરાઃ જનાઃ પ્રવૃત્તિમ્ ચ નિવૃત્તિમ્ ચ ન વિદુઃ, તેષુ ચ
ન શૌચમ્, ન આચારઃ, ન અપિ સત્યમ્ વિદ્યતે ।

અસત્યમપ્રતિષ્ઠં તે જગદાહુરનીશ્વરમ્ ।
અપરસ્પરસમ્ભૂતં કિમન્યત્કામહૈતુકમ્ ॥ ૧૬-૮॥

અસત્યમ્ અપ્રતિષ્ઠમ્ તે જગત્ આહુઃ અનીશ્વરમ્ ।
અપરસ્પર-સમ્ભૂતં કિમ્ અન્યત્ કામ-હૈતુકમ્ ॥ ૧૬-૮॥

(ઇદં) જગત્ અસત્યમ્, અપ્રતિષ્ઠમ્, અનીશ્વરમ્, અપરસ્પર-સમ્ભૂતં
કામ-હૈતુકમ્ (ચ અસ્તિ) અન્યત્ કિમ્ (ઇતિ) તે આહુઃ ।

એતાં દૃષ્ટિમવષ્ટભ્ય નષ્ટાત્માનોઽલ્પબુદ્ધયઃ ।
પ્રભવન્ત્યુગ્રકર્માણઃ ક્ષયાય જગતોઽહિતાઃ ॥ ૧૬-૯॥

એતામ્ દૃષ્ટિમ્ અવષ્ટભ્ય નષ્ટ-આત્માનઃ અલ્પ-બુદ્ધયઃ ।
પ્રભવન્તિ ઉગ્ર-કર્માણઃ ક્ષયાય જગતઃ અહિતાઃ ॥ ૧૬-૯॥

એતામ્ દૃષ્ટિમ્ અવષ્ટભ્ય નષ્ટ-આત્માનઃ, અલ્પ-બુદ્ધયઃ,
ઉગ્ર-કર્માણઃ, અહિતાઃ જગતઃ ક્ષયાય પ્રભવન્તિ ।

કામમાશ્રિત્ય દુષ્પૂરં દમ્ભમાનમદાન્વિતાઃ ।
મોહાદ્ગૃહીત્વા સદ્ગ્રાહાન્પ્રવર્તન્તેઽશુચિવ્રતાઃ ॥ ૧૬-૧૦॥

કામમ્ આશ્રિત્ય દુષ્પૂરમ્ દમ્ભ-માન-મદ-અન્વિતાઃ ।
મોહાત્ ગૃહીત્વા અસત્ ગ્રાહાન્ પ્રવર્તન્તે અશુચિ-વ્રતાઃ ॥ ૧૬-૧૦॥

દુષ્પૂરમ્ કામમ્ આશ્રિત્ય, મોહાત્ અસત્ ગ્રાહાન્ ગૃહીત્વા,
અશુચિ-વ્રતાઃ દમ્ભ-માન-મદ-અન્વિતાઃ પ્રવર્તન્તે ।

ચિન્તામપરિમેયાં ચ પ્રલયાન્તામુપાશ્રિતાઃ ।
કામોપભોગપરમા એતાવદિતિ નિશ્ચિતાઃ ॥ ૧૬-૧૧॥

ચિન્તામ્ અપરિમેયામ્ ચ પ્રલયાન્તામ્ ઉપાશ્રિતાઃ ।
કામ-ઉપભોગ-પરમાઃ એતાવત્ ઇતિ નિશ્ચિતાઃ ॥ ૧૬-૧૧॥

(તે) અપરિમેયામ્ પ્રલયાન્તામ્ ચિન્તામ્ ઉપાશ્રિતાઃ
કામ-ઉપભોગ-પરમાઃ ચ , એતાવત્ ઇતિ નિશ્ચિતાઃ ।

આશાપાશશતૈર્બદ્ધાઃ કામક્રોધપરાયણાઃ ।
ઈહન્તે કામભોગાર્થમન્યાયેનાર્થસઞ્ચયાન્ ॥ ૧૬-૧૨॥

આશા-પાશ-શતૈઃ બદ્ધાઃ કામ-ક્રોધ-પરાયણાઃ ।
ઈહન્તે કામ-ભોગાર્થમ્ અન્યાયેન અર્થ-સઞ્ચયાન્ ॥ ૧૬-૧૨॥

આશા-પાશ-શતૈઃ બદ્ધાઃ, કામ-ક્રોધ-પરાયણાઃ,
કામ-ભોગાર્થમ્ અન્યાયેન અર્થ-સઞ્ચયાન્ ઈહન્તે ।

ઇદમદ્ય મયા લબ્ધમિમં પ્રાપ્સ્યે મનોરથમ્ ।
ઇદમસ્તીદમપિ મે ભવિષ્યતિ પુનર્ધનમ્ ॥ ૧૬-૧૩॥

ઇદમ્ અદ્ય મયા લબ્ધમ્ ઇમમ્ પ્રાપ્સ્યે મનોરથમ્ ।

ઇદમ્ અસ્તિ ઇદમ્ અપિ મે ભવિષ્યતિ પુનઃ ધનમ્ ॥ ૧૬-૧૩ ॥

અદ્ય ઇદમ્ મયા લબ્ધમ્, ઇમમ્ મનોરથમ્ (શ્વઃ) પ્રાપ્સ્યે,
ઇદમ્ ધનમ્ (અધુના) અસ્તિ, ઇદમ્ અપિ ( ધનમ્ ચ) મે પુનઃ
ભવિષ્યતિ ।

અસૌ મયા હતઃ શત્રુર્હનિષ્યે ચાપરાનપિ ।
ઈશ્વરોઽહમહં ભોગી સિદ્ધોઽહં બલવાન્સુખી ॥ ૧૬-૧૪ ॥

અસૌ મયા હતઃ શત્રુઃ હનિષ્યે ચ અપરાન્ અપિ ।
ઈશ્વરઃ અહમ્ અહં ભોગી સિદ્ધઃ અહમ્ બલવાન્ સુખી ॥ ૧૬-૧૪ ॥

અસૌ શત્રુઃ મયા હતઃ, અપરાન્ ચ અપિ હનિષ્યે, અહમ્ ઈશ્વરઃ,
અહં ભોગી, અહમ્ સિદ્ધઃ, બલવાન્ સુખી (ચ અહં અસ્મિ) ।

આઢ્યોઽભિજનવાનસ્મિ કોઽન્યોઽસ્તિ સદૃશો મયા ।
યક્ષ્યે દાસ્યામિ મોદિષ્ય ઇત્યજ્ઞાનવિમોહિતાઃ ॥ ૧૬-૧૫ ॥

આઢ્યઃ અભિજનવાન્ અસ્મિ કઃ અન્યઃ અસ્તિ સદૃશઃ મયા ।
યક્ષ્યે દાસ્યામિ મોદિષ્યે ઇતિ અજ્ઞાન-વિમોહિતાઃ ॥ ૧૬-૧૫ ॥

આઢ્યઃ અભિજનવાન્ અસ્મિ, મયા સદૃશઃ કઃ અન્યઃ અસ્તિ?
(અહં) યક્ષ્યે, દાસ્યામિ, મોદિષ્યે ઇતિ અજ્ઞાન-વિમોહિતાઃ
(તે સન્તિ) ।

અનેકચિત્તવિભ્રાન્તા મોહજાલસમાવૃતાઃ ।
પ્રસક્તાઃ કામભોગેષુ પતન્તિ નરકેઽશુચૌ ॥ ૧૬-૧૬ ॥

અનેક-ચિત્ત-વિભ્રાન્તાઃ મોહ-જાલ-સમાવૃતાઃ ।
પ્રસક્તાઃ કામ-ભોગેષુ પતન્તિ નરકે અશુચૌ ॥ ૧૬-૧૬ ॥

અનેક-ચિત્ત-વિભ્રાન્તાઃ મોહ-જાલ-સમાવૃતાઃ કામ-ભોગેષુ
પ્રસક્તાઃ, અશુચૌ નરકે પતન્તિ ।

આત્મસમ્ભાવિતાઃ સ્તબ્ધા ધનમાનમદાન્વિતાઃ ।
યજન્તે નામયજ્ઞૈસ્તે દમ્ભેનાવિધિપૂર્વકમ્ ॥ ૧૬-૧૭ ॥

આત્મ-સમ્ભાવિતાઃ સ્તબ્ધાઃ ધન-માન-મદ-અન્વિતાઃ ।
યજન્તે નામ-યજ્ઞૈઃ તે દમ્ભેન અવિધિ-પૂર્વકમ્ ॥ ૧૬-૧૭ ॥

આત્મ-સમ્ભાવિતાઃ સ્તબ્ધાઃ ધન-માન-મદ-અન્વિતાઃ, તે દમ્ભેન

અવિધિ-પૂર્વકમ્ નામ-યજ્ઞૈઃ યજન્તે ।

અહંકારં બલં દર્પં કામં ક્રોધં ચ સંશ્રિતાઃ ।
મામાત્મપરદેહેષુ પ્રદ્વિષન્તોઽભ્યસૂયકાઃ ॥ ૧૬-૧૮॥

અહંકારમ્ બલમ્ દર્પમ્ કામમ્ ક્રોધમ્ ચ સંશ્રિતાઃ ।
મામ્ આત્મ-પર-દેહેષુ પ્રદ્વિષન્તઃ અભ્યસૂયકાઃ ॥ ૧૬-૧૮॥

અહંકારમ્ બલમ્ દર્પમ્ કામમ્ ક્રોધમ્ ચ સંશ્રિતાઃ
આત્મ-પર-દેહેષુ (સ્થિતં) મામ્ પ્રદ્વિષન્તઃ અભ્યસૂયકાઃ
(તે ભવન્તિ) ।

તાનહં દ્વિષતઃ ક્રૂરાન્સંસારેષુ નરાધમાન્ ।
ક્ષિપામ્યજસ્રમશુભાનાસુરીષ્વેવ યોનિષુ ॥ ૧૬-૧૯॥

તાન્ અહમ્ દ્વિષતઃ ક્રૂરાન્ સંસારેષુ નરાધમાન્ ।
ક્ષિપામિ અજસ્રમ્ અશુભાન્ આસુરીષુ એવ યોનિષુ ॥ ૧૬-૧૯॥

તાન્ દ્વિષતઃ ક્રૂરાન્, અશુભાન્, નરાધમાન્ સંસારેષુ
આસુરીષુ એવ યોનિષુ અજસ્રમ્ અહમ્ ક્ષિપામિ ।

આસુરીં યોનિમાપન્ના મૂઢા જન્મનિ જન્મનિ ।
મામપ્રાપ્યૈવ કૌન્તેય તતો યાન્ત્યધમાં ગતિમ્ ॥ ૧૬-૨૦॥

આસુરીમ્ યોનિમ્ આપન્નાઃ મૂઢાઃ જન્મનિ જન્મનિ ।
મામ્ અપ્રાપ્ય એવ કૌન્તેય તતઃ યાન્તિ અધમામ્ ગતિમ્ ॥ ૧૬-૨૦॥

હે કૌન્તેય! આસુરીમ્ યોનિમ્ આપન્નાઃ જન્મનિ જન્મનિ મૂઢાઃ
(સન્તઃ) મામ્ અપ્રાપ્ય એવ, તતઃ અધમામ્ ગતિમ્ યાન્તિ ।

ત્રિવિધં નરકસ્યેદં દ્વારં નાશનમાત્મનઃ ।
કામઃ ક્રોધસ્તથા લોભસ્તસ્માદેતત્ત્રયં ત્યજેત્ ॥ ૧૬-૨૧॥

ત્રિવિધમ્ નરકસ્ય ઇદમ્ દ્વારમ્ નાશનમ્ આત્મનઃ ।
કામઃ ક્રોધઃ તથા લોભઃ તસ્માત્ એતત્ ત્રયમ્ ત્યજેત્ ॥ ૧૬-૨૧॥

કામઃ ક્રોધઃ તથા લોભઃ ઇદમ્ ત્રિવિધમ્ આત્મનઃ નાશનમ્
નરકસ્ય દ્વારમ્ (અસ્તિ), તસ્માત્ એતત્ ત્રયમ્ ત્યજેત્ ।

એતૈર્વિમુક્તઃ કૌન્તેય તમોદ્વારૈસ્ત્રિભિર્નરઃ ।
આચરત્યાત્મનઃ શ્રેયસ્તતો યાતિ પરાં ગતિમ્ ॥ ૧૬-૨૨॥

એતૈઃ વિમુક્તઃ કૌન્તેય તમો-દ્વારૈઃ ત્રિભિઃ નરઃ ।
આચરતિ આત્મનઃ શ્રેયઃ તતઃ યાતિ પરામ્ ગતિમ્ ॥ ૧૬-૨૨॥

હે કૌન્તેય! એતૈઃ ત્રિભિઃ તમો-દ્વારૈઃ વિમુક્તઃ નરઃ, આત્મનઃ
શ્રેયઃ આચરત્, તતઃ પરામ્ ગતિમ્ યાતિ ।

યઃ શાસ્ત્રવિધિમુત્સૃજ્ય વર્તતે કામકારતઃ ।
ન સ સિદ્ધિમવાપ્નોતિ ન સુખં ન પરાં ગતિમ્ ॥ ૧૬-૨૩॥

યઃ શાસ્ત્ર-વિધિમ્ ઉત્સૃજ્ય વર્તતે કામ-કારતઃ ।
ન સઃ સિદ્ધિમ્ અવાપ્નોતિ ન સુખમ્ ન પરામ્ ગતિમ્ ॥ ૧૬-૨૩॥

યઃ શાસ્ત્ર-વિધિમ્ ઉત્સૃજ્ય, કામ-કારતઃ વર્તતે, સઃ ન સિદ્ધિમ્,
ન સુખમ્, ન (ચ) પરામ્ ગતિમ્ અવાપ્નોતિ ।

તસ્માચ્છાસ્ત્રં પ્રમાણં તે કાર્યાકાર્યવ્યવસ્થિતૌ ।
જ્ઞાત્વા શાસ્ત્રવિધાનોક્તં કર્મ કર્તુમિહાર્હસિ ॥ ૧૬-૨૪॥

તસ્માત્ શાસ્ત્રમ્ પ્રમાણમ્ તે કાર્ય-અકાર્ય-વ્યવસ્થિતૌ ।
જ્ઞાત્વા શાસ્ત્ર-વિધાન-ઉક્તમ્ કર્મ કર્તુમ્ ઇહ અર્હસિ ॥ ૧૬-૨૪॥

તસ્માત્ કાર્ય-અકાર્ય-વ્યવસ્થિતૌ તે શાસ્ત્રમ્ પ્રમાણમ્ (અસ્તિ),
શાસ્ત્ર-વિધાન-ઉક્તમ્ કર્મ જ્ઞાત્વા (તત્ ત્વં) ઇહ કર્તુમ્ અર્હસિ ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
દૈવાસુરસમ્પદ્વિભાગયોગો નામ ષોડશોઽધ્યાયઃ ॥ ૧૬॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદે
દૈવ-આસુર-સમ્પત્-વિભાગ-યોગઃ નામ ષોડશઃ અધ્યાયઃ ॥

---

અથ સપ્તદશોઽધ્યાયઃ । શ્રદ્ધાત્રયવિભાગયોગઃ
અથ સપ્તદશઃ અધ્યાયઃ । શ્રદ્ધા-ત્રય-વિભાગ-યોગઃ

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

યે શાસ્ત્રવિધિમુત્સૃજ્ય યજન્તે શ્રદ્ધયાન્વિતાઃ ।
તેષાં નિષ્ઠા તુ કા કૃષ્ણ સત્ત્વમાહો રજસ્તમઃ ॥ ૧૭-૧॥

યે શાસ્ત્ર-વિધિમ્ ઉત્સૃજ્ય યજન્તે શ્રદ્ધયા અન્વિતાઃ ।
તેષામ્ નિષ્ઠા તુ કા કૃષ્ણ સત્ત્વમ્ આહો રજઃ તમઃ ॥ ૧૭-૧॥

હે કૃષ્ણ! યે શાસ્ત્ર-વિધિમ્ ઉત્સૃજ્ય, શ્રદ્ધયા અન્વિતાઃ
(સન્તઃ) યજન્તે, તેષાં તુ કા નિષ્ઠા? સત્ત્વમ્ રજઃ આહો તમઃ ?

શ્રીભગવાનુવાચ
શ્રીભગવાન્ ઉવાચ ।

ત્રિવિધા ભવતિ શ્રદ્ધા દેહિનાં સા સ્વભાવજા ।
સાત્ત્વિકી રાજસી ચૈવ તામસી ચેતિ તાં શૃણુ ॥ ૧૭-૨॥

ત્રિવિધા ભવતિ શ્રદ્ધા દેહિનામ્ સા સ્વભાવજા ।
સાત્ત્વિકી રાજસી ચ એવ તામસી ચ ઇતિ તામ્ શૃણુ ॥ ૧૭-૨॥

દેહિનામ્ (યા) સ્વભાવજા શ્રદ્ધા, સા સાત્ત્વિકી ચ રાજસી (ચ)
તામસી ચ એવ ઇતિ ત્રિવિધા ભવતિ, તામ્ શૃણુ ।

સત્ત્વાનુરૂપા સર્વસ્ય શ્રદ્ધા ભવતિ ભારત ।
શ્રદ્ધામયોઽયં પુરુષો યો યચ્છ્રદ્ધઃ સ એવ સઃ ॥ ૧૭-૩॥

સત્ત્વ-અનુરૂપા સર્વસ્ય શ્રદ્ધા ભવતિ ભારત ।
શ્રદ્ધામયઃ અયમ્ પુરુષઃ યઃ યત્ શ્રદ્ધઃ સઃ એવ સઃ ॥ ૧૭-૩॥

હે ભારત! સર્વસ્ય સત્ત્વ-અનુરૂપા શ્રદ્ધા ભવતિ, અયમ્
પુરુષઃ શ્રદ્ધામયઃ (અસ્તિ), યઃ યત્ શ્રદ્ધઃ (ભવતિ), સઃ એવ સઃ ।

યજન્તે સાત્ત્વિકા દેવાન્યક્ષરક્ષાંસિ રાજસાઃ ।
પ્રેતાન્ભૂતગણાંશ્ચાન્યે યજન્તે તામસા જનાઃ ॥ ૧૭-૪॥

યજન્તે સાત્ત્વિકાઃ દેવાન્ યક્ષ-રક્ષાંસિ રાજસાઃ ।
પ્રેતાન્ ભૂતગણાન્ ચ અન્યે યજન્તે તામસાઃ જનાઃ ॥ ૧૭-૪॥

સાત્ત્વિકાઃ દેવાન્ યજન્તે, રાજસાઃ યક્ષ-રક્ષાંસિ (યજન્તે),
અન્યે તામસાઃ જનાઃ પ્રેતાન્ ભૂતગણાન્ ચ યજન્તે ।

અશાસ્ત્રવિહિતં ઘોરં તપ્યન્તે યે તપો જનાઃ ।
દમ્ભાહંકારસંયુક્તાઃ કામરાગબલાન્વિતાઃ ॥ ૧૭-૫॥

કર્ષયન્તઃ શરીરસ્થં ભૂતગ્રામમચેતસઃ ।
માં ચૈવાન્તઃશરીરસ્થં તાન્વિદ્ધ્યાસુરનિશ્ચયાન્ ॥ ૧૭-૬॥

અશાસ્ત્ર-વિહિતમ્ ઘોરમ્ તપ્યન્તે યે તપઃ જનાઃ ।
દમ્ભ-અહંકાર-સંયુક્તાઃ કામ-રાગ-બલ-અન્વિતાઃ ॥ ૧૭-૫॥

કર્ષયન્તઃ શરીરસ્થમ્ ભૂત-ગ્રામમ્ અચેતસઃ ।
મામ્ ચ એવ અન્તઃ-શરીરસ્થમ્ તાન્ વિદ્ધિ આસુર-નિશ્ચયાન્ ॥ ૧૭-૬॥

દમ્ભ-અહંકાર-સંયુક્તાઃ કામ-રાગ-બલ-અન્વિતાઃ યે જનાઃ
અશાસ્ત્ર-વિહિતમ્ ઘોરમ્ તપઃ તપ્યન્તે, અચેતસઃ ચ (યે)
શરીરસ્થમ્ ભૂત-ગ્રામમ્ અન્તઃ-શરીરસ્થમ્ મામ્ એવ
કર્ષયન્તઃ તાન્ આસુર-નિશ્ચયાન્ વિદ્ધિ ।

આહારસ્ત્વપિ સર્વસ્ય ત્રિવિધો ભવતિ પ્રિયઃ ।
યજ્ઞસ્તપસ્તથા દાનં તેષાં ભેદમિમં શ‌ૃણુ ॥ ૧૭-૭॥

આહારઃ તુ અપિ સર્વસ્ય ત્રિવિધઃ ભવતિ પ્રિયઃ ।
યજ્ઞઃ તપઃ તથા દાનમ્ તેષામ્ ભેદમ્ ઇમમ્ શ‌ૃણુ ॥ ૧૭-૭॥

સર્વસ્ય પ્રિયઃ આહારઃ અપિ તુ ત્રિવિધઃ ભવતિ, તથા યજ્ઞઃ, તપઃ,
દાનમ્ (ચ સર્વસ્ય ત્રિવિધં ભવતિ, ત્વં) તેષામ્ ઇમમ્ ભેદમ્ શ‌ૃણુ ।

આયુઃસત્ત્વબલારોગ્યસુખપ્રીતિવિવર્ધનાઃ ।
રસ્યાઃ સ્નિગ્ધાઃ સ્થિરા હૃદ્યા આહારાઃ સાત્ત્વિકપ્રિયાઃ ॥ ૧૭-૮॥

આયુઃ-સત્ત્વ-બલ-આરોગ્ય-સુખ-પ્રીતિ-વિવર્ધનાઃ ।
રસ્યાઃ સ્નિગ્ધાઃ સ્થિરાઃ હૃદ્યાઃ આહારાઃ સાત્ત્વિક-પ્રિયાઃ ॥ ૧૭-૮॥

આયુઃ-સત્ત્વ-બલ-આરોગ્ય-સુખ-પ્રીતિ-વિવર્ધનાઃ, રસ્યાઃ સ્નિગ્ધાઃ
સ્થિરાઃ હૃદ્યાઃ આહારાઃ સાત્ત્વિક-પ્રિયાઃ (સન્તિ)।

કટ્વમ્લલવણાત્યુષ્ણતીક્ષ્ણરૂક્ષવિદાહિનઃ ।
આહારા રાજસસ્યેષ્ટા દુઃખશોકામયપ્રદાઃ ॥ ૧૭-૯॥

કટ્વમ્લ-લવણ-અતિ-ઉષ્ણ-તીક્ષ્ણ-રૂક્ષ-વિદાહિનઃ ।
આહારાઃ રાજસસ્ય ઇષ્ટાઃ દુઃખ-શોક-આમય-પ્રદાઃ ॥ ૧૭-૯॥

કટ્વમ્લ-લવણ-અતિ-ઉષ્ણ-તીક્ષ્ણ-રૂક્ષ-વિદાહિનઃ

દુઃખ-શોક-આમય-પ્રદાઃ આહારાઃ રાજસસ્ય ઇષ્ટાઃ (ભવતિ) ।

યાતયામં ગતરસં પૂતિ પર્યુષિતં ચ યત્ ।
ઉચ્છિષ્ટમપિ ચામેધ્યં ભોજનં તામસપ્રિયમ્ ॥ ૧૭-૧૦ ॥

યાતયામમ્ ગત-રસમ્ પૂતિ પર્યુષિતમ્ ચ યત્ ।
ઉચ્છિષ્ટમ્ અપિ ચ અમેધ્યમ્ ભોજનમ્ તામસ-પ્રિયમ્ ॥ ૧૭-૧૦ ॥

યત્ યાતયામમ્, ગત-રસમ્, પૂતિ, પર્યુષિતમ્ ચ ઉચ્છિષ્ટમ્
અપિ ચ અમેધ્યમ્ ભોજનમ્ (તત્) તામસ-પ્રિયમ્ (અસ્તિ) ।

અફલાકાઙ્ક્ષિભિર્યજ્ઞો વિધિદૃષ્ટો ય ઇજ્યતે ।
યષ્ટવ્યમેવેતિ મનઃ સમાધાય સ સાત્ત્વિકઃ ॥ ૧૭-૧૧ ॥

અફલ-આકાઙ્ક્ષિભિઃ યજ્ઞઃ વિધિ-દૃષ્ટઃ યઃ ઇજ્યતે ।
યષ્ટવ્યમ્ એવ ઇતિ મનઃ સમાધાય સઃ સાત્ત્વિકઃ ॥ ૧૭-૧૧ ॥

અફલ-આકાઙ્ક્ષિભિઃ (પુરુષૈઃ) યષ્ટવ્યમ્ એવ ઇતિ મનઃ સમાધાય
વિધિ-દૃષ્ટઃ યઃ યજ્ઞઃ ઇજ્યતે, સઃ સાત્ત્વિકઃ (યજ્ઞઃ મતઃ) ।

અભિસન્ધાય તુ ફલં દમ્ભાર્થમપિ ચૈવ યત્ ।
ઇજ્યતે ભરતશ્રેષ્ઠ તં યજ્ઞં વિદ્ધિ રાજસમ્ ॥ ૧૭-૧૨ ॥

અભિસન્ધાય તુ ફલમ્ દમ્ભાર્થમ્ અપિ ચ એવ યત્ ।
ઇજ્યતે ભરત-શ્રેષ્ઠ તમ્ યજ્ઞમ્ વિદ્ધિ રાજસમ્ ॥ ૧૭-૧૨ ॥

હે ભરત-શ્રેષ્ઠ! ફલમ્ તુ અભિસન્ધાય, અપિ ચ દમ્ભાર્થમ્
એવ યત્ ઇજ્યતે, તમ્ યજ્ઞમ્ રાજસમ્ વિદ્ધિ ।

વિધિહીનમસૃષ્ટાન્નં મન્ત્રહીનમદક્ષિણમ્ ।
શ્રદ્ધાવિરહિતં યજ્ઞં તામસં પરિચક્ષતે ॥ ૧૭-૧૩ ॥

વિધિ-હીનમ્ અસૃષ્ટ-અન્નમ્ મન્ત્ર-હીનમ્ અદક્ષિણમ્ ।
શ્રદ્ધા-વિરહિતમ્ યજ્ઞમ્ તામસમ્ પરિચક્ષતે ॥ ૧૭-૧૩ ॥

વિધિ-હીનમ્, અસૃષ્ટ-અન્નમ્, મન્ત્ર-હીનમ્, અદક્ષિણમ્,
શ્રદ્ધા-વિરહિતમ્, (ચ) યજ્ઞમ્ તામસમ્ પરિચક્ષતે ।

દેવદ્વિજગુરુપ્રાજ્ઞપૂજનં શૌચમાર્જવમ્ ।
બ્રહ્મચર્યમહિંસા ચ શારીરં તપ ઉચ્યતે ॥ ૧૭-૧૪ ॥

દેવ-દ્વિજ-ગુરુ-પ્રાજ્ઞ-પૂજનમ્ શૌચમ્ આર્જવમ્ ।
બ્રહ્મચર્યમ્ અહિંસા ચ શારીરમ્ તપઃ ઉચ્યતે ॥ ૧૭-૧૪॥

દેવ-દ્વિજ-ગુરુ-પ્રાજ્ઞ-પૂજનમ્, શૌચમ્, આર્જવમ્,
બ્રહ્મચર્યમ્, અહિંસા ચ (ઇતિ) શારીરમ્ તપઃ ઉચ્યતે ।

અનુદ્વેગકરં વાક્યં સત્યં પ્રિયહિતં ચ યત્ ।
સ્વાધ્યાયાભ્યસનં ચૈવ વાઙ્મયં તપ ઉચ્યતે ॥ ૧૭-૧૫॥

અનુદ્વેગકરમ્ વાક્યમ્ સત્યમ્ પ્રિય-હિતમ્ ચ યત્ ।
સ્વાધ્યાય-અભ્યસનમ્ ચ એવ વાઙ્મયમ્ તપઃ ઉચ્યતે ॥ ૧૭-૧૫॥

યત્ અનુદ્વેગકરમ્ સત્યમ્ પ્રિય-હિતમ્ વાક્યમ્ ચ
(યત્) સ્વાધ્યાય-અભ્યસનમ્ ચ, (તત્) એવ
વાઙ્મયમ્ તપઃ (ઇતિ) ઉચ્યતે ।

મનઃ પ્રસાદઃ સૌમ્યત્વં મૌનમાત્મવિનિગ્રહઃ ।
ભાવસંશુદ્ધિરિત્યેતત્તપો માનસમુચ્યતે ॥ ૧૭-૧૬॥

મનઃ-પ્રસાદઃ સૌમ્યત્વમ્ મૌનમ્ આત્મ-વિનિગ્રહઃ ।
ભાવ-સંશુદ્ધિઃ ઇતિ એતત્ તપઃ માનસમ્ ઉચ્યતે ॥ ૧૭-૧૬॥

મનઃ-પ્રસાદઃ સૌમ્યત્વમ્, મૌનમ્, આત્મ-વિનિગ્રહઃ,
ભાવ-સંશુદ્ધિઃ ઇતિ એતત્ માનસમ્ તપઃ ઉચ્યતે ।

શ્રદ્ધયા પરયા તપ્તં તપસ્તત્ત્રિવિધં નરૈઃ ।
અફલાકાઙ્ક્ષિભિર્યુક્તૈઃ સાત્ત્વિકં પરિચક્ષતે ॥ ૧૭-૧૭॥

શ્રદ્ધયા પરયા તપ્તમ્ તપઃ તત્ ત્રિવિધમ્ નરૈઃ ।
અફલ-આકાઙ્ક્ષિભિઃ યુક્તૈઃ સાત્ત્વિકમ્ પરિચક્ષતે ॥ ૧૭-૧૭॥

અફલ-આકાઙ્ક્ષિભિઃ યુક્તૈઃ નરૈઃ પરયા શ્રદ્ધયા તપ્તમ્
(યત્) ત્રિવિધમ્ તપઃ, તત્ સાત્ત્વિકમ્ પરિચક્ષતે ।

સત્કારમાનપૂજાર્થં તપો દમ્ભેન ચૈવ યત્ ।
ક્રિયતે તદિહ પ્રોક્તં રાજસં ચલમધ્રુવમ્ ॥ ૧૭-૧૮॥

સત્કાર-માન-પૂજાર્થમ્ તપઃ દમ્ભેન ચ એવ યત્ ।
ક્રિયતે તત્ ઇહ પ્રોક્તમ્ રાજસમ્ ચલમ્ અધ્રુવમ્ ॥ ૧૭-૧૮॥

સત્કાર-માન-પૂજાર્થમ્ દમ્ભેન ચ એવ યત્ તપઃ ક્રિયતે,

તત્ ઇહ રાજસમ્, ચલમ્, અધ્રુવમ્ પ્રોક્તમ્ ।

મૂઢગ્રાહેણાત્મનો યત્પીડયા ક્રિયતે તપઃ ।
પરસ્યોત્સાદનાર્થં વા તત્તામસમુદાહૃતમ્ ॥ ૧૭-૧૯॥

મૂઢ-ગ્રાહેણ આત્મનઃ યત્ પીડયા ક્રિયતે તપઃ ।
પરસ્ય ઉત્સાદનાર્થમ્ વા તત્ તામસમ્ ઉદાહૃતમ્ ॥ ૧૭-૧૯॥

મૂઢ-ગ્રાહેણ આત્મનઃ પીડયા પરસ્ય ઉત્સાદનાર્થમ્ વા
યત્ તપઃ ક્રિયતે, તત્ તામસમ્ ઉદાહૃતમ્ ।

દાતવ્યમિતિ યદ્દાનં દીયતેઽનુપકારિણે ।
દેશે કાલે ચ પાત્રે ચ તદ્દાનં સાત્ત્વિકં સ્મૃતમ્ ॥ ૧૭-૨૦॥

દાતવ્યમ્ ઇતિ યત્ દાનમ્ દીયતે અનુપકારિણે ।
દેશે કાલે ચ પાત્રે ચ તત્ દાનમ્ સાત્ત્વિકમ્ સ્મૃતમ્ ॥ ૧૭-૨૦॥

દાતવ્યમ્ ઇતિ યત્ દાનમ્ દેશે ચ કાલે ચ પાત્રે (ચ) અનુપકારિણે
દીયતે, તત્ દાનમ્ સાત્ત્વિકમ્ સ્મૃતમ્ ।

યત્તુ પ્રત્યુપકારાર્થં ફલમુદ્દિશ્ય વા પુનઃ ।
દીયતે ચ પરિક્લિષ્ટં તદ્દાનં રાજસં સ્મૃતમ્ ॥ ૧૭-૨૧॥

યત્ તુ પ્રતિ-ઉપકારાર્થમ્ ફલમ્ ઉદ્દિશ્ય વા પુનઃ ।
દીયતે ચ પરિક્લિષ્ટમ્ તત્ દાનમ્ રાજસમ્ સ્મૃતમ્ ॥ ૧૭-૨૧॥

યત્ તુ પ્રતિ-ઉપકારાર્થમ્, ફલમ્ ઉદ્દિશ્ય, વા પુનઃ
પરિક્લિષ્ટમ્ ચ દીયતે, તત્ દાનમ્ રાજસમ્ સ્મૃતમ્ ।

અદેશકાલે યદ્દાનમપાત્રેભ્યશ્ચ દીયતે ।
અસત્કૃતમવજ્ઞાતં તત્તામસમુદાહૃતમ્ ॥ ૧૭-૨૨॥

અદેશ-કાલે યત્ દાનમ્ અપાત્રેભ્યઃ ચ દીયતે ।
અસત્કૃતમ્ અવજ્ઞાતમ્ તત્ તામસમ્ ઉદાહૃતમ્ ॥ ૧૭-૨૨॥

યત્ દાનમ્ અસત્કૃતમ્ અવજ્ઞાતમ્, અદેશ-કાલે અપાત્રેભ્યઃ
ચ દીયતે, તત્ તામસમ્ ઉદાહૃતમ્ ।

ૐતત્સદિતિ નિર્દેશો બ્રહ્મણસ્ત્રિવિધઃ સ્મૃતઃ ।
બ્રાહ્મણાસ્તેન વેદાશ્ચ યજ્ઞાશ્ચ વિહિતાઃ પુરા ॥ ૧૭-૨૩॥

ૐ તત્ સત્ ઇતિ નિર્દેશઃ બ્રહ્મણઃ ત્રિવિધઃ સ્મૃતઃ ।
બ્રાહ્મણાઃ તેન વેદાઃ ચ યજ્ઞાઃ ચ વિહિતાઃ પુરા ॥ ૧૭-૨૩ ॥

ૐ તત્ સત્ ઇતિ બ્રહ્મણઃ ત્રિવિધઃ નિર્દેશઃ સ્મૃતઃ
તેન બ્રાહ્મણાઃ વેદાઃ ચ યજ્ઞાઃ ચ પુરા વિહિતાઃ ।

તસ્માદોમિત્યુદાહૃત્ય યજ્ઞદાનતપઃક્રિયાઃ ।
પ્રવર્તન્તે વિધાનોક્તાઃ સતતં બ્રહ્મવાદિનામ્ ॥ ૧૭-૨૪ ॥

તસ્માત્ ૐ ઇતિ ઉદાહૃત્ય યજ્ઞ-દાન-તપઃ-ક્રિયાઃ ।
પ્રવર્તન્તે વિધાન-ઉક્તાઃ સતતમ્ બ્રહ્મ-વાદિનામ્ ॥ ૧૭-૨૪ ॥

તસ્માત્ બ્રહ્મ-વાદિનામ્ વિધાન-ઉક્તાઃ યજ્ઞ-દાન-તપઃ-ક્રિયાઃ
ૐ ઇતિ ઉદાહૃત્ય સતતમ્ પ્રવર્તન્તે ।

તદિત્યનભિસન્ધાય ફલં યજ્ઞતપઃક્રિયાઃ ।
દાનક્રિયાશ્ચ વિવિધાઃ ક્રિયન્તે મોક્ષકાઙ્ક્ષિભિઃ ॥ ૧૭-૨૫ ॥

તત્ ઇતિ અનભિસન્ધાય ફલમ્ યજ્ઞ-તપઃ-ક્રિયાઃ ।
દાન-ક્રિયાઃ ચ વિવિધાઃ ક્રિયન્તે મોક્ષ-કાઙ્ક્ષિભિઃ ॥ ૧૭-૨૫ ॥

મોક્ષ-કાઙ્ક્ષિભિઃ તત્ ઇતિ (ઉદાહૃત્ય) ફલમ્ અનભિસન્ધાય
વિવિધાઃ યજ્ઞ-તપઃ-ક્રિયાઃ દાન-ક્રિયાઃ ચ ક્રિયન્તે ।

સદ્ભાવે સાધુભાવે ચ સદિત્યેતત્પ્રયુજ્યતે ।
પ્રશસ્તે કર્મણિ તથા સચ્છબ્દઃ પાર્થ યુજ્યતે ॥ ૧૭-૨૬ ॥

સત્-ભાવે સાધુ-ભાવે ચ સત્ ઇતિ એતત્ પ્રયુજ્યતે ।
પ્રશસ્તે કર્મણિ તથા સત્ શબ્દઃ પાર્થ યુજ્યતે ॥ ૧૭-૨૬ ॥

(જ્ઞાનિભિઃ) સત્ ઇતિ એતત્ સત્-ભાવે ચ સાધુ-ભાવે ચ પ્રયુજ્યતે,
તથા હે પાર્થ! પ્રશસ્તે કર્મણિ સત્ શબ્દઃ યુજ્યતે ।

યજ્ઞે તપસિ દાને ચ સ્થિતિઃ સદિતિ ચોચ્યતે ।
કર્મ ચૈવ તદર્થીયં સદિત્યેવાભિધીયતે ॥ ૧૭-૨૭ ॥

યજ્ઞે તપસિ દાને ચ સ્થિતિઃ સત્ ઇતિ ચ ઉચ્યતે ।
કર્મ ચ એવ તત્-અર્થીયમ્ સત્ ઇતિ એવ અભિધીયતે ॥ ૧૭-૨૭ ॥

યજ્ઞે તપસિ દાને ચ સ્થિતિઃ સત્ ઇતિ ચ ઉચ્યતે । તત્-અર્થીયમ્
ચ એવ કર્મ સત્ ઇતિ એવ અભિધીયતે ।

અશ્રદ્ધયા હુતં દત્તં તપસ્તપ્તં કૃતં ચ યત્ ।
અસદિત્યુચ્યતે પાર્થ ન ચ તત્પ્રેત્ય નો ઇહ ॥ ૧૭-૨૮॥

અશ્રદ્ધયા હુતમ્ દત્તમ્ તપઃ તપ્તમ્ કૃતમ્ ચ યત્ ।
અસત્ ઇતિ ઉચ્યતે પાર્થ ન ચ તત્ પ્રેત્ય નો ઇહ ॥ ૧૭-૨૮॥

હે પાર્થ! અશ્રદ્ધયા હુતમ્ દત્તમ્, તપઃ તપ્તમ્, યત્
ચ કૃતમ્, તત્ અસત્ ઇતિ ઉચ્યતે; (તત્) પ્રેત્ય,
ઇહ (અપિ) ચ ન (ફલપ્રદં) નો (ભવતિ) ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
શ્રદ્ધાત્રયવિભાગયોગો નામ સપ્તદશોઽધ્યાયઃ ॥ ૧૭॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદે
શ્રદ્ધા-ત્રય-વિભાગ-યોગઃ નામ સપ્તદશઃ અધ્યાયઃ ॥ ૧૭॥

---

અથાષ્ટાદશોઽધ્યાયઃ । મોક્ષસંન્યાસયોગઃ ।
અથ અષ્ટાદશઃ અધ્યાયઃ । મોક્ષ-સંન્યાસ-યોગઃ ।

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

સંન્યાસસ્ય મહાબાહો તત્ત્વમિચ્છામિ વેદિતુમ્ ।
ત્યાગસ્ય ચ હૃષીકેશ પૃથક્કેશિનિષૂદન ॥ ૧૮-૧॥

સંન્યાસસ્ય મહા-બાહો તત્ત્વમ્ ઇચ્છામિ વેદિતુમ્ ।
ત્યાગસ્ય ચ હૃષીકેશ પૃથક્ કેશિ-નિષૂદન ॥ ૧૮-૧॥

હે મહા-બાહો! હે કેશિ-નિષૂદન હૃષીકેશ ! (અહં)
સંન્યાસસ્ય ત્યાગસ્ય ચ તત્ત્વમ્ પૃથક્ વેદિતુમ્ ઇચ્છામિ ।

શ્રીભગવાનુવાચ ।
શ્રીભગવાન્ ઉવાચ ।

કામ્યાનાં કર્મણાં ન્યાસં સંન્યાસં કવયો વિદુઃ ।

સર્વકર્મફલત્યાગં પ્રાહુસ્ત્યાગં વિચક્ષણાઃ ॥ ૧૮-૨॥

કામ્યાનામ્ કર્મણામ્ ન્યાસમ્ સંન્યાસમ્ કવયઃ વિદુઃ ।
સર્વ-કર્મ-ફલ-ત્યાગમ્ પ્રાહુઃ ત્યાગમ્ વિચક્ષણાઃ ॥ ૧૮-૨॥

કવયઃ કામ્યાનામ્ કર્મણામ્ ન્યાસમ્ સંન્યાસમ્ વિદુઃ,
વિચક્ષણાઃ (ચ) સર્વ-કર્મ-ફલ-ત્યાગમ્ ત્યાગમ્ પ્રાહુઃ ।

ત્યાજ્યં દોષવદિત્યેકે કર્મ પ્રાહુર્મનીષિણઃ ।
યજ્ઞદાનતપઃકર્મ ન ત્યાજ્યમિતિ ચાપરે ॥ ૧૮-૩॥

ત્યાજ્યમ્ દોષવત્ ઇતિ એકે કર્મ પ્રાહુઃ મનીષિણઃ ।
યજ્ઞ-દાન-તપઃ-કર્મ ન ત્યાજ્યમ્ ઇતિ ચ અપરે ॥ ૧૮-૩॥

એકે મનીષિણઃ કર્મ દોષવત્ (અસ્તિ તસ્માત્) ત્યાજ્યમ્ ઇતિ પ્રાહુઃ,
અપરે ચ યજ્ઞ-દાન-તપઃ-કર્મ ન ત્યાજ્યમ્ ઇતિ (આહુઃ)।

નિશ્ચયં શ‍ૃણુ મે તત્ર ત્યાગે ભરતસત્તમ ।
ત્યાગો હિ પુરુષવ્યાઘ્ર ત્રિવિધઃ સમ્પ્રકીર્તિતઃ ॥ ૧૮-૪॥

નિશ્ચયમ્  શ‍ૃણુ મે તત્ર ત્યાગે ભરતસત્તમ ।
ત્યાગઃ હિ પુરુષ-વ્યાઘ્ર ત્રિવિધઃ સમ્પ્રકીર્તિતઃ ॥ ૧૮-૪॥

હે ભરતસત્તમ! તત્ર ત્યાગે મે નિશ્ચયમ્  શ‍ૃણુ ।
હે પુરુષ-વ્યાઘ્ર! ત્યાગઃ હિ ત્રિવિધઃ સમ્પ્રકીર્તિતઃ (અસ્તિ)।

યજ્ઞદાનતપઃકર્મ ન ત્યાજ્યં કાર્યમેવ તત્ ।
યજ્ઞો દાનં તપશ્ચૈવ પાવનાનિ મનીષિણામ્ ॥ ૧૮-૫॥

યજ્ઞ-દાન-તપઃ-કર્મ ન ત્યાજ્યમ્ કાર્યમ્ એવ તત્ ।
યજ્ઞઃ દાનમ્ તપઃ ચ એવ પાવનાનિ મનીષિણામ્ ॥ ૧૮-૫॥

યજ્ઞ-દાન-તપઃ-કર્મ ન ત્યાજ્યમ્ તત્ કાર્યમ્ એવ ।
યજ્ઞઃ દાનમ્ તપઃ ચ (એતાનિ) મનીષિણામ્ પાવનાનિ એવ
(સન્તિ) ।

એતાન્યપિ તુ કર્માણિ સઙ્ગં ત્યક્ત્વા ફલાનિ ચ ।
કર્તવ્યાનીતિ મે પાર્થ નિશ્ચિતં મતમુત્તમમ્ ॥ ૧૮-૬॥

એતાનિ અપિ તુ કર્માણિ સઙ્ગમ્ ત્યક્ત્વા ફલાનિ ચ ।
કર્તવ્યાનિ ઇતિ મે પાર્થ નિશ્ચિતમ્ મતમ્ ઉત્તમમ્ ॥ ૧૮-૬॥

અપિ તુ એતાનિ કર્માણિ સઙ્ગમ્ ફલાનિ ચ ત્યક્ત્વા કર્તવ્યાનિ
ઇતિ, હે પાર્થ! મે નિશ્ચિતમ્ ઉત્તમમ્ મતમ્ (અસ્તિ) ।

નિયતસ્ય તુ સંન્યાસઃ કર્મણો નોપપદ્યતે ।
મોહાત્તસ્ય પરિત્યાગસ્તામસઃ પરિકીર્તિતઃ ॥ ૧૮-૭॥

નિયતસ્ય તુ સંન્યાસઃ કર્મણઃ ન ઉપપદ્યતે ।
મોહાત્ તસ્ય પરિત્યાગઃ તામસઃ પરિકીર્તિતઃ ॥ ૧૮-૭॥

નિયતસ્ય કર્મણઃ તુ સંન્યાસઃ ન ઉપપદ્યતે ।
મોહાત્ તસ્ય પરિત્યાગઃ તામસઃ પરિકીર્તિતઃ ।

દુઃખમિત્યેવ યત્કર્મ કાયક્લેશભયાત્ત્યજેત્ ।
સ કૃત્વા રાજસં ત્યાગં નૈવ ત્યાગફલં લભેત્ ॥ ૧૮-૮॥

દુઃખમ્ ઇતિ એવ યત્ કર્મ કાય-ક્લેશ-ભયાત્ ત્યજેત્ ।
સઃ કૃત્વા રાજસમ્ ત્યાગમ્ ન એવ ત્યાગ-ફલમ્ લભેત્ ॥ ૧૮-૮॥

(યઃ) દુઃખમ્ ઇતિ (મત્વા) એવ યત્ કર્મ કાય-ક્લેશ-ભયાત્
ત્યજેત્, સઃ રાજસમ્ ત્યાગમ્ કૃત્વા ત્યાગ-ફલમ્ ન એવ લભેત્ ।

કાર્યમિત્યેવ યત્કર્મ નિયતં ક્રિયતેઽર્જુન ।
સઙ્ગં ત્યક્ત્વા ફલં ચૈવ સ ત્યાગઃ સાત્ત્વિકો મતઃ ॥ ૧૮-૯॥

કાર્યમ્ ઇતિ એવ યત્ કર્મ નિયતમ્ ક્રિયતે અર્જુન ।
સઙ્ગમ્ ત્યક્ત્વા ફલમ્ ચ એવ સઃ ત્યાગઃ સાત્ત્વિકઃ મતઃ ॥ ૧૮-૯॥

હે અર્જુન! કાર્યમ્ ઇતિ (મત્વા) એવ યત્ નિયતમ્ કર્મ, સઙ્ગમ્
ફલમ્ ચ એવ ત્યક્ત્વા ક્રિયતે, સઃ ત્યાગઃ સાત્ત્વિકઃ મતઃ ।

ન દ્વેષ્ટ્યકુશલં કર્મ કુશલે નાનુષજ્જતે ।
ત્યાગી સત્ત્વસમાવિષ્ટો મેધાવી છિન્નસંશયઃ ॥ ૧૮-૧૦॥

ન દ્વેષ્ટિ અકુશલમ્ કર્મ કુશલે ન અનુષજ્જતે ।
ત્યાગી સત્ત્વ-સમાવિષ્ટઃ મેધાવી છિન્ન-સંશયઃ ॥ ૧૮-૧૦॥

(સઃ) ત્યાગી સત્ત્વ-સમાવિષ્ટઃ મેધાવી છિન્ન-સંશયઃ
(ચ ભવતિ સઃ) અકુશલમ્ કર્મ ન દ્વેષ્ટિ, કુશલે (ચ) ન અનુષજ્જતે ।

ન હિ દેહભૃતા શક્યં ત્યક્તું કર્માણ્યશેષતઃ ।

યસ્તુ કર્મફલત્યાગી સ ત્યાગીત્યભિધીયતે ॥ ૧૮-૧૧॥

ન હિ દેહ-ભૃતા શક્યમ્ ત્યક્તુમ્ કર્માણિ અશેષતઃ ।
યઃ તુ કર્મ-ફલ-ત્યાગી સઃ ત્યાગી ઇતિ અભિધીયતે ॥ ૧૮-૧૧॥

દેહ-ભૃતા અશેષતઃ કર્માણિ ત્યક્તુમ્ ન શક્યમ્,
યઃ તુ હિ કર્મ-ફલ-ત્યાગી સઃ ત્યાગી ઇતિ અભિધીયતે ।

અનિષ્ટમિષ્ટં મિશ્રં ચ ત્રિવિધં કર્મણઃ ફલમ્ ।
ભવત્યત્યાગિનાં પ્રેત્ય ન તુ સંન્યાસિનાં ક્વચિત્ ॥ ૧૮-૧૨॥

અનિષ્ટમ્ ઇષ્ટમ્ મિશ્રમ્ ચ ત્રિવિધમ્ કર્મણઃ ફલમ્ ।
ભવતિ અત્યાગિનામ્ પ્રેત્ય ન તુ સંન્યાસિનામ્ ક્વચિત્ ॥ ૧૮-૧૨॥

અનિષ્ટમ્, ઇષ્ટમ્, મિશ્રમ્ ચ (ઇતિ) ત્રિવિધમ્ કર્મણઃ ફલમ્
પ્રેત્ય અત્યાગિનામ્ ભવતિ, સંન્યાસિનામ્ તુ ક્વચિત્ ન (ભવતિ)।

પઞ્ચૈતાનિ મહાબાહો કારણાનિ નિબોધ મે ।
સાઙ્ખ્યે કૃતાન્તે પ્રોક્તાનિ સિદ્ધયે સર્વકર્મણામ્ ॥ ૧૮-૧૩॥

પઞ્ચ એતાનિ મહા-બાહો કારણાનિ નિબોધ મે ।
સાઙ્ખ્યે કૃત-અન્તે પ્રોક્તાનિ સિદ્ધયે સર્વ-કર્મણામ્ ॥ ૧૮-૧૩॥

હે મહા-બાહો! સર્વ-કર્મણામ્ સિદ્ધયે કૃત-અન્તે સાઙ્ખ્યે
પ્રોક્તાનિ એતાનિ પઞ્ચ કારણાનિ મે નિબોધ ।

અધિષ્ઠાનં તથા કર્તા કરણં ચ પૃથગ્વિધમ્ ।
વિવિધાશ્ચ પૃથક્ચેષ્ટા દૈવં ચૈવાત્ર પઞ્ચમમ્ ॥ ૧૮-૧૪॥

અધિષ્ઠાનમ્ તથા કર્તા કરણમ્ ચ પૃથક્-વિધમ્ ।
વિવિધાઃ ચ પૃથક્ ચેષ્ટાઃ દૈવમ્ ચ એવ અત્ર પઞ્ચમમ્ ॥ ૧૮-૧૪॥

અધિષ્ઠાનમ્, તથા કર્તા ચ, પૃથક્-વિધમ્ કરણમ્ ચ,
વિવિધાઃ પૃથક્ ચેષ્ટાઃ, અત્ર દૈવમ્ પઞ્ચમમ્ એવ (ભવતિ)।

શરીરવાઙ્મનોભિર્યત્કર્મ પ્રારભતે નરઃ ।
ન્યાય્યં વા વિપરીતં વા પઞ્ચૈતે તસ્ય હેતવઃ ॥ ૧૮-૧૫॥

શરીર-વાક્-મનોભિઃ યત્ કર્મ પ્રારભતે નરઃ ।
ન્યાય્યમ્ વા વિપરીતં વા પઞ્ચ એતે તસ્ય હેતવઃ ॥ ૧૮-૧૫॥

નરઃ શરીર-વાક્-મનોભિઃ ન્યાય્યમ્ વા વિપરીતં વા યત્
કર્મ પ્રારભતે, તસ્ય એતે પઞ્ચ હેતવઃ (સન્તિ) ।

તત્રૈવં સતિ કર્તારમાત્માનં કેવલં તુ યઃ ।
પશ્યત્યકૃતબુદ્ધિત્વાન્ન સ પશ્યતિ દુર્મતિઃ ॥ ૧૮-૧૬॥

તત્ર એવમ્ સતિ કર્તારમ્ આત્માનમ્ કેવલમ્ તુ યઃ ।
પશ્યતિ અકૃત-બુદ્ધિત્વાત્ ન સઃ પશ્યતિ દુર્મતિઃ ॥ ૧૮-૧૬॥

તત્ર એવમ્ સતિ યઃ તુ કેવલમ્ આત્માનમ્ કર્તારમ્ પશ્યતિ,
સઃ દુર્મતિઃ અકૃત-બુદ્ધિત્વાત્ ન પશ્યતિ ।

યસ્ય નાહંકૃતો ભાવો બુદ્ધિર્યસ્ય ન લિપ્યતે ।
હત્વાઽપિ સ ઇમાઁલ્લોકાન્ન હન્તિ ન નિબધ્યતે ॥ ૧૮-૧૭॥

યસ્ય ન અહંકૃતઃ ભાવઃ બુદ્ધિઃ યસ્ય ન લિપ્યતે ।
હત્વા અપિ સઃ ઇમાન્ લોકાન્ ન હન્તિ ન નિબધ્યતે ॥ ૧૮-૧૭॥

યસ્ય અહંકૃતઃ ભાવઃ ન, યસ્ય બુદ્ધિઃ ન લિપ્યતે, સઃ ઇમાન્
લોકાન્ હત્વા અપિ ન હન્તિ, ન નિબધ્યતે ।

જ્ઞાનં જ્ઞેયં પરિજ્ઞાતા ત્રિવિધા કર્મચોદના ।
કરણં કર્મ કર્તેતિ ત્રિવિધઃ કર્મસંગ્રહઃ ॥ ૧૮-૧૮॥

જ્ઞાનમ્ જ્ઞેયમ્ પરિજ્ઞાતા ત્રિવિધા કર્મ-ચોદના ।
કરણમ્ કર્મ કર્તા ઇતિ ત્રિવિધઃ કર્મ-સંગ્રહઃ ॥ ૧૮-૧૮॥

જ્ઞાનમ્, જ્ઞેયમ્, પરિજ્ઞાતા ઇતિ ત્રિવિધા કર્મ-ચોદના (અસ્તિ) ।
કરણમ્, કર્મ, કર્તા (ઇતિ) ત્રિવિધઃ કર્મ-સંગ્રહઃ (અસ્તિ) ।

જ્ઞાનં કર્મ ચ કર્તા ચ ત્રિધૈવ ગુણભેદતઃ ।
પ્રોચ્યતે ગુણસઙ્ખ્યાને યથાવચ્છૃણુ તાન્યપિ ॥ ૧૮-૧૯॥

જ્ઞાનમ્ કર્મ ચ કર્તા ચ ત્રિધા એવ ગુણ-ભેદતઃ ।
પ્રોચ્યતે ગુણ-સઙ્ખ્યાને યથાવત્ શ‌ૃણુ તાનિ અપિ ॥ ૧૮-૧૯॥

જ્ઞાનમ્, કર્મ ચ કર્તા ચ ત્રિધા એવ ગુણ-ભેદતઃ
ગુણ-સઙ્ખ્યાને પ્રોચ્યતે, તાનિ અપિ યથાવત્ શ‌ૃણુ ।

સર્વભૂતેષુ યેનૈકં ભાવમવ્યયમીક્ષતે ।
અવિભક્તં વિભક્તેષુ તજ્જ્ઞાનં વિદ્ધિ સાત્ત્વિકમ્ ॥ ૧૮-૨૦॥

સર્વ-ભૂતેષુ યેન એકમ્ ભાવમ્ અવ્યયમ્ ઈક્ષતે ।
અવિભક્તમ્ વિભક્તેષુ તત્ જ્ઞાનમ્ વિદ્ધિ સાત્ત્વિકમ્ ॥ ૧૮-૨૦॥

યેન (જીવઃ) વિભક્તેષુ સર્વ-ભૂતેષુ અવિભક્તમ્, એકમ્
અવ્યયમ્ ભાવમ્ ઈક્ષતે, તત્ જ્ઞાનમ્ સાત્ત્વિકમ્ વિદ્ધિ ।

પૃથક્ત્વેન તુ યજ્જ્ઞાનં નાનાભાવાન્પૃથગ્વિધાન્ ।
વેત્તિ સર્વેષુ ભૂતેષુ તજ્જ્ઞાનં વિદ્ધિ રાજસમ્ ॥ ૧૮-૨૧॥

પૃથક્ત્વેન તુ યત્ જ્ઞાનમ્ નાના-ભાવાન્ પૃથક્-વિધાન્ ।
વેત્તિ સર્વેષુ ભૂતેષુ તત્ જ્ઞાનમ્ વિદ્ધિ રાજસમ્ ॥ ૧૮-૨૧॥

યત્ જ્ઞાનમ્ પૃથક્ત્વેન સર્વેષુ ભૂતેષુ તુ પૃથક્-વિધાન્
નાના-ભાવાન્ વેત્તિ, તત્ જ્ઞાનમ્ રાજસમ્ વિદ્ધિ ।

યત્તુ કૃત્સ્નવદેકસ્મિન્કાર્યે સક્તમહૈતુકમ્ ।
અતત્ત્વાર્થવદલ્પં ચ તત્તામસમુદાહૃતમ્ ॥ ૧૮-૨૨॥

યત્ તુ કૃત્સ્નવત્ એકસ્મિન્ કાર્યે સક્તમ્ અહૈતુકમ્ ।
અતત્ત્વાર્થવત્ અલ્પમ્ ચ તત્ તામસમ્ ઉદાહૃતમ્ ॥ ૧૮-૨૨॥

યત્ તુ એકસ્મિન્ કાર્યે કૃત્સ્નવત્ સક્તમ્ અહૈતુકમ્
અતત્ત્વાર્થવત્ અલ્પમ્ ચ, તત્(જ્ઞાનં) તામસમ્ ઉદાહૃતમ્ ।

નિયતં સઙ્ગરહિતમરાગદ્વેષતઃ કૃતમ્ ।
અફલપ્રેપ્સુના કર્મ યત્તત્સાત્ત્વિકમુચ્યતે ॥ ૧૮-૨૩॥

નિયતમ્ સઙ્ગ-રહિતમ્ અરાગ-દ્વેષતઃ કૃતમ્ ।
અફલ-પ્રેપ્સુના કર્મ યત્ તત્ સાત્ત્વિકમ્ ઉચ્યતે ॥ ૧૮-૨૩॥

અફલ-પ્રેપ્સુના યત્ નિયતમ્ કર્મ સઙ્ગ-રહિતમ્ અરાગ-દ્વેષતઃ
કૃતમ્, તત્ સાત્ત્વિકમ્ ઉચ્યતે ।

યત્તુ કામેપ્સુના કર્મ સાહંકારેણ વા પુનઃ ।
ક્રિયતે બહુલાયાસં તદ્રાજસમુદાહૃતમ્ ॥ ૧૮-૨૪॥

યત્ તુ કામ-ઈપ્સુના કર્મ સાહંકારેણ વા પુનઃ ।
ક્રિયતે બહુલ આયાસમ્ તત્ રાજસમ્ ઉદાહૃતમ્ ॥ ૧૮-૨૪॥

પુનઃ યત્ તુ કામ-ઈપ્સુના, સાહંકારેણ વા બહુલ આયાસમ્

કર્મ ક્રિયતે, તત્ રાજસમ્ ઉદાહૃતમ્ ।

અનુબન્ધં ક્ષયં હિંસામનપેક્ષ્ય ચ પૌરુષમ્ ।
મોહાદારભ્યતે કર્મ યત્તત્તામસમુચ્યતે ॥ ૧૮-૨૫॥

અનુબન્ધમ્ ક્ષયમ્ હિંસામ્ અનપેક્ષ્ય ચ પૌરુષમ્ ।
મોહાત્ આરભ્યતે કર્મ યત્ તત્ તામસમ્ ઉચ્યતે ॥ ૧૮-૨૫॥

અનુબન્ધમ્ ક્ષયમ્ હિંસામ્ પૌરુષમ્ ચ અનપેક્ષ્ય
યત્ કર્મ મોહાત્ આરભ્યતે, તત્ તામસમ્ ઉચ્યતે ।

મુક્તસઙ્ગોઽનહંવાદી ધૃત્યુત્સાહસમન્વિતઃ ।
સિદ્ધ્યસિદ્ધ્યોર્નિર્વિકારઃ કર્તા સાત્ત્વિક ઉચ્યતે ॥ ૧૮-૨૬॥

મુક્ત-સઙ્ગઃ અનહં-વાદી ધૃતિ-ઉત્સાહ-સમન્વિતઃ ।
સિદ્ધિ-અસિદ્ધ્યોઃ નિર્વિકારઃ કર્તા સાત્ત્વિકઃ ઉચ્યતે ॥ ૧૮-૨૬॥

મુક્ત-સઙ્ગઃ, અનહં-વાદી, ધૃતિ-ઉત્સાહ-સમન્વિતઃ,
સિદ્ધિ-અસિદ્ધ્યોઃ નિર્વિકારઃ કર્તા સાત્ત્વિકઃ ઉચ્યતે ।

રાગી કર્મફલપ્રેપ્સુર્લુબ્ધો હિંસાત્મકોઽશુચિઃ ।
હર્ષશોકાન્વિતઃ કર્તા રાજસઃ પરિકીર્તિતઃ ॥ ૧૮-૨૭॥

રાગી કર્મ-ફલ-પ્રેપ્સુઃ લુબ્ધઃ હિંસાત્મકઃ અશુચિઃ ।
હર્ષ-શોક-અન્વિતઃ કર્તા રાજસઃ પરિકીર્તિતઃ ॥ ૧૮-૨૭॥

રાગી, કર્મ-ફલ-પ્રેપ્સુઃ, લુબ્ધઃ, હિંસાત્મકઃ, અશુચિઃ,
હર્ષ-શોક-અન્વિતઃ કર્તા રાજસઃ પરિકીર્તિતઃ ।

અયુક્તઃ પ્રાકૃતઃ સ્તબ્ધઃ શઠો નૈષ્કૃતિકોઽલસઃ ।
વિષાદી દીર્ઘસૂત્રી ચ કર્તા તામસ ઉચ્યતે ॥ ૧૮-૨૮॥

અયુક્તઃ પ્રાકૃતઃ સ્તબ્ધઃ શઠઃ નૈષ્કૃતિકઃ અલસઃ ।
વિષાદી દીર્ઘ-સૂત્રી ચ કર્તા તામસઃ ઉચ્યતે ॥ ૧૮-૨૮॥

અયુક્તઃ, પ્રાકૃતઃ, સ્તબ્ધઃ, શઠઃ, નૈષ્કૃતિકઃ, અલસઃ,
વિષાદી, દીર્ઘ-સૂત્રી ચ કર્તા તામસઃ ઉચ્યતે ।

બુદ્ધેર્ભેદં ધૃતેશ્ચૈવ ગુણતસ્ત્રિવિધં શૃણુ ।
પ્રોચ્યમાનમશેષેણ પૃથક્ત્વેન ધનઞ્જય ॥ ૧૮-૨૯॥

બુદ્ધેઃ ભેદમ્ ધૃતેઃ ચ એવ ગુણતઃ ત્રિવિધમ્ શ ृણુ ।
પ્રોચ્યમાનમ્ અશેષેણ પૃથક્ત્વેન ધનઞ્જય ॥ ૧૮-૨૯॥

હે ધનઞ્જય! બુદ્ધેઃ ધૃતેઃ ચ એવ ગુણતઃ ત્રિવિધમ્
ભેદમ્ અશેષેણ પૃથક્ત્વેન પ્રોચ્યમાનમ્ શ ृણુ ।

પ્રવૃત્તિં ચ નિવૃત્તિં ચ કાર્યાકાર્યે ભયાભયે ।
બન્ધં મોક્ષં ચ યા વેત્તિ બુદ્ધિઃ સા પાર્થ સાત્ત્વિકી ॥ ૧૮-૩૦॥

પ્રવૃત્તિમ્ ચ નિવૃત્તિમ્ ચ કાર્ય-અકાર્યે ભય-અભયે ।
બન્ધમ્ મોક્ષમ્ ચ યા વેત્તિ બુદ્ધિઃ સા પાર્થ સાત્ત્વિકી ॥ ૧૮-૩૦॥

હે પાર્થ! યા બુદ્ધિઃ પ્રવૃત્તિમ્ ચ નિવૃત્તિમ્ કાર્ય-અકાર્યે
ભય-અભયે ચ બન્ધમ્ મોક્ષમ્ ચ વેત્તિ, સા સાત્ત્વિકી (મતા)।

યયા ધર્મમધર્મં ચ કાર્યં ચાકાર્યમેવ ચ ।
અયથાવત્પ્રજાનાતિ બુદ્ધિઃ સા પાર્થ રાજસી ॥ ૧૮-૩૧॥

યયા ધર્મમ્ અધર્મમ્ ચ કાર્યમ્ ચ અકાર્યમ્ એવ ચ ।
અયથાવત્ પ્રજાનાતિ બુદ્ધિઃ સા પાર્થ રાજસી ॥ ૧૮-૩૧॥

હે પાર્થ! યયા ચ (બુદ્ધ્યા જીવઃ) ધર્મમ્ અધર્મમ્ ચ,
કાર્યમ્ અકાર્યમ્ ચ, અયથાવત્ એવ પ્રજાનાતિ સા બુદ્ધિઃ રાજસી (મતા)।

અધર્મં ધર્મમિતિ યા મન્યતે તમસાવૃતા ।
સર્વાર્થાન્વિપરીતાંશ્ચ બુદ્ધિઃ સા પાર્થ તામસી ॥ ૧૮-૩૨॥

અધર્મમ્ ધર્મમ્ ઇતિ યા મન્યતે તમસા આવૃતા ।
સર્વ-અર્થાન્ વિપરીતાન્ ચ બુદ્ધિઃ સા પાર્થ તામસી ॥ ૧૮-૩૨॥

હે પાર્થ! યા તમસા આવૃતા (બુદ્ધિઃ) અધર્મમ્ ધર્મમ્
સર્વ-અર્થાન્ વિપરીતાન્ ચ ઇતિ મન્યતે, સા બુદ્ધિઃ તામસી (સ્મૃતા) ।

ધૃત્યા યયા ધારયતે મનઃપ્રાણેન્દ્રિયક્રિયાઃ ।
યોગેનાવ્યભિચારિણ્યા ધૃતિઃ સા પાર્થ સાત્ત્વિકી ॥ ૧૮-૩૩॥

ધૃત્યા યયા ધારયતે મનઃ-પ્રાણ-ઇન્દ્રિય-ક્રિયાઃ ।
યોગેન અવ્યભિચારિણ્યા ધૃતિઃ સા પાર્થ સાત્ત્વિકી ॥ ૧૮-૩૩॥

હે પાર્થ! (નરઃ) યયા અવ્યભિચારિણ્યા ધૃત્યા
મનઃ-પ્રાણ-ઇન્દ્રિય-ક્રિયાઃ યોગેન ધારયતે, સા ધૃતિઃ સાત્ત્વિકી (અસ્તિ) ।

યયા તુ ધર્મકામાર્થાન્ધૃત્યા ધારયતેઽર્જુન ।
પ્રસઙ્ગેન ફલાકાઙ્ક્ષી ધૃતિઃ સા પાર્થ રાજસી ॥ ૧૮-૩૪॥

યયા તુ ધર્મ-કામ-અર્થાન્ ધૃત્યા ધારયતે અર્જુન ।
પ્રસઙ્ગેન ફલ-આકાઙ્ક્ષી ધૃતિઃ સા પાર્થ રાજસી ॥ ૧૮-૩૪॥

હે અર્જુન! યયા ધૃત્યા પ્રસઙ્ગેન ફલ-આકાઙ્ક્ષી તુ (સન્)
ધર્મ-કામ-અર્થાન્ (નરઃ) ધારયતે, હે પાર્થ! સા
ધૃતિઃ રાજસી (અસ્તિ) ।

યયા સ્વપ્નં ભયં શોકં વિષાદં મદમેવ ચ ।
ન વિમુઞ્ચતિ દુર્મેધા ધૃતિઃ સા પાર્થ તામસી ॥ ૧૮-૩૫॥

યયા સ્વપ્નમ્ ભયમ્ શોકમ્ વિષાદમ્ મદમ્ એવ ચ ।
ન વિમુઞ્ચતિ દુર્મેધા ધૃતિઃ સા પાર્થ તામસી ॥ ૧૮-૩૫॥

હે પાર્થ! દુર્મેધા (નરઃ) યયા સ્વપ્નમ્, ભયમ્, શોકમ્,
વિષાદમ્, મદમ્ એવ ચ ન વિમુઞ્ચતિ, સા ધૃતિઃ તામસી (મતા) ।

સુખં ત્વિદાનીં ત્રિવિધં શૃણુ મે ભરતર્ષભ ।
અભ્યાસાદ્રમતે યત્ર દુઃખાન્તં ચ નિગચ્છતિ ॥ ૧૮-૩૬॥

સુખમ્ તુ ઇદાનીમ્ ત્રિવિધમ્ શૃણુ મે ભરતર્ષભ ।
અભ્યાસાત્ રમતે યત્ર દુઃખાન્તમ્ ચ નિગચ્છતિ ॥ ૧૮-૩૬॥

હે ભરતર્ષભ! ઇદાનીમ્ તુ ત્રિવિધમ્ સુખમ્ મે શૃણુ,
યત્ર (સુખે જીવઃ) અભ્યાસાત્ રમતે, દુઃખાન્તમ્ ચ નિગચ્છતિ ।

યત્તદગ્રે વિષમિવ પરિણામેઽમૃતોપમમ્ ।
તત્સુખં સાત્ત્વિકં પ્રોક્તમાત્મબુદ્ધિપ્રસાદજમ્ ॥ ૧૮-૩૭॥

યત્ તત્ અગ્રે વિષમ્ ઇવ પરિણામે અમૃત-ઉપમમ્ ।
તત્ સુખમ્ સાત્ત્વિકમ્ પ્રોક્તમ્ આત્મ-બુદ્ધિ-પ્રસાદજમ્ ॥ ૧૮-૩૭॥

યત્ અગ્રે વિષમ્ ઇવ, પરિણામે અમૃત-ઉપમમ્ તત્
આત્મ-બુદ્ધિ-પ્રસાદજમ્ (અસ્તિ), તત્ સુખમ્ સાત્ત્વિકમ્ પ્રોક્તમ્ ।

વિષયેન્દ્રિયસંયોગાદ્યત્તદગ્રેઽમૃતોપમમ્ ।
પરિણામે વિષમિવ તત્સુખં રાજસં સ્મૃતમ્ ॥ ૧૮-૩૮॥

વિષય-ઇન્દ્રિય-સંયોગાત્ યત્ તત્ અગ્રે અમૃત-ઉપમમ્ ।
પરિણામે વિષમ્ ઇવ તત્ સુખમ્ રાજસમ્ સ્મૃતમ્ ॥ ૧૮-૩૮॥

યત્ વિષય-ઇન્દ્રિય-સંયોગાત્ અગ્રે અમૃત-ઉપમમ્, તત્
પરિણામે (ચ) વિષમ્ ઇવ (અસ્તિ) તત્ સુખમ્ રાજસમ્ સ્મૃતમ્ ।

યદગ્રે ચાનુબન્ધે ચ સુખં મોહનમાત્મનઃ ।
નિદ્રાલસ્યપ્રમાદોત્થં તત્તામસમુદાહૃતમ્ ॥ ૧૮-૩૯॥

યત્ અગ્રે ચ અનુબન્ધે ચ સુખમ્ મોહનમ્ આત્મનઃ ।
નિદ્રા-આલસ્ય-પ્રમાદ-ઉત્થમ્ તત્ તામસમ્ ઉદાહૃતમ્ ॥ ૧૮-૩૯॥

યત્ અગ્રે ચ અનુબન્ધે ચ આત્મનઃ મોહનમ્ નિદ્રા-આલસ્ય-પ્રમાદ-ઉત્થમ્,
તત્ સુખમ્ તામસમ્ ઉદાહૃતમ્ ।

ન તદસ્તિ પૃથિવ્યાં વા દિવિ દેવેષુ વા પુનઃ ।
સત્ત્વં પ્રકૃતિજૈર્મુક્તં યદેભિઃ સ્યાત્ત્રિભિર્ગુણૈઃ ॥ ૧૮-૪૦॥

ન તત્ અસ્તિ પૃથિવ્યામ્ વા દિવિ દેવેષુ વા પુનઃ ।
સત્ત્વમ્ પ્રકૃતિજૈઃ મુક્તમ્ યત્ એભિઃ સ્યાત્ ત્રિભિઃ ગુણૈઃ ॥ ૧૮-૪૦॥

યત્ સત્ત્વમ્ એભિઃ પ્રકૃતિજૈઃ ત્રિભિઃ ગુણૈઃ મુક્તમ્ સ્યાત્, તત્
પૃથિવ્યામ્ વા દિવિ વા પુનઃ દેવેષુ (વા) ન અસ્તિ ।

બ્રાહ્મણક્ષત્રિયવિશાં શૂદ્રાણાં ચ પરન્તપ ।
કર્માણિ પ્રવિભક્તાનિ સ્વભાવપ્રભવૈર્ગુણૈઃ ॥ ૧૮-૪૧॥

બ્રાહ્મણ-ક્ષત્રિય-વિશામ્ શૂદ્રાણામ્ ચ પરન્તપ ।
કર્માણિ પ્રવિભક્તાનિ સ્વભાવ-પ્રભવૈઃ ગુણૈઃ ॥ ૧૮-૪૧॥

હે પરન્તપ! બ્રાહ્મણ-ક્ષત્રિય-વિશામ્ શૂદ્રાણામ્ ચ
કર્માણિ સ્વભાવ-પ્રભવૈઃ ગુણૈઃ પ્રવિભક્તાનિ (સન્તિ) ।

શમો દમસ્તપઃ શૌચં ક્ષાન્તિરાર્જવમેવ ચ ।
જ્ઞાનં વિજ્ઞાનમાસ્તિક્યં બ્રહ્મકર્મ સ્વભાવજમ્ ॥ ૧૮-૪૨॥

શમઃ દમઃ તપઃ શૌચમ્ ક્ષાન્તિઃ આર્જવમ્ એવ ચ ।
જ્ઞાનમ્ વિજ્ઞાનમ્ આસ્તિક્યમ્ બ્રહ્મ-કર્મ સ્વભાવજમ્ ॥ ૧૮-૪૨॥

શમઃ, દમઃ, તપઃ, શૌચમ્, ક્ષાન્તિઃ, આર્જવમ્, જ્ઞાનમ્,
વિજ્ઞાનમ્, આસ્તિક્યમ્ એવ ચ (ઇતિ) સ્વભાવજમ્ બ્રહ્મ-કર્મ (અસ્તિ) ।

શૌર્યં તેજો ધૃતિર્દાક્ષ્યં યુદ્ધે ચાપ્યપલાયનમ્ ।
દાનમીશ્વરભાવશ્ચ ક્ષાત્રં કર્મ સ્વભાવજમ્ ॥ ૧૮-૪૩॥

શૌર્યમ્ તેજઃ ધૃતિઃ દાક્ષ્યમ્ યુદ્ધે ચ અપિ અપલાયનમ્ ।
દાનમ્ ઈશ્વર-ભાવઃ ચ ક્ષાત્રમ્ કર્મ સ્વભાવજમ્ ॥ ૧૮-૪૩॥

શૌર્યમ્, તેજઃ, ધૃતિઃ, દાક્ષ્યમ્, યુદ્ધે અપિ ચ અપલાયનમ્,
દાનમ્, ઈશ્વર-ભાવઃ ચ (ઇતિ) સ્વભાવજમ્ ક્ષાત્રમ્ કર્મ (અસ્તિ) ।

કૃષિગૌરક્ષ્યવાણિજ્યં વૈશ્યકર્મ સ્વભાવજમ્ ।
પરિચર્યાત્મકં કર્મ શૂદ્રસ્યાપિ સ્વભાવજમ્ ॥ ૧૮-૪૪॥

કૃષિ-ગૌરક્ષ્ય-વાણિજ્યમ્ વૈશ્ય-કર્મ સ્વભાવજમ્ ।
પરિચર્યા-આત્મકમ્ કર્મ શૂદ્રસ્ય અપિ સ્વભાવજમ્ ॥ ૧૮-૪૪॥

કૃષિ-ગૌરક્ષ્ય-વાણિજ્યમ્ સ્વભાવજમ્ વૈશ્ય-કર્મ (અસ્તિ)
અપિ (ચ) શૂદ્રસ્ય પરિચર્યા-આત્મકમ્ કર્મ સ્વભાવજમ્ (અસ્તિ) ।

સ્વે સ્વે કર્મણ્યભિરતઃ સંસિદ્ધિં લભતે નરઃ ।
સ્વકર્મનિરતઃ સિદ્ધિં યથા વિન્દતિ તચ્છૃણુ ॥ ૧૮-૪૫॥

સ્વે સ્વે કર્મણિ અભિરતઃ સંસિદ્ધિમ્ લભતે નરઃ ।
સ્વકર્મ-નિરતઃ સિદ્ધિમ્ યથા વિન્દતિ તત્ શ‌ૃણુ ॥ ૧૮-૪૫॥

સ્વે સ્વે કર્મણિ અભિરતઃ નરઃ સંસિદ્ધિમ્ લભતે ।
સ્વકર્મ-નિરતઃ (નરઃ) યથા સિદ્ધિમ્ વિન્દતિ, તત્ શ‌ૃણુ ।

યતઃ પ્રવૃત્તિર્ભૂતાનાં યેન સર્વમિદં તતમ્ ।
સ્વકર્મણા તમભ્યર્ચ્ય સિદ્ધિં વિન્દતિ માનવઃ ॥ ૧૮-૪૬॥

યતઃ પ્રવૃત્તિઃ ભૂતાનામ્ યેન સર્વમ્ ઇદમ્ તતમ્ ।
સ્વકર્મણા તમ્ અભ્યર્ચ્ય સિદ્ધિમ્ વિન્દતિ માનવઃ ॥ ૧૮-૪૬॥

યતઃ ભૂતાનામ્ પ્રવૃત્તિઃ (અસ્તિ), યેન ઇદમ્ સર્વમ્ તતમ્
(અસ્તિ) તમ્ (ઈશ્વરં) સ્વકર્મણા અભ્યર્ચ્ય માનવઃ સિદ્ધિમ્ વિન્દતિ ।

શ્રેયાન્સ્વધર્મો વિગુણઃ પરધર્માત્સ્વનુષ્ઠિતાત્ ।
સ્વભાવનિયતં કર્મ કુર્વન્નાપ્નોતિ કિલ્બિષમ્ ॥ ૧૮-૪૭॥

શ્રેયાન્ સ્વધર્મઃ વિગુણઃ પર-ધર્માત્ સ્વનુષ્ઠિતાત્ ।

સ્વભાવ-નિયતમ્ કર્મ કુર્વન્ ન આપ્નોતિ કિલ્બિષમ્ ॥ ૧૮-૪૭ ॥

વિગુણઃ સ્વધર્મઃ સ્વનુષ્ઠિતાત્ પર-ધર્માત્ શ્રેયાન્ (અસ્તિ),
સ્વભાવ-નિયતમ્ કર્મ કુર્વન્ (નરઃ) કિલ્બિષમ્ ન આપ્નોતિ ।

સહજં કર્મ કૌન્તેય સદોષમપિ ન ત્યજેત્ ।
સર્વારમ્ભા હિ દોષેણ ધૂમેનાગ્નિરિવાવૃતાઃ ॥ ૧૮-૪૮ ॥

સહજમ્ કર્મ કૌન્તેય સદોષમ્ અપિ ન ત્યજેત્ ।
સર્વારમ્ભાઃ હિ દોષેણ ધૂમેન અગ્નિઃ ઇવ આવૃતાઃ ॥ ૧૮-૪૮ ॥

હે કૌન્તેય! સહજમ્ કર્મ સદોષમ્ અપિ ન ત્યજેત્,
ધૂમેન અગ્નિઃ ઇવ હિ સર્વારમ્ભાઃ દોષેણ આવૃતાઃ (સન્તિ) ।

અસક્તબુદ્ધિઃ સર્વત્ર જિતાત્મા વિગતસ્પૃહઃ ।
નૈષ્કર્મ્યસિદ્ધિં પરમાં સંન્યાસેનાધિગચ્છતિ ॥ ૧૮-૪૯ ॥

અસક્ત-બુદ્ધિઃ સર્વત્ર જિત-આત્મા વિગત-સ્પૃહઃ ।
નૈષ્કર્મ્ય-સિદ્ધિમ્ પરમામ્ સંન્યાસેન અધિગચ્છતિ ॥ ૧૮-૪૯ ॥

સર્વત્ર અસક્ત-બુદ્ધિઃ જિત-આત્મા, વિગત-સ્પૃહઃ (નરઃ)
પરમામ્ નૈષ્કર્મ્ય-સિદ્ધિમ્ સંન્યાસેન અધિગચ્છતિ ।

સિદ્ધિં પ્રાપ્તો યથા બ્રહ્મ તથાપ્નોતિ નિબોધ મે ।
સમાસેનૈવ કૌન્તેય નિષ્ઠા જ્ઞાનસ્ય યા પરા ॥ ૧૮-૫૦ ॥

સિદ્ધિમ્ પ્રાપ્તઃ યથા બ્રહ્મ તથા આપ્નોતિ નિબોધ મે ।
સમાસેન એવ કૌન્તેય નિષ્ઠા જ્ઞાનસ્ય યા પરા ॥ ૧૮-૫૦ ॥

હે કૌન્તેય! સિદ્ધિમ્ પ્રાપ્તઃ (માનવઃ) યથા બ્રહ્મ આપ્નોતિ,
તથા મે સમાસેન એવ નિબોધ, યા (ચ ઇયં બ્રહ્મ-પ્રાપ્તિઃ)
(સા) જ્ઞાનસ્ય પરા નિષ્ઠા (વર્તતે) ।

બુદ્ધ્યા વિશુદ્ધયા યુક્તો ધૃત્યાત્માનં નિયમ્ય ચ ।
શબ્દાદીન્વિષયાંસ્ત્યક્ત્વા રાગદ્વેષૌ વ્યુદસ્ય ચ ॥ ૧૮-૫૧ ॥

બુદ્ધ્યા વિશુદ્ધયા યુક્તઃ ધૃત્યા આત્માનમ્ નિયમ્ય ચ ।
શબ્દાદીન્ વિષયાન્ ત્યક્ત્વા રાગ-દ્વેષૌ વ્યુદસ્ય ચ ॥ ૧૮-૫૧ ॥

વિશુદ્ધયા બુદ્ધ્યા યુક્તઃ, ધૃત્યા આત્માનમ્ નિયમ્ય ચ,
શબ્દાદીન્ વિષયાન્ ત્યક્ત્વા, રાગ-દ્વેષૌ ચ વ્યુદસ્ય,

વિવિક્તસેવી લઘ્વાશી યતવાક્કાયમાનસઃ ।
ધ્યાનયોગપરો નિત્યં વૈરાગ્યં સમુપાશ્રિતઃ ॥ ૧૮-૫૨ ॥

વિવિક્ત-સેવી લઘુ-આશી યત-વાક્-કાય-માનસઃ ।
ધ્યાન-યોગ-પરઃ નિત્યમ્ વૈરાગ્યમ્ સમુપાશ્રિતઃ ॥ ૧૮-૫૨ ॥

વિવિક્ત-સેવી, લઘુ-આશી, યત-વાક્-કાય-માનસઃ, નિત્યમ્
ધ્યાન-યોગ-પરઃ, વૈરાગ્યમ્ સમુપાશ્રિતઃ (ચ),

અહંકારં બલં દર્પં કામં ક્રોધં પરિગ્રહમ્ ।
વિમુચ્ય નિર્મમઃ શાન્તો બ્રહ્મભૂયાય કલ્પતે ॥ ૧૮-૫૩ ॥

અહંકારમ્ બલમ્ દર્પમ્ કામમ્ ક્રોધમ્ પરિગ્રહમ્ ।
વિમુચ્ય નિર્મમઃ શાન્તઃ બ્રહ્મ-ભૂયાય કલ્પતે ॥ ૧૮-૫૩ ॥

અહંકારમ્ બલમ્ દર્પમ્ કામમ્ ક્રોધમ્ પરિગ્રહમ્ (ચ)
વિમુચ્ય, નિર્મમઃ, શાન્તઃ, (નરઃ) બ્રહ્મ-ભૂયાય કલ્પતે ।

બ્રહ્મભૂતઃ પ્રસન્નાત્મા ન શોચતિ ન કાઙ્ક્ષતિ ।
સમઃ સર્વેષુ ભૂતેષુ મદ્ભક્તિં લભતે પરામ્ ॥ ૧૮-૫૪ ॥

બ્રહ્મ-ભૂતઃ પ્રસન્ન-આત્મા ન શોચતિ ન કાઙ્ક્ષતિ ।
સમઃ સર્વેષુ ભૂતેષુ મત્-ભક્તિમ્ લભતે પરામ્ ॥ ૧૮-૫૪ ॥

બ્રહ્મ-ભૂતઃ પ્રસન્ન-આત્મા (સન્) ન શોચતિ, ન કાઙ્ક્ષતિ,
(ચ) સર્વેષુ ભૂતેષુ સમઃ (ભૂત્વા) પરામ્ મત્-ભક્તિમ્ લભતે ।

ભક્ત્યા મામભિજાનાતિ યાવાન્યશ્ચાસ્મિ તત્ત્વતઃ ।
તતો માં તત્ત્વતો જ્ઞાત્વા વિશતે તદનન્તરમ્ ॥ ૧૮-૫૫ ॥

ભક્ત્યા મામ્ અભિજાનાતિ યાવાન્ યઃ ચ અસ્મિ તત્ત્વતઃ ।
તતઃ મામ્ તત્ત્વતઃ જ્ઞાત્વા વિશતે તત્ અનન્તરમ્ ॥ ૧૮-૫૫ ॥

યાવાન્ યઃ ચ અસ્મિ, (તં) મામ્ તત્ત્વતઃ ભક્ત્યા અભિજાનાતિ,
તતઃ તત્ત્વતઃ મામ્ જ્ઞાત્વા તત્ અનન્તરમ્ (મામ્) વિશતે ।

સર્વકર્માણ્યપિ સદા કુર્વાણો મદ્વ્યપાશ્રયઃ ।
મત્પ્રસાદાદવાપ્નોતિ શાશ્વતં પદમવ્યયમ્ ॥ ૧૮-૫૬ ॥

સર્વ-કર્માણિ અપિ સદા કુર્વાણઃ મત્-વ્યપાશ્રયઃ ।

મત્-પ્રસાદાત્ અવાપ્નોતિ શાશ્વતમ્ પદમ્ અવ્યયમ્ ॥ ૧૮-૫૬॥

મત્-વ્યપાશ્રયઃ સદા સર્વ-કર્માણિ અપિ કુર્વાણઃ
મત્-પ્રસાદાત્ શાશ્વતમ્ અવ્યયમ્ પદમ્ અવાપ્નોતિ ।

ચેતસા સર્વકર્માણિ મયિ સંન્યસ્ય મત્પરઃ ।
બુદ્ધિયોગમુપાશ્રિત્ય મચ્ચિત્તઃ સતતં ભવ ॥ ૧૮-૫૭॥

ચેતસા સર્વ-કર્માણિ મયિ સંન્યસ્ય મત્-પરઃ ।
બુદ્ધિ-યોગમ્ ઉપાશ્રિત્ય મત્-ચિત્તઃ સતતમ્ ભવ ॥ ૧૮-૫૭॥

(ત્વં) સર્વ-કર્માણિ ચેતસા મયિ સંન્યસ્ય, મત્-પરઃ
(સન્), બુદ્ધિ-યોગમ્ ઉપાશ્રિત્ય,સતતમ્ મત્-ચિત્તઃ ભવ ।

મચ્ચિત્તઃ સર્વદુર્ગાણિ મત્પ્રસાદાત્તરિષ્યસિ ।
અથ ચેત્ત્વમહંકારાન્ન શ્રોષ્યસિ વિનઙ્ક્ષ્યસિ ॥ ૧૮-૫૮॥

મત્-ચિત્તઃ સર્વ-દુર્ગાણિ મત્-પ્રસાદાત્ તરિષ્યસિ ।
અથ ચેત્ ત્વમ્ અહંકારાત્ ન શ્રોષ્યસિ વિનઙ્ક્ષ્યસિ ॥ ૧૮-૫૮॥

(ત્વમ્) મત્-ચિત્તઃ (સન્) સર્વ-દુર્ગાણિ મત્-પ્રસાદાત્
તરિષ્યસિ । અથ ત્વમ્ અહંકારાત્ ન શ્રોષ્યસિ ચેત્, વિનઙ્ક્ષ્યસિ ।

યદહંકારમાશ્રિત્ય ન યોત્સ્ય ઇતિ મન્યસે ।
મિથ્યૈષ વ્યવસાયસ્તે પ્રકૃતિસ્ત્વાં નિયોક્ષ્યતિ ॥ ૧૮-૫૯॥

યત્ અહંકારમ્ આશ્રિત્ય ન યોત્સ્યે ઇતિ મન્યસે ।
મિથ્યા એષઃ વ્યવસાયઃ તે પ્રકૃતિઃ ત્વામ્ નિયોક્ષ્યતિ ॥ ૧૮-૫૯॥

યત્ અહંકારમ્ આશ્રિત્ય 'ન યોત્સ્યે' ઇતિ મન્યસે, (તત્) એષઃ
તે વ્યવસાયઃ મિથ્યા (એવ અસ્તિ), પ્રકૃતિઃ ત્વામ્ નિયોક્ષ્યતિ ।

સ્વભાવજેન કૌન્તેય નિબદ્ધઃ સ્વેન કર્મણા ।
કર્તું નેચ્છસિ યન્મોહાત્કરિષ્યસ્યવશોઽપિ તત્ ॥ ૧૮-૬૦॥

સ્વભાવજેન કૌન્તેય નિબદ્ધઃ સ્વેન કર્મણા ।
કર્તુમ્ ન ઇચ્છસિ યત્ મોહાત્ કરિષ્યસિ અવશઃ અપિ તત્ ॥ ૧૮-૬૦॥

હે કૌન્તેય! (યતઃ) સ્વભાવજેન સ્વેન કર્મણા નિબદ્ધઃ
(ત્વં) યત્ મોહાત્ કર્તુમ્ ન ઇચ્છસિ, તત્ અવશઃ (સન્)
અપિ કરિષ્યસિ ।

ઈશ્વરઃ સર્વભૂતાનાં હૃદ્દેશેઽર્જુન તિષ્ઠતિ ।
ભ્રામયન્સર્વભૂતાનિ યન્ત્રારૂઢાનિ માયયા ॥ ૧૮-૬૧ ॥

ઈશ્વરઃ સર્વ-ભૂતાનામ્ હૃત્-દેશે અર્જુન તિષ્ઠતિ ।
ભ્રામયન્ સર્વ-ભૂતાનિ યન્ત્ર-આરૂઢાનિ માયયા ॥ ૧૮-૬૧ ॥

હે અર્જુન! યન્ત્ર-આરૂઢાનિ સર્વ-ભૂતાનિ માયયા
ભ્રામયન્ ઈશ્વરઃ સર્વ-ભૂતાનામ્ હૃત્-દેશે તિષ્ઠતિ ।

તમેવ શરણં ગચ્છ સર્વભાવેન ભારત ।
તત્પ્રસાદાત્પરાં શાન્તિં સ્થાનં પ્રાપ્સ્યસિ શાશ્વતમ્ ॥ ૧૮-૬૨ ॥

તમ્ એવ શરણમ્ ગચ્છ સર્વ-ભાવેન ભારત ।
તત્ પ્રસાદાત્ પરામ્ શાન્તિમ્ સ્થાનમ્ પ્રાપ્સ્યસિ શાશ્વતમ્ ॥ ૧૮-૬૨ ॥

હે ભારત! (ત્વં) તમ્ એવ સર્વ-ભાવેન શરણમ્ ગચ્છ ।
તત્ પ્રસાદાત્ પરામ્ શાન્તિમ્ શાશ્વતમ્ સ્થાનમ્ (ચ) પ્રાપ્સ્યસિ ।

ઇતિ તે જ્ઞાનમાખ્યાતં ગુહ્યાદ્ગુહ્યતરં મયા ।
વિમૃશ્યૈતદશેષેણ યથેચ્છસિ તથા કુરુ ॥ ૧૮-૬૩ ॥

ઇતિ તે જ્ઞાનમ્ આખ્યાતમ્ ગુહ્યાત્ ગુહ્યતરં મયા ।
વિમૃશ્ય એતત્ અશેષેણ યથા ઇચ્છસિ તથા કુરુ ॥ ૧૮-૬૩ ॥

ઇતિ ગુહ્યાત્ ગુહ્યતરં જ્ઞાનમ્ મયા તે આખ્યાતમ્,
એતત્ અશેષેણ વિમૃશ્ય, યથા ઇચ્છસિ તથા કુરુ ।

સર્વગુહ્યતમં ભૂયઃ શ‍ૃણુ મે પરમં વચઃ ।
ઇષ્ટોઽસિ મે દૃઢમિતિ તતો વક્ષ્યામિ તે હિતમ્ ॥ ૧૮-૬૪ ॥

સર્વ-ગુહ્યતમમ્ ભૂયઃ શ‍ૃણુ મે પરમમ્ વચઃ ।
ઇષ્ટઃ અસિ મે દૃઢમ્ ઇતિ તતઃ વક્ષ્યામિ તે હિતમ્ ॥ ૧૮-૬૪ ॥

સર્વ-ગુહ્યતમમ્ પરમમ્ વચઃ મે ભૂયઃ શ‍ૃણુ । મે દૃઢમ્
ઇષ્ટઃ અસિ, ઇતિ તતઃ તે હિતમ્ વક્ષ્યામિ ।

મન્મના ભવ મદ્ભક્તો મદ્યાજી માં નમસ્કુરુ ।
મામેવૈષ્યસિ સત્યં તે પ્રતિજાને પ્રિયોઽસિ મે ॥ ૧૮-૬૫ ॥

મત્-મનાઃ ભવ મત્-ભક્તઃ મત્-યાજી મામ્ નમસ્કુરુ ।

મામ્ એવ એષ્યસિ સત્યમ્ તે પ્રતિજાને પ્રિયઃ અસિ મે ॥ ૧૮-૬૫॥

મત્-મનાઃ, મત્-ભક્તઃ, મત્-યાજી (ચ) ભવ, મામ્
નમસ્કુરુ (એવં કૃત્વા ત્વં) મામ્ એવ એષ્યસિ । (ઇતિ) તે
સત્યમ્ પ્રતિજાને, (યતઃ ત્વં) મે પ્રિયઃ અસિ ।

સર્વધર્માન્પરિત્યજ્ય મામેકં શરણં વ્રજ ।
અહં ત્વા સર્વપાપેભ્યો મોક્ષયિષ્યામિ મા શુચઃ ॥ ૧૮-૬૬॥

સર્વ-ધર્માન્ પરિત્યજ્ય મામ્ એકમ્ શરણમ્ વ્રજ ।
અહમ્ ત્વા સર્વ-પાપેભ્યઃ મોક્ષયિષ્યામિ મા શુચઃ ॥ ૧૮-૬૬॥

(ત્વં) સર્વ-ધર્માન્ પરિત્યજ્ય મામ્ એકમ્ શરણમ્ વ્રજ ,
અહમ્ ત્વા સર્વ-પાપેભ્યઃ મોક્ષયિષ્યામિ, (ત્વં) મા શુચઃ ।

ઇદં તે નાતપસ્કાય નાભક્તાય કદાચન ।
ન ચાશુશ્રૂષવે વાચ્યં ન ચ માં યોઽભ્યસૂયતિ ॥ ૧૮-૬૭॥

ઇદમ્ તે ન અતપસ્કાય ન અભક્તાય કદાચન ।
ન ચ અશુશ્રૂષવે વાચ્યમ્ ન ચ મામ્ યઃ અભ્યસૂયતિ ॥ ૧૮-૬૭॥

ઇદમ્ તે ન અતપસ્કાય, (ચ) ન અભક્તાય, ન ચ અશુશ્રૂષવે,
ન ચ યઃ મામ્ અભ્યસૂયતિ (તસ્મૈ) કદાચન વાચ્યમ્ ।

ય ઇદં પરમં ગુહ્યં મદ્ભક્તેષ્વભિધાસ્યતિ ।
ભક્તિં મયિ પરાં કૃત્વા મામેવૈષ્યત્યસંશયઃ ॥ ૧૮-૬૮॥

યઃ ઇદમ્ પરમમ્ ગુહ્યમ્ મત્-ભક્તેષુ અભિધાસ્યતિ ।
ભક્તિમ્ મયિ પરામ્ કૃત્વા મામ્ એવ એષ્યતિ અસંશયઃ ॥ ૧૮-૬૮॥

યઃ ઇદમ્ પરમમ્ ગુહ્યમ્ (જ્ઞાનં) મત્-ભક્તેષુ અભિધાસ્યતિ,
(સઃ) મયિ પરામ્ ભક્તિમ્ કૃત્વા, અસંશયઃ (સન્) મામ્
એવ એષ્યતિ ।

ન ચ તસ્માન્મનુષ્યેષુ કશ્ચિન્મે પ્રિયકૃત્તમઃ ।
ભવિતા ન ચ મે તસ્માદન્યઃ પ્રિયતરો ભુવિ ॥ ૧૮-૬૯॥

ન ચ તસ્માત્ મનુષ્યેષુ કશ્ચિત્ મે પ્રિય-કૃત્તમઃ ।
ભવિતા ન ચ મે તસ્માત્ અન્યઃ પ્રિયતરઃ ભુવિ ॥ ૧૮-૬૯॥

મનુષ્યેષુ ચ કશ્ચિત્ તસ્માત્ પ્રિય-કૃત્તમઃ મે ન (અસ્તિ);

તસ્માત્ અન્યઃ ભુવિ પ્રિયતરઃ ચ મે ન ભવિતા ।

અધ્યેષ્યતે ચ ય ઇમં ધર્મ્યં સંવાદમાવયોઃ ।
જ્ઞાનયજ્ઞેન તેનાહમિષ્ટઃ સ્યામિતિ મે મતિઃ ॥ ૧૮-૭૦॥

અધ્યેષ્યતે ચ યઃ ઇમમ્ ધર્મ્યમ્ સંવાદમ્ આવયોઃ ।
જ્ઞાન-યજ્ઞેન તેન અહમ્ ઇષ્ટઃ સ્યામ્ ઇતિ મે મતિઃ ॥ ૧૮-૭૦॥

યઃ ચ આવયોઃ ઇમમ્ ધર્મ્યમ્ સંવાદમ્ અધ્યેષ્યતે, તેન
જ્ઞાન-યજ્ઞેન અહમ્ ઇષ્ટઃ સ્યામ્ ઇતિ મે મતિઃ ।

શ્રદ્ધાવાનનસૂયશ્ચ શ઼ૃણુયાદપિ યો નરઃ ।
સોઽપિ મુક્તઃ શુભાઁલ્લોકાન્પ્રાપ્નુયાત્પુણ્યકર્મણામ્ ॥ ૧૮-૭૧॥

શ્રદ્ધાવાન્ અનસૂયઃ ચ શ઼ૃણુયાત્ અપિ યઃ નરઃ ।
સઃ અપિ મુક્તઃ શુભાન્ લોકાન્ પ્રાપ્નુયાત્ પુણ્ય-કર્મણામ્ ॥ ૧૮-૭૧॥

શ્રદ્ધાવાન્ અનસૂયઃ ચ યઃ નરઃ (ઇદં) શ઼ૃણુયાત્ અપિ સઃ
મુક્તઃ (સન્) પુણ્ય-કર્મણામ્ શુભાન્ લોકાન્ અપિ પ્રાપ્નુયાત્ ।

કચ્ચિદેતચ્છ્રુતં પાર્થ ત્વયૈકાગ્રેણ ચેતસા ।
કચ્ચિદજ્ઞાનસમ્મોહઃ પ્રનષ્ટસ્તે ધનઞ્જય ॥ ૧૮-૭૨॥

કચ્ચિત્ એતત્ શ્રુતમ્ પાર્થ ત્વયા એકાગ્રેણ ચેતસા ।
કચ્ચિત્ અજ્ઞાન-સમ્મોહઃ પ્રનષ્ટઃ તે ધનઞ્જય ॥ ૧૮-૭૨॥

હે પાર્થ! ત્વયા એતત્ એકાગ્રેણ ચેતસા શ્રુતમ્ કચ્ચિત્?
હે ધનઞ્જય! તે અજ્ઞાન-સમ્મોહઃ પ્રનષ્ટઃ કચ્ચિત્?

અર્જુન ઉવાચ ।
અર્જુનઃ ઉવાચ ।

નષ્ટો મોહઃ સ્મૃતિર્લબ્ધા ત્વત્પ્રસાદાન્મયાચ્યુત ।
સ્થિતોઽસ્મિ ગતસન્દેહઃ કરિષ્યે વચનં તવ ॥ ૧૮-૭૩॥

નષ્ટઃ મોહઃ સ્મૃતિઃ લબ્ધા ત્વત્ પ્રસાદાત્ મયા અચ્યુત ।
સ્થિતઃ અસ્મિ ગત-સન્દેહઃ કરિષ્યે વચનમ્ તવ ॥ ૧૮-૭૩॥

હે અચ્યુત! ત્વત્ પ્રસાદાત્ (મે) મોહઃ નષ્ટઃ,
મયા સ્મૃતિઃ લબ્ધા, (અહં) ગત-સન્દેહઃ સ્થિતઃ અસ્મિ,
(ઇદાનીં) તવ વચનમ્ કરિષ્યે ।

સઞ્જય ઉવાચ ।

સઞ્જયઃ ઉવાચ ।

ઇત્યહં વાસુદેવસ્ય પાર્થસ્ય ચ મહાત્મનઃ ।
સંવાદમિમમશ્રૌષમદ્ભુતં રોમહર્ષણમ્ ॥ ૧૮-૭૪॥

ઇતિ અહમ્ વાસુદેવસ્ય પાર્થસ્ય ચ મહાત્મનઃ ।
સંવાદમ્ ઇમમ્ અશ્રૌષમ્ અદ્ભુતમ્ રોમ-હર્ષણમ્ ॥ ૧૮-૭૪॥

ઇતિ અહમ્ વાસુદેવસ્ય મહાત્મનઃ પાર્થસ્ય ચ ઇમમ્ અદ્ભુતમ્
રોમ-હર્ષણમ્ સંવાદમ્ અશ્રૌષમ્ ।

વ્યાસપ્રસાદાચ્છ્રુતવાનેતદ્ગુહ્યમહં પરમ્ ।
યોગં યોગેશ્વરાત્કૃષ્ણાત્સાક્ષાત્કથયતઃ સ્વયમ્ ॥ ૧૮-૭૫॥

વ્યાસ-પ્રસાદાત્ શ્રુતવાન્ એતત્ ગુહ્યમ્ અહમ્ પરમ્ ।
યોગમ્ યોગેશ્વરાત્ કૃષ્ણાત્ સાક્ષાત્ કથયતઃ સ્વયમ્ ॥ ૧૮-૭૫॥

વ્યાસ-પ્રસાદાત્ સ્વયમ્ યોગમ્ કથયતઃ યોગેશ્વરાત્ કૃષ્ણાત્
એતત્ પરમ્ ગુહ્યમ્ અહમ્ સાક્ષાત્ શ્રુતવાન્ ।

રાજન્સંસ્મૃત્ય સંસ્મૃત્ય સંવાદમિમમદ્ભુતમ્ ।
કેશવાર્જુનયોઃ પુણ્યં હૃષ્યામિ ચ મુહુર્મુહુઃ ॥ ૧૮-૭૬॥

રાજન્ સંસ્મૃત્ય સંસ્મૃત્ય સંવાદમ્ ઇમમ્ અદ્ભુતમ્ ।
કેશવ-અર્જુનયોઃ પુણ્યમ્ હૃષ્યામિ ચ મુહુઃ મુહુઃ ॥ ૧૮-૭૬॥

હે રાજન્! (અહં) કેશવ-અર્જુનયોઃ ઇમમ્ પુણ્યમ્ અદ્ભુતમ્
ચ સંવાદમ્ સંસ્મૃત્ય સંસ્મૃત્ય મુહુઃ મુહુઃ હૃષ્યામિ ।

તચ્ચ સંસ્મૃત્ય સંસ્મૃત્ય રૂપમત્યદ્ભુતં હરેઃ ।
વિસ્મયો મે મહાન્ રાજન્હૃષ્યામિ ચ પુનઃ પુનઃ ॥ ૧૮-૭૭॥

તત્ ચ સંસ્મૃત્ય સંસ્મૃત્ય રૂપમ્ અતિ-અદ્ભુતમ્ હરેઃ ।
વિસ્મયઃ મે મહાન્ રાજન્ હૃષ્યામિ ચ પુનઃ પુનઃ ॥ ૧૮-૭૭॥

હે રાજન્! હરેઃ તત્ ચ અતિ-અદ્ભુતમ્ રૂપમ્ સંસ્મૃત્ય
સંસ્મૃત્ય મે મહાન્ વિસ્મયઃ (ભવતિ), (અહં) પુનઃ પુનઃ હૃષ્યામિ ચ ।

યત્ર યોગેશ્વરઃ કૃષ્ણો યત્ર પાર્થો ધનુર્ધરઃ ।

તત્ર શ્રીર્વિજયો ભૂતિર્ધ્રુવા નીતિર્મતિર્મમ ॥ ૧૮-૭૮॥

યત્ર યોગેશ્વરઃ કૃષ્ણઃ યત્ર પાર્થઃ ધનુર્ધરઃ ।
તત્ર શ્રીઃ વિજયઃ ભૂતિઃ ધ્રુવા નીતિઃ મતિઃ મમ ॥ ૧૮-૭૮॥

યત્ર યોગેશ્વરઃ કૃષ્ણઃ યત્ર ધનુર્ધરઃ પાર્થઃ,
તત્ર શ્રીઃ, વિજયઃ, ભૂતિઃ, ધ્રુવા નીતિઃ (ચ ઇતિ)
મમ મતિઃ (અસ્તિ) ।

ૐ તત્સદિતિ શ્રીમદ્ભગવદ્ગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શ્રીકૃષ્ણાર્જુનસંવાદે
મોક્ષસંન્યાસયોગો નામ અષ્ટાદશોઽધ્યાયઃ ॥ ૧૮॥

ૐ તત્ સત્ ઇતિ શ્રીમત્ ભગવત્ ગીતાસુ ઉપનિષત્સુ
બ્રહ્મ-વિદ્યાયામ્ યોગ-શાસ્ત્રે શ્રીકૃષ્ણ-અર્જુન-સંવાદે
મોક્ષ-સંન્યાસ-યોગઃ નામ અષ્ટાદશઃ અધ્યાયઃ ॥ ૧૮॥

anvaya formulated and
retyped by Sunder Hattangadi

*Gita - sandhi-vigraha and anvaya*
pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*